र्वत्र्यवहारे पर्यन्तैर्देशस्यैव नोपलभ्यते॥ ततश्च निरुपनमयुक्तेरित्याशंक्याभिप्रायमाविष्करोति
॥२०॥ देशादिकल्पनायां ... देशापेक्षा नास्तीति भावः॥ ननु देशाद्यभावे साक्षिणः सर्व
गतत्वं सर्वसाक्षित्वादियुक्तिविरुद्धमित्यत आह॥ स्वाभाविकमेव किं न स्यादित्यत आह॥ न तु स्वतः॥
द्वितीयवारसंगतत्वाच्च तिभावः॥ सर्वगतत्ववत्सर्वसाक्षित्वमपि न वास्तवमित्याह॥२१॥॥

विषययोरवभासकत्वे वैकल्याभिमानप्रयुक्तहर्षविषादवत्त्वात्तन्नृत्याभिमानिप्रभुत्वमहंकारस्य
परिसरवर्तित्वेऽपि विषयाणां तद्वाहिन्यात्सभ्यपुरुषसाम्यं॥ नानाविधविकारवत्त्वान्नर्तकीसाम्यं धियः
धीविक्रियाणामनुकूलव्यापारवत्त्वात्तालादिधारिसमानत्वमिन्द्रियाणां॥ एतत्सर्वावभासकत्वात्
साक्षिणो दीपसादृश्यमस्तीत्युक्तं॥ ननु साक्षिणोऽहंकाराद्यवभासकत्वे तेन तेन संबन्धापत्त्या
तद्रूपविकारवत्त्वं स्यादित्याशंक्याह॥१४॥ दीपो यथा गमनादिविकारशून्यः स्वदेशे वस्थितः सन्
सन्निहितानाविलपदार्थान्नवभासयत्येवं साक्ष्यपीति भावः॥ ननु साक्षिणो बहिरन्तरवभासक

अहंकारः प्रभुः सभ्या विषया नर्तकी मतिः॥ तालादिधार्यक्षाणि दीपः साक्ष्यवभास
कः॥१४॥ स्वस्थानसंस्थितो दीपः सर्वतो भासयेद्यथा॥ स्थिरस्थायी तथा साक्षी बहिरन्तः॥
प्रकाशयेत्॥१५॥ बहिरन्तर्विभागोऽयं देहापेक्षो न साक्षिणि॥ विषया बाह्यदेशस्था देह
स्यान्तरहंकृतिः॥१६॥॥

त्वाभिधानमनुपपन्नमहर्वमनपरमनेन तरमवाह्येरिति भ्रमात्तस्य वांतरविभागाभावाभिधा
नादित्याशंक्याह॥१५॥ कस्यवा स्वत्वे कस्यवांतरत्वमित्यत आह॥ ननु स्थिरस्थायी तथा साक्षी बहिरं
तः प्रकाशयेदित्यविकारिसत्तो बहिरंतरवभासकत्वोक्तिरयुक्ता॥ अहं घटं पश्यामीत्यत्राहमित्यन्
तरेवाहंकारसाक्षितया प्रथमतोऽवभासकस्यानंतरं घटं पश्यामीति च घटाकारस्फुरणस्यै
एवं बहिर्निर्गमनानुभवादित्याशंक्याह॥१६॥ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ईक्षते रूपमहं पश्यामीत्येवं दृष्टदर्शनं दृश्यलक्षणां त्रिपुटीमेकयत्नेन भासयते ॥ एवं शृणोमीत्यादावपि योज्यं ॥ युगपद्विकारित्वेनानेकावभासकत्वे दृष्टान्तमाह ॥ नृत्येति दृष्टान्तेन स्पष्टयति ॥ ९ ॥ अविशेषेणाहम्यादिविषयत्रिपुटीवभासनाय दृश्यादिविकारसंवन्धेऽपि निर्यावत ॥ दार्ष्टान्तिके योजयति ॥ ९ ॥ तस्मादावहंकाराद्यभावेऽपि तत्साक्षितयाभात्येवेत्यर्थः ॥ ननु प्रकाशरूपाया बुद्धेरेवाहंकारादिसर्ववस्त्ववभासकत्वसंभवात् ॥ किं तद्व्यतिरिक्तसाक्षिकल्पनयेत्याशंक्याह ॥ २ ॥ कूटस्थे निर्विकारे साक्षिणि ज्ञप्ति

ईक्षे शृणोमि जिघ्रामि स्वादयामि स्पृशाम्यहं ॥ इति भासयते सर्वं नृत्यशालास्थदीपवत् ॥ ९ ॥ नृत्यशालास्थितो दीपः प्रभुं सभ्यांश्च नर्तकीं ॥ दीपयेदविशेषेण तदभावेऽपि दीप्यते ॥ ९ ॥ अहंकारं धियं साक्षी विषयानपि भासयेत् ॥ अहंकाराद्यभावेऽपि स्वयं भात्येव पूर्ववत् ॥ २ ॥ निरन्तरं भासमाने कूटस्थे ज्ञप्तिरूपतः ॥ तद्भासा भास्यमानेयं बुद्धिर्नृत्यत्यनेकधा ॥ ३ ॥


रूपतः स्वप्रकाशचैतन्यरूपतया निरन्तरं भासमाने सदा स्फुरति सति ॥ इयं बुद्धिः तद्भासा तस्य साक्षिणः स्वरूपचैतन्येन भास्यमाना प्रकाश्यमाना अनेकधा दृश्यादिप्रमित्यादिना ज्ञानाकारेण नृत्यति विक्रियते ॥ अयं भावः ॥ यद्यपि बुद्धिर्विकारित्वान् जडत्वात् स्वतः स्फूर्तिरहिता अतस्तद्व्यतिरिक्तः सर्वावभासकः साक्ष्यभ्युपगन्तव्य इति ॥ उक्तमर्थं स्पष्टबुद्धिसौकर्याय नाटकत्वेन निरूपयति ॥ २ ॥

यद्यपि दाभासविशिष्टोऽहंकारो व्यवहारदशायां देहादाववहमित्यभिमन्यते ॥ असौ कर्ता कर्तृत्वादिधर्मविशिष्टो जीव इत्यर्थः ॥ तस्य किं कारणमित्याकांक्षायामाह ॥ कामादिवृत्तिमान् अन्तःकरणभागो मनः इत्यर्थः करणं साधनं क्रिये व्यापारभूते क्रिये दर्शयति ॥ अनयोः स्वरूपं विषयं च विविच्य दर्शयति ॥ इदमेषेति बहिर्मुखेति ॥ स्वरूपाभिनयः प्रवेशिष्टेन विषयप्रदर्शनं ॥ बाह्ये देहाद्बहिर्वर्तमाने इदमिति तया निर्दिश्यमाने वस्तु उल्लिखेत् विषयी कुर्यादित्यर्थः ॥ ननु मन एव सर्वव्यवहारसिद्धौ वहंकारादिवैयर्थ्यं प्रसज्येतेत्याशंक्याह ॥ ७ ॥ मनसेदमिति सामान्यमात्रं गृह्यते ॥ ननु तद्विशेषा गन्धादयः

अहमित्यभिमन्ता यः कर्तासौ तस्य साधनं ॥ मनः तस्य क्रिये अंतर्बहिर्वृत्ती क्रमोत्थिते ॥ ९ ॥ अंतर्मुखाहमित्येषा वृत्तिः कर्तारमुल्लिखेत् ॥ बहिर्मुखेदमित्येषा बाह्यं वस्त्विदमुल्लिखेत् ॥ ७ ॥ इदमो ये विशेषाः स्युर्गन्धरूपरसादयः ॥ असांकर्येण तान्भिंद्यात् घ्राणादीन्द्रियपंचकं ॥ कर्तारं च क्रियां तद्वद्व्यावृत्तविषयानपि ॥ स्फोरयेदेकयत्नेन योऽसौ साक्ष्यत्र चिद्वपुः ॥ ९ ॥

दित्यत आह घ्राणादिकमुपयुज्यत इत्यर्थः ॥ एवं सोपकरणं जीवस्वरूपं निरूप्य परमात्मानं निरूपयति ॥ ८ ॥ कर्तारं पूर्वोक्तमहंकाररूपं ॥ क्रियामहमिदमात्मिकां मनोवृत्तिरूपां व्यावृत्तविषयानपि ॥ व्यावृत्तानन्योन्यविलक्षणान् ॥ घ्राणादिग्राह्यान् गन्धादीन्विषयांश्च एकयत्नेन युगपदेव ॥ यश्चिद्वपुश्चिद्रूप एव सन् स्फोरयेत् प्रकाशयेत् ॥ असौ अत्र वेदान्तशास्त्रे साक्षीत्युच्यत इत्यर्थः ॥ साक्षिणः एकयत्नत्वेन सर्वस्फोरकत्वमभिनीय दर्शयति ॥ ९ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA



नाट्यशालाभाविकल्पितमायममभाव: ॥ किंतु सात्त्विकोपाधिनिबंधनात्तेन विरोधइति भाव: ॥ स्वयमात्मस्वरूपा
ज्ञेयं सत्येवेति प्रदर्शयन् समाधत्तेन स्वप्नवादं संक्षिप्य दर्शयति ॥ ३ ॥ अनेकजन्मभजनात्स्वकेषु जन्मसु तुष्टि
नीकर्मणामनुष्ठानात् समर्पणात् प्रपाद्यनन्तानां स्वविचारस्वस्यात्मनो ब्रह्मरूपस्य ज्ञानसाधनं श्रवणादिकं वि
कीर्षति कर्तुमिच्छति ॥ ततः स्वविचारेण विचारजनितज्ञानेन मायायां ॥ स्वस्याद्वयानन्दत्वादिरूपाच्छादि
कायां मायाविद्यादिरूपायां विनष्टायां निवृत्तायां सत्यां स्वयमद्वयानन्दरूपः परमात्मैवावशिष्यते
ननु तद्वयानन्दरूपस्य सर्वबंधः कथं तस्मादिरूपतिमोक्षंयनिवृत्तिलक्षणः स मोक्षः तत्त्वज्ञानफलत्वा
भिधानात् मोक्षबंधे स्थितिरूपतायां ज्ञानाप्रपञ्चोऽसिद्धाकाशादयः ॥ ३ ॥ अद्वितीयब्रह्मणिवा

देवाघृत्यमदेहेषु प्रविष्टो देवताभवत् ॥ मर्त्याद्यधमदेहेषु स्थितो भजति मर्त्यतां ॥ ३ ॥ अनेकजन्म
भजनात्स्वविचारं चिकीर्षति ॥ विचारेण विनष्टायां मायायां शिष्यते स्वयं ॥ ४ ॥ अद्वयानन्दरूप
स्य सद्वयत्वं च दुःखिता ॥ बंधः प्रोक्तः स्वरूपेण स्थितिर्मुक्तिरितीर्यते ॥ ५ ॥ अविचारकृतो बंधो वि
चारेण निवर्तते ॥ तस्माज्जीवपरात्मानौ सर्वदैव विचारयेत् ॥ ८ ॥

द्वैतबंधमोक्षयोस्वरूपमाहुर्द्वितीयेत्यादि सार्धंबंधः स्वस्वरूपावस्थितिस्तस्याज्ञाननिवृत्तिरेव मोक्ष
स्तेनास्य निर्विरोधइति भावः ॥ ननु कर्मणोपासनेनैव सिद्धिरितिस्थितानां कारणेति स्मरतेमोक्षस्य कर्म
साधनत्वावगमात् ॥ किमनेन विचारजनितज्ञानेनेत्यत आह ॥ अविचारइति ॥ ८ ॥ विचाराभावोपल
क्षितात्तत्त्वज्ञानकृतस्य बंधस्य विचारजन्यज्ञानादन्यतोऽनिवृत्तिरुपपद्यते ॥ उदाहृतस्मृतौ च मोक्षसिद्धिशब्दे
न चित्तशुद्धिरेवाभिधीयते न मोक्ष इति भावः ॥ विचारेण बंधनिवृत्तिरुक्ता किंविषये ॥ विचारे इत्य
पेक्षायामाह ॥ तस्मादविवेकादस्य बंधस्य सर्वदा विचारं कुर्यादित्यर्थः ॥ तत्र जीवस्य स्वरूपं तावन्निरूपयति ॥ ८ ॥

इदानीं रूपपादितमर्थं संक्षिप्य दर्शयति ॥ महावाक्येन देहादिष्वभिमानपरित्यागात् स्वयमसंगोऽभि
न्नात्मास्मि ब्रह्मवपुरीरे ॥ स्वस्य नित्यस्वरूपं सदानंदं चिद्रूपं ब्रह्मणा मोती मर्त्यः ॥ ध्यानदीपात्तु संधानफलमाह
१५ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्य श्रीभारतीतीर्थविद्यारण्यमुनीश्वराचार्यकिंकरेण रामकृष्णा
ख्यविदुषाविरचिता ध्यानदीपाख्यानवमप्रकरणे ॥ ९ ॥ ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ अ
थ नाटकदीपस्य मया संक्षिप्य वक्ष्यते ॥ चिकीर्षितस्य ग्रंथस्य प्रारंभे परिसमाप्त्यामभिमतदेवतानत्वा
स्मरणलक्षणं मंगलमाचरन् ॥ मुमुक्षु अधिकारिणामनायासेन निष्प्रपंचब्रह्मात्मतत्त्वप्रतिपत्तिसिद्धये ।
अध्यारोपापवादाभ्यां निष्प्रपंचं प्रपंच्यते ॥ शिष्याणां बोधसिद्ध्यर्थं तत्त्वज्ञैः कल्पितः क्रमः इति न्यायमनु

अनात्मबुद्धिशैथिल्यं फलं ध्यानाद्दिने दिने ॥ पश्यन्नपि चेन्नात्मज्ञः को परं मातास्त्ववेद ॥ १५ ॥ दे
हाभिमाने विध्वस्ते ध्यानादात्मानमद्वये ॥ पश्यन्मर्त्योऽमृतो भूत्वा ह्यत्र ब्रह्म समश्नुते ॥ १६ ॥ ध्यान
दीपमिमं सम्यक् परामृशति यो नरः ॥ मुक्तसंशय एवायं ध्यायति ब्रह्म संततं ॥ १ ॥ इति नवमं प्र
करणं ॥ ९ ॥ ॐ परमात्माद्वयानंदपूर्णः पूर्वं स्वमायया ॥ स्वयमेव जगद्भूत्वा प्राविशज्जीवरूपतः ॥ १ ॥

सृत्याग्नन्याध्यारोपेणावदाह ॥ पूर्वं सृष्टेः प्रागद्वयानंदरूपः पूर्णः ॥ सदेव सोम्येदमग्र आसीदेकमेवाद्वि
तीयं विज्ञानमानंदं ब्रह्म सत्यं पूर्णमदः पूर्णमिदमित्यादिश्रुतिप्रसिद्धः स्वगतादिभेदशून्यः परमानंदरू
पः परिपूर्णः परमात्मा स्वमायया ॥ मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरमिति श्रुतिप्रसिद्धया स्वनिष्ठया मा
यासक्त्या स्वयमेव जगद्भूत्वा ॥ तदात्मानं स्वयमकुरुत ॥ सच्च त्यच्चाभवदित्यादिश्रुतेः ॥ स्वयमेव जगदाका
रतां प्राप्य जीवरूपतया प्राविशत ॥ तत्सृष्ट्वा तदेवानुप्राविशदनेन जीवेनात्मनानुप्रविश्येत्यादिश्रुतेर्जी
वरूपेण प्रविष्टवानित्यर्थः ॥ ननु परमात्मनेऽपि वैकस्य सर्वशरीरेषु प्रविष्टेन शब्दस्पर्शनकादिभावेनप्रयुक्तत्वं ॥

पते हृत्स्थकामपरेणामस्त्वं ब्रह्मपदे कारः॥ तस्माद्धिहानेनैवायत्नेन पकतत्र्यमेवेति रतिउभयरूपत्वं पति पादितमित्यर्थः॥ कदचलूांयमेनापिपितदानेवनेज्ञानेमादिनाद्वैविध्यमक्रमित्याह॥४॥ उक्तमर्थमपसंहरति ४८॥ विचारोतत्तज्ज्ञानेसंपादनासमर्थस्यानिर्गुणब्रह्मध्यानेऽधिकारस्तमर्थं आत्मगीतायां सम्यगभिहितस्तमाह॥ यथेति॥४९॥ आत्मगीतावाक्यान्येवोदाहरति॥ ध्यानस्य सम्यक्ज्ञानोपायत्वं दर्शयन्नाह॥ दा

प्रायस्त्वब्रह्मलोकेशं कारब्रह्मवर्णितः॥ पिप्पलादेन मुनिना सत्यकामाय पृच्छते॥५०॥ पतय तेवनेज्ञानायो यदिह्वालितनयतन॥ इति प्रोक्तं यमेनापि पृष्ठेनेन विकेतसे॥५१॥ इहवामरणा वास्य ब्रह्मलोकेयवाभवेत॥ ब्रह्मसाक्षात्कृतिः सम्यगुपासीनस्यनिर्गुणं॥५२॥ अर्थीयमा त्मगीतस्यामपिसमुद्दिशीरितः॥ विचारोत्तममात्मानमुपासीतेति संततं॥५३॥ साक्षात्कर्तुम शक्तोपिचिंतयेन्मामशंकितः॥ कालेनानुभवारूढोभवेयंफलितोध्रुवं॥५४॥ यथागाधनिधे र्लब्धौनोपायः खननं विना॥ मल्लाभेपितथास्वात्मचिंतांमुक्त्वानचापरः॥५५॥ देहोपलमपा स्य बुद्धिकुद्दालात्पुनः॥ खात्वामनोभुवं भूयोगृह्णीयान्मांनिधिं पुमान्॥५६॥ अनुभूते रभावेपिब्रह्मास्मीत्येवचिंत्यतां॥ अप्यसत्प्राप्यतेध्यानान्नित्याप्तंब्रह्मकिंपुनः॥५७॥

हंतिके चेनय॥ अनिवेकोपक्रमार्थं वश्रवणयन्नवेनाह॥५८॥ ज्ञानेसमर्थस्य ध्यानेऽधिकार इत्युक्तं वाक्यांत रपव्रति॥ ध्यानादिना ब्रह्मप्राप्तौ कैमुतिकन्यायमाह॥ उपासकस्यापूर्वं ममविद्यमानमपिदेवतादिकंध्या नात्प्राप्यते॥ किलस्वरूपत्वेननित्यप्राप्तंसर्वात्मकंब्रह्म ध्यानात्प्राप्यतइति किमुवक्तव्यमित्यर्थः॥ ब्र ह्मध्यानफलस्यप्रसक्तसिद्धत्वाद्दपि ध्यानेकर्तव्यमित्याह॥५९॥

किमुमानवः ऊरुषः सर्वानुपासकान्ब्रह्मलोकं प्रापयति॥ उत्प्रतीकोपासनमिश्रान्नितिसंपायः नत्वनियामकभावात्सर्वानितिप्रामेउत्तरः प्रतीकोपासकमिश्रान्सर्वानुपासकानुपनमानवइति वादरायणाचार्यो मन्यते॥ ननुनहोनियमः॥ सर्वेषामपि सर्वोपासनेषु मार्गोपदेशाविशेषाद्विविवि यंथस्तत्राह॥ उभयथादोषादिति कांश्चिदुपासकानुपनयतिकांश्चिन्नेत्युभयथाभावाभ्युपगमेदो षाभावादित्यर्थः॥ अनियमन्यायस्य प्रतीकमिश्रविषयत्वादितिभावः॥ नियामकमाहतत्क्रतु श्चेति॥ क्रतुरुपासनं कार्यब्रह्मविषयिकः क्रतुरुपासनं कार्यब्रह्मविषयिकः क्रतुर्यस्योपास

प्रतीकाधिकरणेनकृतमयइतिः॥ ब्रह्मलोकं फलेनस्यात्सकामस्येतिवर्णितं निर्गुणोपास्तिसामर्थ्यात्तत्रत्वमवेक्ष्यत॥ पुनरावर्तनेनापिकल्पान्तेनविमुच्यत॥५९ प्रणवोपास्त्यः प्रायोनिर्गुणएववेदगाः॥ क्वचित्सगुणतात्युक्ताप्रणवोपासनस्य हि॥५८॥

कस्यापिसतन्क्रतुत्वाभावेऽपुरुपासकः सनन्यामोनिक्रतिसमृतिसिद्धत्वात्तदुपासकानामे वकार्यब्रह्मप्राप्तिरित्यर्थः॥ प्रतीकोपासनेषु नात्मब्रह्मत्वादिगुणः प्रतीकस्यविशेषणा नेनप्रतीकस्यैवप्राधान्यात्तदुपासकानां ब्रह्मोपासकत्वं॥ पंचाग्न्युपासकानांतुब्रह्मोपासक त्वेपिक्रतिवलाद्ब्रह्मप्राप्तिरिति नहिसकामस्यनवज्ञानेकृतोन्जायतइत्याशंकाह॥४४॥ इम मानवंआवर्तनावर्ततेनसपुनरावर्तते॥ ब्रह्मणासहतेसर्वेइत्यादिक्रतिस्मृतिसद्भावात्तत्र स्यपुनःसंसारप्राप्तिः किनसकिरेवेत्याह॥ इदानींप्रणवोपासनस्यगाढदृष्टस्यतद्वैविध्यंदर्शय

भ ईश्वरगीताकार ५८

१२४

110

111

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सोकामोनिष्कामआप्तकामआत्मकामोनतस्यप्राणाउत्क्रामंत्यत्रैवसमवलीयंते॥ब्रह्मैवसन्ब्रह्मा
प्येति॥अशरीरोनिरिंद्रियोऽप्राणोह्यमनाःसच्चिदानंदमात्रःसस्वराड्भवतियएवंवेद॥विस्मयोत्तरयमो।
कारश्चिन्मयश्चिदंसर्वंतस्मात्त्वमेवासरूपएकमेवानंदवनेनदर्शनमभयमेतद्ब्रह्माभयंहिवैब्रह्मभवति।
यएवंवेदनिरहंसे॥इत्यादिवाक्यैस्तापनीयोपनिषदिनिर्गुणोपासनस्यमोक्षःफलंनतुसगुणस्येत्यर्थः॥
ननूपासनयापिमुक्तिस्साक्षान्नःपृथ्व्याविवर्ततेयनायेतनिष्कलिविरोधइत्याशंक्य॥विद्याव्यवधानेनमोक्ष
शब्दाभिधानान्नविरोधइत्याह॥७॥मरणेब्रह्मलोकेवानंतंविज्ञायमुच्यतेऽस्मात्कायंश्रुतिद्वयप्रमाणय
ति॥८॥तत्रसोकामोनिष्कामइत्यादिनातापनीयेवाक्यंपूर्वमेवोदाहृतं॥इदानींप्रश्नोपनिषद्वाक्यमर्थतः

सोकामोनिष्कामइतिह्यशरीरोनिरिंद्रियः॥अभयंहीतिमंत्रेणतापनीयफलेस्फुटे॥५॥उपा
सनस्यसामर्थ्याद्विद्योत्पत्तिर्भवेत्ततः॥नान्यःपंथाइतिह्येतच्छास्त्रेनैवविरुध्यते॥६॥निष्कामो
पासनान्मुक्तिस्तापनीयेसमीरिता॥ब्रह्मलोकःसकामस्ययःप्रश्नेसमीरितः॥७॥यउपास्ते
त्रिमात्रेणब्रह्मलोकेसनीयते॥सएतस्माज्जीवघनात्परंपुरुषमीक्षते॥८॥

परइति॥८॥यःपुनरेतंत्रिमात्रेणोमित्येतेनैवाक्षरेणपरंपुरुषमभिध्यायीतसतेजसिसूर्येसंपन्नः॥यथा
पादोदरस्त्वचाविनिर्मुच्यतएवंहवैसपाप्मनाविनिर्मुक्तः॥ससामभिरुन्नीयतेब्रह्मलोकंसएतस्माज्जीवघना
त्परात्परंपुरिशयंपुरुषमीक्षतइति॥सकामस्यब्रह्मलोकप्राप्तिःश्रूयतइत्यर्थः॥ननुप्रश्नो
प्रश्नेसकामस्यब्रह्मलोकगतिरितिप्रतीयतेनमुक्तिरित्याशंक्य॥तत्रतत्रसालोक्यादिःश्रूयतइत्याह॥स
एतस्मादिति॥ब्रह्मलोकंगतःसउपासकएतस्माज्जीवघनाज्जीवसमष्टिरूपाद्धिरण्यगर्भात्परंपुरुषं
हृदयनिष्ठयाधिकंवैनस्यस्वरूपंपरमात्मानमीक्षतेसाक्षात्करोतीत्यर्थः॥किंचप्रतीकालंबनान्नयतीतिबा

दरायणस्तेनैवप्रमाणेनसाक्षात्कृतःसहात्मनायथास्वेकल्पितेलोकेनयतीतिवाक्यार्थः॥नन्
दाहृतात्स्मृतिस्मृतिवाक्याद्ध्यानस्यप्रत्ययतेऽभ्यासविजन्मनिमिथीयतेनतन्नकिंचिदित्याशंक्यस
र्वतस्त्याभिधानमेवीकरोति॥२९॥कथंतर्हिमरणकालेज्ञानान्मोक्षोभवत्यत्रेदंवाक्यद्वयंप्र
माणत्वेनोपन्यस्तमित्याशंक्याह॥तथासत्यस्यप्रत्ययाद्वाविजन्मेतिनिश्चयेसतिसगुणोपासक
स्ययथामरणकालेदेहोंऽभ्यासवशात्सगुणब्रह्माकारःप्रत्ययोजायते॥एवंनिर्गुणोपासकस्या
पिनिर्गुणब्रह्मगोचरःप्रत्ययोजनिष्यतइत्यर्थः॥नचनिर्गुणप्रत्ययस्याभ्यासवशान्निर्गुणब्रह्मप्राप्ति

यंयंवापिस्मरन्भावंत्यजत्यंतेकलेवरं॥तंतमेवैतियच्चित्तस्तेनयातीतिशास्त्रतः॥२९॥अ
न्त्यप्रत्ययतोनूनंभाविजन्मतथासति॥निर्गुणप्रत्ययोपिस्यात्सगुणोपासनेयथा॥३०
नित्यनिर्गुणरूपंतन्नाममात्रेणजायतां॥अर्थतोमोक्षएवैषसंवादिभ्रमवन्मतः॥३१॥=
तत्सामर्थ्याज्जायतेधीर्मूलाविद्यानिवर्तकः॥अविमुक्तोपासनेनतारकब्रह्मबुद्धिवत्॥=

देवमवेन्नमुक्तिरित्याशंक्य॥ब्रह्मप्राप्तिमुक्त्योःशब्दमात्रेणभेदोनार्थतइत्याह॥नित्यमिति॥३२
तद्ब्रह्मनित्यमितिनिर्गुणमितिनाममात्रेणोच्यतां॥अर्थतस्त्वेषमोक्षएवब्रह्मरूपावस्थितिर्मुक्ति
रित्यभिधानादितिभावः॥तत्रदृष्टांतमाह॥यथासंवादिभ्रमोनाममात्रेणभ्रमस्सन्नुच्यतेवस्तुतः।
प्रमाज्ञानमेवतद्वदित्यर्थः॥ननुनिर्गुणोपासनस्यमानसक्रियारूपस्यमुक्तिसाधनत्वाभिधाने
विरुद्धमित्याशंक्य॥तज्ज्ञानस्यज्ञानस्यमोक्षसाधनत्वाभिधानान्नविरोधइत्याह॥३८॥तत्रदृष्टांत
माह॥नचनिर्गुणोपासनस्यमोक्षःफलमित्यत्रकिंप्रमाणमित्याशंक्याह॥॥३९॥॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

112

113

114

तदिदं निर्गुणोपासनं कृतः प्रतिपाद्यत इत्यत आह ॥ यस्माद्युक्त्याद्यप्रवेशस्तस्माद्विचारासंभवे यो
गउपासनमुक्तमित्यर्थः ॥ विचारासंभवे कारणमाह ॥ यतो विचारो न संभवस्ततो योगः कर्तव्य इत्याह
मुख्यत्वे कारणमाह ॥ तेन योगेन यतो धीदर्पो नश्यति यतो मुख्य इत्यर्थः ॥ एवं व्याकुलचित्तानां योगा
न्मुख्यत्वमभिधाय तद्रहितानां विचार एव मुख्य इत्याह ॥३०॥ सांख्यनामा विचारः सांख्यशब्दवाच्य
स्तत्त्वविचारो मुख्यः कृत इत्यत ॥ झटिति ॥ योगसांख्ययोरुभयोर्वपि तत्त्वज्ञानद्वारा मुक्तिसाधनत्वे

उपासकानामप्येवं विचारत्यागतो यदि ॥ बाढं तस्माद्विचारस्यासंभवे योग ईरितः ॥३०॥
बहुव्याकुलचित्तानां विचारात्तत्त्वधीर्नहि ॥ योगो मुख्यस्ततस्तेषां धीदर्पस्तेन नश्यति ॥३१॥
अव्याकुलधियां मोहमात्रेणाच्छादितात्मनाम् ॥ सांख्यनामा विचारः स्यान्मुख्यो झटिति सि
द्धिदः ॥३२॥ यत्सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते ॥ एकं सांख्यं च योगं च यः पश्यति स पश्य
ति ॥३३॥ तत्कारणं सांख्ययोगाभिपन्नमिति हि श्रुतिः ॥ यस्तु श्रुतेर्गुरुः सांख्याभासः सांख्य
योगयोः ॥३४॥ उपासनं नातिपक्वमिह यस्य परस्य सः ॥ मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्य ते ॥३५॥

गीतावाक्यं प्रमाणयति ॥३४॥ यः सांख्यं च योगं च फलत एकं पश्यति स पश्यति सम्यक्पश्यतीत्यर्थः
न केवलं गीतावाक्यं प्रमाणं किं तु तत्र मूलभूता श्रुतिरप्यस्तीत्याह ॥३३॥ ननु सांख्ययोगयोस्तत्त्वज्ञान
साधनत्वेनैक्यांगीकारे तत्कार्यत्वप्रतिपादितानां तज्ज्ञानामपि स्वीकार्यत्वं स्यादित्याशंक्याह ॥ प्राभासो
बाध्यत इत्यर्थः ॥ नन्वउपासने कृते वीणस्य तत्त्वज्ञानाभावात्कमरणे सति मोक्षो न सिध्येदित्याशंक्याह
मरणे ब्रह्मलोके वा तत्त्वं विज्ञाय मुच्यत इति ॥ मरणावसरे ज्ञानाभ्यासे किं लाभे प्रमाणमाह ॥३५॥

115

निर्गुणोपासने पक्वे यदा भवति तदा सविकल्पकः समाधिः स्यात्ततः सविकल्पकसमाधेः निरोधा
ख्योधः तस्यापि निरोधे सर्वनिरोधान्निर्बीजः समाधिः सूत्रोक्तलक्षणो निर्विकल्पकः समाधिः सो
नायासेन लभ्यते ॥ भवत्वेवं निर्विकल्पकलाभः ततः किमित्यत आह ॥२५॥ असिद्धत्वसंशोधक्तनिपुनः
पुनर्वासिते भाविते सति वाक्यात्तत्त्वमस्यादिलक्षणात्तत्त्वधीस्तत्त्वज्ञानमदृष्टवत्सामीप्येव ब्रह्माकारज्ञा
पेनोत्पद्यते ॥ तत्त्वज्ञानस्वरूपमेव विशदयति ॥२६॥ ननु निर्विकल्पकसमाधिवशादपरोक्षज्ञानमुदी
तेभवत्किं प्रमाणमित्याशंक्यामृतबिंद्वादिश्रुतयः प्रमाणमित्याह ॥२७॥ फलितमाह ॥ एवं च सति नि

निर्गुणोपासनं पक्वं समाधिः स्याच्छनैस्ततः ॥ यः समाधिर्निरोधाख्यः सोऽनायासेन लभ्यते ॥२५
निरोधलाभे पुंसोऽन्तरसंगं वस्तु शिष्यते ॥ पुनः पुनर्वासितेऽस्मिन्वाक्याज्जायेत तत्त्वधीः ॥२६॥
निर्विकारासंगनित्यस्वप्रकाशैकपूर्णताः ॥ बुद्धौ झटिति शास्त्रोक्ता आरोहन्त्यविवादतः ॥२२
योगाभ्यासस्त्वेतदर्थोऽमृतबिंद्वादिषु श्रुतः ॥ एवं च दृष्टद्वारापि हेतुत्वादन्यतो वरम् ॥२८॥
उपेक्ष्य तीर्थयात्रां जपादीनेव कुर्वताम् ॥ पिंडं समुत्सृज्य करं लेढीति न्याय आपतेत् ॥२९॥

गुणोपासनस्यापरोक्षज्ञानप्रसाधनत्वं दृष्टद्वारापि निर्विकल्पकसमाधिद्वारेणापि शास्त्रादृष्टद्वा
रापि हेतुत्वात्साधनत्वादन्यतः सगुणोपासनादिभ्यो वरं श्रेष्ठमित्यर्थः ॥ एवं च निर्गुणोपासनस्या
परोक्षज्ञानसाधनत्वे सिद्धे सति तत्परित्यज्यान्यत्र प्रवृत्तानामाह यात्राप्रसक्तः स्यादिति लौकिकन्यायप्र
दर्शनेनाह ॥ उपेक्ष्येति ॥२८॥ नन्वात्मतत्त्वविचारं परित्यज्य निर्गुणोपासनं कुर्वतामप्ययं न्या
यः ॥ समान इत्याशंक्यांगीकरोति ॥२९॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रमत्वमिदमुच्यते इत्यभिप्रायेणाह ॥ पामरादीनां विद्यमानमपि ब्रह्मत्वमज्ञातत्वान्नात्र पुरुषार्थोपयो-
गीत्याशंक्य ज्ञातत्वेनापुरुषार्थोपयोगित्वमुपासकस्यापि समानमित्याह ॥ ननु तर्ह्युपासने किमर्थं
समधीयते इत्याशंक्य ॥ इतरानुष्ठानेभ्यः श्रेष्ठत्वाभिप्रायेणोक्तमिति दृष्टान्तपूर्वकमाह ॥ उपवासेति ॥ इ-
तरानुष्ठानाच्छ्रैष्ठ्यमेव दर्शयति ॥१५॥ उक्तेतरेभ्यः श्रेष्ठत्वे कारणमाह ॥१६॥ निर्गुणोपासनस्य सर्वश्रेष्ठत्वे का-
रणमाह उक्तमर्थं दृष्टान्तप्रदर्शनपूर्वकं द्रढयति ॥१७॥ ननु संवादिभ्रान्तिः स्वयमेव प्रमा न भवति ॥ किंत-

श्रुत्वैवोपासकस्यापि वास्तवी ब्रह्मतेति चेत् ॥ पामराणां तिरश्चां च वास्तवी ब्रह्मता न किं ॥१८
अज्ञानात्पुरुषार्थत्वमुभयत्रापि तत्समं ॥ उपवासाद्यथा भिक्षा वरं ध्यानं तथान्यतः ॥१९॥ पाम-
राणां व्यवहृतेर्वरं कर्माद्यनुष्ठितिः ॥ ततोऽपि सगुणोपास्तिर्निर्गुणोपासनं ततः ॥२०॥ याव-
द्विज्ञानसामीप्यं तावच्छ्रैष्ठ्यं विवर्धते ॥ ब्रह्मज्ञानायते साक्षान्निर्गुणोपासनं शनैः ॥२१॥ यथा
संवादिविभ्रान्तिः फलकाले प्रमायते ॥ विद्यायते तथोपास्तिर्मुक्तिकालेऽतिपाकतः ॥२२
संवादिभ्रमतः पुंसः प्रवृत्तस्यान्यमानतः ॥ प्रमेति चेत्तथोपास्तिर्मान्तरे कारणायतां ॥२३॥ मू-
र्तिध्यानस्य मंत्रादेरपि कारणता यदि ॥ अस्तु नाम तथाप्यत्र प्रत्यासत्तिर्विशिष्यते ॥२४॥

तथा प्रकृतेऽपि ध्येयार्थसान्निकर्षोऽन्यमानापेक्ष इति शंकते ॥२२॥ अस्तु तर्हि निर्गुणोपासनमपि निदिध्या-
सनरूपं महावाक्यजन्यापरोक्षज्ञाने कारणं भविष्यतीत्याह ॥ नन्वेवं सति मूर्तिध्यानादेरपि चित्तैकाग्र्यसं-
पादकत्वात् ॥ अपरोक्षज्ञानसाधनत्वं स्यादिति चेत्तत्रांगीकृत्य परिहरति तत्राह ॥२३॥ नहि निर्गुणोपासने को-
ऽतिशयस्तत्राह ॥ प्रत्यासत्तिः सामीप्यं ज्ञानेन प्रतीतिविशेषः प्रत्यासत्तिप्रकारमेव दर्शयति ॥२४॥ ॥

तत्त्वस्याकारतादित्यसमत्वेन प्रकाशेण तत्त्वविज्ञाने सति साधनानुपमर्दनात् ॥ लौकिकव्यवहारसाध-
नानां मनआदीनामविलापनाल्लौकिकं राज्यादि ॥ राज्यपरिपालनादिकं सम्यग्ज्ञानिना सम्यक्चरितुं
शक्यमित्यर्थः ॥ ननु तत्त्वविदः प्रपंचमिथ्यात्वज्ञानेन तत्रेच्छैव नास्ति यदि इति चेत्तर्हि स्वकर्मानुसारेणा-
वर्ततामित्याह ॥४॥ इदानीमुपासकस्य ततो वैषम्यं दर्शयति ॥५॥ तत्रोपपत्तिमाह ॥ यतः कारणात्तस्य ब्रह्मत्वं
ध्यानेनैव कृतं तत्समाप्तौ न श्रमितमतो ध्यायिना सदा ध्यानं कर्तव्यमित्यर्थः ॥ तत्र दृष्टान्तः ॥ यथा स्वस्मि-
न्ध्यानेन संपादितस्य विष्णुत्वादेः ॥ पारमार्थिकत्वं नास्ति तद्वदित्यर्थः ॥ ध्यानसंपादितस्यापि तस्य पारमार्थि-

न दृश्यं तत्त्वविज्ञाने साधनानुपमर्दनात् ॥ ज्ञानिना चरितुं शक्यं सम्यग्राज्यादि लौकिकं ॥३॥
मिथ्यात्वबुद्ध्या तत्रेच्छा नास्ति चेत्तर्हि मास्तु तत् ॥ ध्यायन्वाथ व्यवहरन्यथारब्धं वसत्वयं ॥४
उपासकस्तु सततं ध्यायन्नेव वसेदितः ॥ ध्यानेनैव कृतं तस्य ब्रह्मत्वं विष्णुतादिवत् ॥५॥ ध्या-
नोपादानकं यत्तद्ध्यानाभावे विलीयते ॥ वास्तवी ब्रह्मता नैव ज्ञानाभावे विलीयते ॥६॥ ततो-
ऽभिज्ञापकं ज्ञानं न नित्यं जनयत्यदः ॥ ज्ञापकाभावमात्रेण न हि सत्यं विलीयते ॥७॥

कत्वं किं न स्यादित्याशंक्य ॥ ध्यानसंपादितस्य वास्तवत्वाभावेऽपि ध्यानापायेऽपगमदर्शनात्तत्रैवमित्याह ॥६॥
ज्ञानेन प्रकाशितस्य ब्रह्मत्वस्य ततो वैलक्षण्यमाह ॥ हेतुगर्भितविशेषणोपेता ब्रह्मता वास्तवी ॥ ज्ञानो-
ज्ञापकज्ञानाभावे सत्यपि न विलीयते वास्तवत्वादेव ज्ञानेनैव जन्यमतत्त्वमाह ॥ ततोऽभिज्ञापकमिति ॥
यतो हेतोर्ब्रह्मत्वं नित्यं ततो ज्ञानं तस्याभिज्ञापकमवबोधकमेव न तु जनकमित्यर्थः ॥ तत्रोपपत्तिमन्व-
येकमुखेनाह ॥ अयमभिप्रायः ॥ ब्रह्मत्वं यदि ज्ञानजन्यं स्यात्तर्हि ज्ञानानाशे तस्य विलीयेत ॥ न च वि-
लीयते अतो न जन्यमित्यर्थः ॥ ननु ज्ञानिवदुपासकस्यापि ब्रह्मत्वं वास्तवमस्त्वेवेति शंकते ॥७॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

118

तत्त्वविदिति परिहरति न तद्देवमाह ॥ ननु व्यासादीनां तत्त्वविदामपि शापादिसामर्थ्यं दृश्यते इत्याशंक्य ॥ तेषां न तत्तज्ज्ञानफलमपि तु तपःफलमित्याह ॥ व्यासादेरिति ॥ ॥ ननु तर्हि तपसा बलवि-
तास्वेव निष्कं तत्तपो रहितस्य तत्त्वज्ञानमपि न स्यादेवेत्याशंक्य ॥ शापादिकारणादन्यस्य तपसः सद्भा-
नेवमित्याह ॥ नहि तेषां व्यासादीनां तत्त्वज्ञानितया शापादिकारणानेव कृतयत्नस्य तपसः सद्भा-
वतपसः सद्भावादित्याह ॥ २ ॥ ननु द्वयः शापादिसामर्थ्यरहितः तस्य विद्याभावेऽपि विदितात्मनस्तत्त्वभि-

शापानुग्रहसामर्थ्यं यस्यासौ तत्त्ववित्तमः ॥ शापानुग्रहसामर्थ्यफलं स्यात्तपसो यतः ॥
व्यासादेरपि सामर्थ्यं दृश्यते तपसो बलात् ॥ शापादिकारणादन्यत्तपो ज्ञानस्य कारणम् ॥ २ ॥
द्वयं यस्यास्ति तस्यैव सामर्थ्यज्ञानयोर्जनिः ॥ एकैकं तु तपः कुर्वन्नेकैकं लभते फलम् ॥ ३ ॥ सा-
मर्थ्यहीनो निन्द्यश्चेद्यतिभिर्विधिवर्जितैः ॥ निन्द्यन्ते यतयोऽप्यन्यैरनिशं भोगलम्पटैः ॥ ४ ॥ भिक्षाव-
स्त्रादि रक्षेयुर्यद्येते भोगतुष्टये ॥ अहो यतित्वमेतेषां वैराग्यभरमन्थरम् ॥ ५ ॥ वर्णाश्रमपरान्मू-
ढा निन्दन्त्वित्युच्यते यदि ॥ देहात्ममतयो बुद्धं निन्दन्त्याश्रममानिनः ॥ ६ ॥

नियते स्यादित्याशंक्य ॥ तेषामपि विधयन्तेऽपरैर्नियतेस्यादित्याह ॥ ७ ॥ एतेऽपि भोगपतत्वार्थं विषयास्से-
पारेषु विन्यासशंक्य ॥ नहि तेषां पतितत्वमेव हीयत्नीयतीति ॥ अभिप्रायेणोपहसति ॥ ॥ विषयलम्पटैः
पामरैः क्रियमाणाया निन्दायाः क्रियायामपराणां विशिष्टानां महानिन्दास्तीत्युच्यते चेन्नहि देहाभिमानिभिः
[illegible] विदितनिन्दा [illegible] विशिष्टानिन्दाया ॥ ॥ प्रासंगिकं परिसमाप्य प्रकृतमनुसर-

नि ५

119

न्ननु तत्त्वविनिश्चयवत्त्वाद्विद्वान् ॥ व्यासेन तस्य कर्तव्यं शनियादयतीत्याशंक्य ॥ तदपि तस्य कर्तव्याभा-
वबोधयन्नीत्याह ॥ ॥ यो हृदयेन बुद्ध्या त्यक्तसर्वास्थः सकलापविलक्षणाशयो ग्राह्यग्राहकासक्तिविशेषाशय-
स्य मत्तया चिवः ॥ मुक्त एवोत्तमाशयः ॥ उत्तम आशयोऽभिप्रायो [illegible] सः ॥ तस्मात्कर्म-
तः समाधिमथ कर्माणि कुर्वन्तु वा ॥ विरुद्धः कर्तव्येना [illegible] नास्तीत्यव [illegible] रमते रति ॥ नैष्कर्म्यं कर्मणा हि सने-
न कर्मत्यागेनाम्य ॥ समाधानं समाधिः जप्यं जपः ॥ ननु विदुषामपि वासनानिरोधाय ध्यानं कर्तव्यमि-

वर्णाश्रमादयो देहे मायया परिकल्पिताः ॥ नात्मनो बोधरूपस्येत्येवं तस्य विनिश्चयः ॥ १ ॥ समा-
धिमथ कर्माणि मा करोतु करोतु वा ॥ हृदयेनात्तसर्वास्थो मुक्त एवोत्तमाशयः ॥ २ ॥ नैष्कर्म्ये-
ण न तस्यार्थस्तस्यार्थोऽस्ति न कर्मभिः ॥ न समाधानजप्याभ्यां यस्य निर्वासनं मनः ॥ ३ ॥ आत्मासं-
गस्ततोऽन्यत्स्यादिन्द्रजालमिदं मायिकम् ॥ इत्यचञ्चलनिर्णीते कुतो मनसि वासना ॥ ४ ॥ एवं नास्ति
प्रसङ्गोऽपि कुतोऽस्यातिप्रसञ्जनम् ॥ प्रसङ्गो यस्य तस्यैव शङ्क्येतातिप्रसञ्जनम् ॥ ५ ॥ विध्यभावान्न बाल-
स्य दृश्यतेऽतिप्रसञ्जनम् ॥ स्यात्कुतोऽतिप्रसङ्गोऽस्य विध्यभावे समे सति ॥ ६ ॥ न किञ्चिद्वेत्ति बाल-
श्चेत्सर्वं वेत्त्येव तत्त्ववित् ॥ अल्पज्ञस्यैव विधयः सर्वे स्युर्नान्ययोर्द्वयोः ॥ ७ ॥

त्याशंक्य ॥ सम्यग्ज्ञानिनो वासनैव नास्तीत्याह ॥ ३ ॥ भवत्वेवं प्रकृते किमायातमित्यत आह ॥ ४ ॥ कस्यत-
र्हि अतिप्रसङ्गः स्यादित्यत आह ॥ एवं कृते दृष्टमित्यत आह ॥ ॥ दार्ष्टान्तिके योजयति ॥ बालस्य विध्यभावे प्रयोजक-
मज्ञत्वमस्ति न विदुषस्तत्त्वविदस्त्वित्याशंक्य ॥ तस्यास्तत्त्वाभावेऽपि विध्यभावप्रयोजकं सर्वज्ञत्वमस्तीत्याह ॥ ८ ॥ तर्हि वि-
धयोऽधिकारः कस्येत्याशंक्याह ॥ ननु व्यासादिवच्छापानुग्रहसामर्थ्ये यस्य स एव तत्त्ववित्तम इति शंकते ॥ ९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

सम्मात्मनीत्युक्तमर्थं विवृणोति ॥ इति वेत्स्यममात्मनीति ॥ ९७ ॥ ननु तत्त्वविदप्युपासकवदात्मानुसं
धानवशाज्जगदनुसंधानरहितो दृश्यत इत्याशंक्य ॥ सोनुसंधानाभावो ध्यानवशप्रयुक्तो न वेदनवशप्रयुक्त इत्या
ह ॥ ९८ ॥ ननु तत्त्वविदापि मुक्तिसिद्ध्ये ब्रह्मध्यानं कर्तव्यमित्याशंक्य ॥ ज्ञानादेव तु कैवल्यं प्राप्यते येन मुच्य
ते ॥ तमेव विदित्वातिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय ज्ञानादेव तु कैवल्यं सर्वपाशैर्विमुच्यते
न्मोक्षसिद्ध्ये ध्यानं कर्तव्यमित्याह ॥ ९९ ॥ तत्त्वविदो ध्यानानभ्युपगमे तत्सर्वदा बहिः प्रवृत्तिः स्यादि
त्याशंक्य ॥ इष्टापत्तिरित्याह ॥ इत्याद्यनन्तरं ... इति वेत्स्यममात्मनि ॥ ९६ ॥ निश्चि
स्य सकृदात्मानं यदापेक्षा तदैव तं ॥ वक्तुं मंतुं तदा ध्यातुं शक्नोत्यप्येव हि तत्त्ववित् ॥ ९७ ॥ उपा
सक इव ध्यायन्लौकिकं विस्मरेद्यदि ॥ विस्मरत्येव सा ध्यानाद्विस्मृतिर्न तु वेदनात् ॥ ९८ ॥ ध्याने
त्वैच्छिकमेतस्य वेदनान्मुक्तिसिद्धितः ॥ ज्ञानादेव तु कैवल्यमिति शास्त्रेषु डिंडिमः ॥ ९९ ॥ तत्त्व
विद्यदि न ध्यायेत्प्रवर्तेत तदा बहिः ॥ प्रवर्ततां सुखेनायं को बाधोस्य प्रवर्तने ॥ ९८ ॥ अतिप्रसंग
इति चेत्प्रसंगं तावदीरय ॥ प्रसंगो विधिशास्त्रं चेन्न तत्तत्त्वविदं प्रति ॥ ९९ ॥ वर्णाश्रमवयोव
स्थाभिमानो यस्य विद्यते ॥ तस्यैव च निषेधाश्च विधयः सकला अपि ॥ १०० ॥
नाशंक्याबाधकत्वात् स्यादेवेत्यभ्युपयन्नेवाह ॥ ९७ ॥ तत्त्वविदि नियमेन बहिःप्रवृत्त्यभ्युपगमे विधिप्रसंगः स्या
दित्याशंक्य प्रसंगस्वरूपं निरूपयन् तं वसिति परिहरति ॥ ९८ ॥ न प्रसंगोऽस्ति निरूपः ॥ विधिशास्त्रस्य प्रसंगस्त्वहं
विवक्षितत्वादिति चेन्नूनं स्यात्तानि विषयत्वेन तत्त्वविदि विषयत्वाभावादित्याह ॥ विधिशास्त्रस्य विषयं
दर्शयति निषेधशास्त्रस्यापि ॥ विधिशास्त्रस्य विदि विषयत्वमेव दर्शयति ॥ ९९ ॥ ननु विदोऽपि देहधारित्वे
न वर्णाश्रमाद्यभिमानित्वमस्तीत्याशंक्याह ॥ १०० ॥ ॥
विरोधाभावमेव प्रपंचयति ॥ ९८ ॥ कालिता लिखवहारस्साधनानीत्यन्वयाह ॥ ९९ ॥ नहा लापदार्थाः शृङ्
तेऽप्राद्यः नान्यन्तापीत्यन्यत्वानीनिवारयति ॥ अतोस्य ज्ञानिनो व्यवहारः कृतो नाम भवति ॥ भवते
व सर्वः ॥ न तु विषयान्मनसि देवेषिनत्वविदापि तत्र पुम्हैन्य कार्यमित्याशंक्य ॥ तद्यथा करणेन तत्त्वविदेव न
स्यादित्याह ॥ १०१ ॥ ननु तत्त्वविदाविन्नेनोपलभ्यते ॥ इत्येतत्क्रियेहमित्याशंक्याह ॥ घटतत्त्ववेदितावस्था
वृद्धिमदेव मोऽवयवेन काप्य ऊर्ध्वं स्फुरणोनदृष्टो नोपलभ्यमानः ॥ तत्र घटस्वरूपस्यैव न स्पष्टत्वात्
एवं ध्यानेक निष्ठोपि लेशाल्लौकिकमाचरेत् ॥ तत्त्ववित्त्वविरोधित्वाल्लौकिकं सम्यगाचरे
त् ॥ ९८ ॥ मायामयः प्रपंचोयमात्मा चैतन्यरूपधृक् ॥ इति बोधे विरोधः को लौकिकव्यवहा
रिणः ॥ ९९ ॥ अपेक्षते व्यवहृतिर्न प्रपंचस्य वस्तुतां ॥ नाप्यात्मजाड्यं किंत्वेषा साधनान्यवेक्षते ॥
मनो वाक्कायतद्बाह्यपदार्थाः साधनानि तान् ॥ तत्त्ववित्रोपमृद्नाति व्यवहारो
स्य नो कुतः ॥ १०१ ॥ उपमृद्नाति चित्तं चेद्ध्यातासौ न तु तत्त्ववित् ॥ न बुद्धिं मर्दयन् दृष्टो घटतत्त्व
विदां वरः ॥ १०२ ॥ सकृत्प्रत्ययमात्रेण घटश्चेद्भासते तदा ॥ स्वप्रकाशोयमात्मा किं घटवच्च न
भासते ॥ १०३ ॥ स्वप्रकाशतया किं ते तद्बुद्धिस्तत्त्ववेदनं ॥ बुद्धिश्च क्षणनाश्येति चोद्यं तुल्यं घटादिषु ॥
तद्दर्शने विज्ञप्तिर्दूरे नापेक्ष्यते ॥ व्यवहाराय तथा चात्र ॥ तद्ज्ञानेनतदपेक्षत इत्याशंक्याह तत्स्वप्रकाश
त्वेन घटादिस्थिते स्फुटत्वाच्चिन्मनिरोधनेन वापेक्षत इत्याह ॥ १०३ ॥ ननु घटस्य स्वप्रकाशत्वे पितज्ज्ञोप
दृष्टान्तोक्तेषु तत्त्वनाशत्वात्मसाध्यताणिकेन तत्त्वबुद्धिः पुनः पुनरवस्थानमपेक्षत इत्याशंक्य
देवायं घटादिष्वपि समानमित्याह ॥ १०४ ॥ वेदादिज्ञानस्य सात्त्विकत्वेपि सकृज्जिज्ञासितस्य चेदस्य सर्वदा
व्यवहर्तुं शक्यत्वात् ॥ तत्त्वविज्ञस्यैर्यमेपेक्षेत्तमप्ययोगकमित्याशंक्य तेरमात्मन्यपि समानमित्याह ॥ तट

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

उपास्तिः शुद्धस्योपासकस्येच्छया कर्तुमकर्तुमन्यथा वा कर्तुं शक्या ॥ अतः शुद्धस्येच्छा
धीनत्वादुपासने स्वैराज्यमित्यर्थः ॥ एवं सदा चिंतने किं भवतीत्याह ॥ ९६ ॥ अप्रमत्तो वेदाध्यायी सदाध्यय
नशीलः ॥ जपिता सदा जपशीलो वा वासितः ॥ दृढवासनया स्वप्नादि स्वप्नेप्यध्ययनं जपं वा करोति ॥ एव
मुपासकोपि वासनादार्ढ्यात्स्वप्नादावपि ध्यायेदित्यर्थः ॥ स्वप्नादावपि ध्यानानुवर्तने कारणमाह ॥
वासनावेशात्संस्कारपाटवात्भावनां ध्याते ॥ ननु प्रारब्धकर्मवशाद्विषयाननुभवतः कथं नैरंतर्येण
भावनासिद्धिरित्याशंक्य ॥ आस्थातिशयेन सति विषयव्यसनिवद्भावनासिद्धिः स्यादित्याह ॥ ९८ ॥ दृष्टांतं वि

शुद्धस्येच्छया कर्तुमकर्तुं कर्तुमन्यथा ॥ शक्योपास्तिस्ततो नित्यं कुर्यात्प्रत्ययसंततिं ॥ ९५ ॥ वेदाध्या
य्यप्रमत्तोधीते स्वप्नेपि वासितः ॥ जपिता तु जपत्येव तथा ध्याताऽपि वासयेत् ॥ ९६ ॥ विरोधिप्रत्ययं
मुक्त्वा नैरंतर्येण भावयन् ॥ लभते वासनावेशात्स्वप्नादावपि भावनां ॥ ९७ ॥ भुंजानोपि निजारब्ध
मास्थातिशयतोनिशं ॥ ध्यातुं शक्तो न संदेहो विषयव्यसनी यथा ॥ ९८ ॥ परव्यसनिनी नारी व्य
ग्रापि गृहकर्मणि ॥ तदेवास्वादयत्यंतः परसंगरसायनं ॥ ९९ ॥ परसंगं स्वादयंत्या अपि नो गृहकर्म
तत् ॥ कुंठीभवेदपि त्वेतदापातेनैव वर्तते ॥ १०० ॥ गृहकृत्यव्यसनिनी यथा सम्यक्करोति तत् ॥ प
रव्यसनिनी तद्वन्न करोत्येव सर्वथा ॥ १०१ ॥

वृणोति ॥ ९९ ॥ परसं
गास्वादने गृहकृत्यविच्छेदः स्या
दित्याशंक्याह ॥ १०० ॥ आपातेनैव वर्तनं शक्त्यनुरूपकर्मवै विहरणोति ॥ १०१ ॥ दार्ष्टांतिके योजयति ॥ १०२
ननु तत्त्वविदपि लौकिकव्यवहारं किं लेशेनाचरति किंवा सम्यगिति ॥ विषयव्यवहारस्य तत्त्व
ज्ञानाविरोधित्वात्सम्यगेवाचरतीत्याह ॥ एवं विकल्पमेव दर्शयति ॥ १०२ ॥ ॥

विचारादुत्पन्नतत्त्वविचारतो बोधो जायते ॥ किंच ॥ विचारादुत्पन्नो यस्मात्तं यं बोधमनिच्छा बोधो मामभू
दित्येवंरूपा न निवर्तयेत ॥ उत्पद्यमानस्तु बोधः स्वजन्ममात्रात्संसारे अखिलसत्यप्रपंचस्य सत्यतां दहति
नाशयति ॥ तावता तत्त्वज्ञानेनापि नित्यतृप्तिमनुप्राप्येत्यर्थः ॥ उपासनायास्तु बोधापादे
लाभान्तरमस्तीत्येतद्दर्शयति ॥ १०६ ॥ प्राप्तस्य गुरोरुपदेशमुपास्य ब्रह्मप्रतिपादकवाक्यादिजाते
विश्वस्य विश्वासं कृत्वा विचारयन्नुपास्यतत्त्वप्रत्ययैरन्यैर्विजातीयप्रत्ययैरनंतरितैः अंतररहितैः
वृत्तिभिः ॥ चिंतयेदिति ॥ कियंतं कालं चिंतयेदित्याशंक्याह ॥ १०७ ॥ उपासकस्य तद्रूपत्वाभिमान

विचाराज्जायते बोधोऽनिच्छा यं न निवर्तयेत् ॥ स्वोत्पत्तिमात्रात्संसारे दहत्यखिलसत्यतां ॥ १०५ ॥
तावता कृतकृत्यः सन्नित्यतृप्तिमुपागतः ॥ जीवन्मुक्तिमनुप्राप्य प्रारब्धक्षयमीक्षते ॥ १०६ ॥
आप्तोपदेशं विश्वस्य श्रद्धालुरविचारयन् ॥ चिंतयेत्प्रत्ययैरन्यैरनंतरितवृत्तिभिः ॥ १०७ ॥
यावच्चिंत्यस्वरूपत्वाभिमानः स्वस्य जायते ॥ तावद्विचिंत्य पश्चाच्च तथैवामृति धारयेत् ॥ १०८ ॥
ब्रह्मचारी भिक्षमाणो युतः संवर्गविद्यया ॥ संवर्गरूपतां चित्ते धारयित्वा ह्यभिक्षत ॥ १०९ ॥

मुदाहरणप्रदर्शनेन स्पष्टीकरोति ॥ ब्रह्मचारीति ॥ १०८ ॥ कश्चित्संवर्गविद्यागुणविशिष्टप्राणोपा
सको ब्रह्मचारी भिक्षाहरणार्थमागत्याभिप्रतारिनाम्नो राज्ञः पुरतो महात्मनश्चतुरो देवप
ककः सो जगार भुवनस्य गोपा तं कायेनाभिपश्यंति मर्त्या अभिप्रतारिन्बहुधा वसंतमिति मं
त्रेण स्वात्मनः संवर्गरूपत्वं चित्ते धृतं प्रकटीकृतवानिति छांदोग्ये पठ्यत इत्यर्थः ॥ आमृति धारण
दर्शयन्ननिच्छा यं न निवर्तयेदिति वाक्योपपत्तिं हेतुलक्षणमाह ॥ १०९ ॥ ॥

१२२

१२३

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु निर्गुणब्रह्मविद्यायां न गुणोपसंहारः प्रयुज्यते निर्गुणविद्यायां विधेयादिगुणाभावात् ... सूत्रकारेणैव समभिहितस्योपसंहारस्याभिधेयमानतान्नास्माभिरत्र ... इमामाह ५९ हिरण्यश्मश्रुत्वादिगुणविशिष्टमूर्तौ नामन्तर्यामिधानादिदेहनिर्गुणोपासनमेवेति चेन्नहि निर्विशेषस्तथाह हिरण्येति ६० हिरण्यश्मश्रुसूर्यादिमूर्तौ नो हिरण्मयात्मिश्रुतिर्यस्यासौ हिरण्यश्मश्रुः तथाविधः सूर्यो हिरण्यश्मश्रुः सूर्यः स आदिर्येषां ते हिरण्यश्मश्रुः सूर्यादयः तेषां मूर्तयो हिरण्यश्मश्रुसूर्यादिमूर्तयस्तासामि।

अस्थूलादेर्निषेध्यस्य गुणस्य च समस्य संहृतिः तथा व्यासेन सूत्रेऽस्मिन्नक्षरधियां त्विति ६१ निर्गुणब्रह्मतत्त्वस्य विद्यायां गुणसंहृतिः न प्रसज्येत सा ... समानत ६२ हिरण्यश्मश्रुसूर्यादिमूर्तौ नामसु ... अविरुद्धं निर्गुणत्वमिति चेत्तथा ... ६३ गुणानां लक्षकत्वेन न तत्त्वेऽन्तःप्रवेशनं इति चेदस्त्वेवमेव ब्रह्मतत्त्वमुपास्यतां ६४ आनन्दादिभिरस्थूलादिभिश्चात्मात्र लक्षितः अखण्डैकरसः सोऽहमस्मीत्येवमुपासते ६५ बोधोपास्त्योर्विशेषः क इति चेदुच्यते शृणु वस्तुतन्त्रो भवेद्बोधः कर्तृतन्त्रमुपासनं ६६

... नन्वानन्दादीनामस्थूलादीनां च गुणानामुपासनेनैतः प्रवेशाभावान्न गुणविशिष्टेन कथमुपास्यतामि। त्याशङ्क्य तेषां लक्षणत्वेनाप्रवेशमङ्गीकृत्य कथं सम्भवानन्तेनोक्तितत्त्वमुपास्यमित्याह तथोपासनप्रकारमेव दर्शयति ६५ अत्रानन्दादिभिरस्थूलादिभिश्चात्मा लक्षितः सोऽहमस्मीत्येवमुपासते तेनात्र ब्रह्मत्वमुपास्यमित्युक्तं तत्र बोधोपासनयोः कुतो भेद इत्याशङ्क्य वस्तुतन्त्रकर्तृतन्त्रत्वाभ्यां भेदमित्याह ६६ वैलक्षण्यमनयोः सिद्धं बोधस्य हेतोस्तं दर्शयति विचारजायत इत्यादिना सो

प्ययमभिप्रायः यथा सगुणोपासनेभ्यः कालान्तरभाविफलेभ्यो वस्त्वैकान्तिकाविरसेभ्य ॥ पेहिकफ। लप्रदत्वेनातिशयवद्भ्यो मूढानां तत्संज्ञजपादौ प्रवृत्ताविवेकिभिः सगुणोपासनं न परित्यज्य ते ॥ यथा वा स्वयमनुष्ठानापेक्षेभ्यस्तेभ्योऽपि मन्त्रजपेभ्यः कृष्यादावतिशयं नियमेनेष्टफलं मत्वा मूढत रास्तत्र प्रवृत्ता अपीति न तत्संज्ञानुष्ठानं त्यज्यते ॥ तथा संसारिकफलेभ्यस्तेनिर्गुणोपासनानुष्ठाना भावेऽपि न सगुणत्वाश्रिनिर्गुणोपासनं त्यज्यते इति ॥ एवं प्रासंगिकं परिसमाप्य प्रकृतमनुसरति ॥ ५५ ॥ सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषादित्यधिकरणन्यायेन निर्गुणोपासनस्यैकत्वात्सर्वशाखास्थगुणानामुपास

अतोऽतिशयं मत्वा मन्त्रजपादिकारिणः ॥ मूढाः जपन्तु तेभ्योऽतिमूढाः कृषिमुपासतां ॥ ५६
तिष्ठन्तु मूढाः प्रकृता निर्गुणोपास्तिरीर्यते ॥ विवेकात्सर्वशाखास्थान्गुणानत्रोपसंहरेत् ॥ ५७
आनन्दादेर्विधेयस्य गुणसङ्घस्य संहृतिः ॥ आनन्दादय इत्यस्मिन्सूत्रे व्यासेन वर्णिता ॥ ५८ ॥

गुणानेकत्रोपसंहृत्योपासनं कर्तव्यमित्याह ॥ ते च गुणाः द्विप्रकाराः विधेया निषेध्याश्चेति तत्रा ... ब्रह्म विज्ञानमानन्दं ब्रह्म ॥ नित्यः शुद्धो बुद्धः सत्यो मुक्तो निरञ्जनो विभुरद्वयआनन्दः परः प्रत्यगेकरस इत्यादयो विधेयगुणास्तेषां उपसंहार आनन्दादयः प्रधानस्येत्यस्मिन्नधिकरणे ऽभिहित इत्याह ॥ ५७ ॥ यद्वा अस्थूलमनण्वह्रस्वमदीर्घं यत्तदद्रेश्यमग्राह्यमशब्दमस्पर्शमरूपमव्ययमित्यादयो निषेध्यगुणास्तत्रत्यत्वेन तेषामुपसंहारो ऽक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदवत् तदुक्तमित्यस्मिन्नधिकरणेऽभिहित इत्याह ॥ ५८ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

124

125

ननु निर्गुणोपासने प्रमाणाभावाल्लीत्याशङ्क्यानेकासु श्रुतिषूपलभ्यमानत्वान्नैवमित्याह ॥ मानाभावे-
ति ॥ बहुश्रुतिषु दर्शनादित्युक्तमर्थं विवृणोति ॥ ९१ ॥ तापनीयोपनिषदि तावदेवमाह देवप्रजापतिमब्रुव-
न् ॥ अणोरणीयांसमिममात्मानमोंकारं नो ॥ ब्रूहीत्यादिप्रश्ने निर्गुणोपासनमभिधीयते ॥ सो-
ऽयं प्रश्नोपनिषदि पञ्चमप्रश्ने यः पुनरेतं त्रिमात्रेणोमित्यनेनैवाक्षरेण परं पुरुषमभिध्यायतीति का-
ठके कठवल्ल्यां सर्वे वेदा यत्पदमामनन्तीत्यारभ्य एतदालम्बनं श्रेष्ठमित्यादिना प्रणवो-
पासनमित्युच्यते ॥ माण्डूक्योपनिषद्योमित्येतदक्षरमिदं सर्वमित्यादिना स्थाने यातान्तर्योपासनमेव ॥

कातेऽभक्तिरुपास्तौ चेदस्तीत्येतदीरय ॥ मानाभावो न वाच्योऽसौ बहुश्रुतिषु दर्शनात् ॥ ९२ ॥
उत्तरस्मिंस्तापनीये शैब्यप्रश्नेऽथ काठके ॥ माण्डूक्यादौ च सर्वत्र निर्गुणोपास्तिरीरिता ॥ ९३ ॥ अ-
नुष्ठानप्रकारोऽस्याः पञ्चीकरण ईरितः ॥ ज्ञानसाधनमेतच्चेन्नेति केनात्र वारितम् ॥ ९४ ॥ नानुतिष्ठति
कोऽप्येतदिति चेन्नानुतिष्ठतु ॥ पुरुषस्यापराधेन किमुपास्तिः प्रदुष्यति ॥ ९५ ॥

विपरीतमित्यर्थः ॥ आहिरिह हेतोरनैतन्निरोधकेऽङ्कारस्योपरूढेन ॥ ननु निर्गुणोपासनं कथमनुष्ठेयमित्याह
९३ ॥ ननु तदुपासनं ज्ञानसाधनमेव न मुक्तिसाधनमित्याशङ्क्य ॥ अस्तु नाम तदुपास्यापि मुच्यत इति वस्तुना-
मस्माकमनुकूलमित्याह ॥ ननु सगुणोपासनमेव सर्वैरनुष्ठीयते न निर्गुणोपासनमित्याशङ्क्य ॥ तस्य-
प्रमाणसिद्धस्यानुष्ठानाभावेनाप्रामाण्यं न भवतीत्याह ॥ ९४ ॥ प्रमाणसिद्धस्यानुष्ठाना-
भावेनाप्रामाण्यं न दृष्टमित्याह ॥ ९५ ॥ ॥

ननु ब्रह्मवाक्यजन्यमनोगोचरमित्येतत्तदनुशक्यमित्याशङ्क्य ॥ एवमेवोपासितमपि शक्यमित्याह ॥ ५८
ब्रह्मण उपास्यत्वे सगुणत्वप्रसङ्ग इत्याशङ्क्य ॥ वेद्यत्वेऽपि तत्सगुणत्वं स्यादित्याह ॥ तत्सगुणत्वमित्यर्थः
ननु लक्षणया ब्रह्म वेद्यं न तु वेद्यत्वेन सगुणत्वप्रसङ्ग इत्याशङ्क्योपासनमपि तथैव क्रियतामित्याह ॥ ननु ब्र-
ह्मण उपास्यत्वे श्रुत्या निषिद्धत्वमित्याशङ्क्य ते ॥ यन्मनसा न मनुते येनाहुर्मनो मतम् ॥ तदेव ब्रह्म त्वं विद्धि ने-
दं यदिदमुपासत इति श्रुतिरुपास्यत्वं ब्रह्मणो निषेधतीत्यर्थः ॥ वेद्यत्वमपि निषिद्धमित्याह तदेव ब्रह्म त्वं विद्धीदम-
ित्युपासते तदुपास्यं न ब्रह्म त्वं विद्धीति योजना ॥ उपास्यत्ववद्वेद्यत्वस्यापि तन्निषेधः समान इत्याह ॥ ५५ ॥ अव-

अवाङ्मनसगम्यं तन्नोपास्यमिति चेत्तदा ॥ अवाङ्मनसगम्यस्य वेदनं च न संभवेत् ॥ ५८ ॥ वागाद्य-
गोचराकारमित्येवं यदि वेत्त्यसौ ॥ वागाद्यगोचराकारमित्युपासीत नो कुतः ॥ ५० ॥ सगुणत्व-
मुपास्यत्वाद्यदि वेद्यत्वतोऽपि तत् ॥ वेद्यं चेल्लक्षणावृत्त्या लक्षितं समुपास्यताम् ॥ ५८ ॥ ब्रह्म विद्धि त-
देव त्वं न त्विदं यदुपासते ॥ इति श्रुतेरुपास्यत्वं निषिद्धं ब्रह्मणो यदि ॥ ५९ ॥ विदितादन्यदेवेति
श्रुतेर्वेद्यत्वमस्य न ॥ यथा श्रुत्यैव वेद्यत्वं तथा श्रुत्याप्युपास्यता ॥ ९० ॥ अवास्तवी वेद्यता चेदु-
पास्यत्वं तथा न किम् ॥ वृत्तिव्याप्तिर्वेद्यता चेदुपास्यत्वेऽपि तत्समम् ॥ ९१ ॥ ॥

देवतान्हि विदितादथो अविदितादधीतिब्रह्मणो वेद्यत्वमपि निवारयतीत्यर्थः ॥ विदिताज्ज्ञातादित्यर्थः
विदिताविदिताभ्यामन्यद्ब्रह्मेति श्रुतिः प्रतिपादयतीति चेन्नर्हि तथैव तज्ज्ञानीयादित्याशङ्क्योपास-
नेऽप्येतत्समानमित्याह ॥ ननु वेद्यत्वं ब्रह्मणोऽवास्तवं न भवतीत्याशङ्क्योपास्यत्वमपि तथेत्याह ॥ ९
ननु वेदनपक्षे ब्रह्माकारत्वमस्ति नोपासने इत्याशङ्क्याशाब्दवलान्नदाकारत्वमुभयत्र समान-
मित्याह ॥ युक्तिः स्यादुपालम्भ... नाप्युपास्यत्वेऽपि समानमित्याह ॥ ९२ ॥ राम ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेदांतविज्ञानसुनिश्चितार्थाः संन्यासयोगाद्यतयः शुद्धसत्त्वाः ते ब्रह्मलोके तु परांतकाले परामृ-
तात्परिमुच्यंति सर्वे ॥ इत्यादिश्रुतेर्ब्रह्मलोकप्राप्त्यनंतरं तत्साक्षात्कृतब्रह्मणा सह मुक्तिर्भ-
विष्यतीत्यर्थः ॥ एवं च न विचारः क्रियमाणोऽप्रतिबंधवशात्साक्षात्कारं न जनयति तत्राभिप्रायांतरेण ब्र-
पापि नात्र सोऽपि विचारेऽलभ्य इत्याह ॥५१॥ तत्र प्रमाणमाह ॥ यः परमात्मा बहुभिः पुरुषैः श्रव-
णायापि श्रोतुमपि न लभ्यते लभ्य इत्यर्थः ॥ एतावता सति प्रतिबंधे न तत्साक्षात्कारः ॥ तस्माद्यतनम्॥

वेदांतविज्ञानसुनिश्चितार्था इति श्रावणतः ॥ ब्रह्मलोके स कल्पांते ब्रह्मणा सह मुच्यते ॥५२
ब्रह्मणा सह ते सर्वे संप्राप्ते प्रतिसंचरे ॥ परस्यांते कृतात्मानः प्रविशंति परं पदं ॥५३॥ केषांचि-
न्नहि विचारोऽपि कर्मणा प्रतिबध्यते ॥ श्रवणायापि बहुभिर्यो न लभ्य इति श्रुतिः ॥ अत्यंतबुद्धि-
मांद्याद्वा सामग्र्या वाप्यसंभवात् ॥ यो विचारं न लभते ब्रह्मोपासीत सोऽनिशं ॥५४॥ निर्गुण-
ब्रह्मतत्त्वस्य न ह्युपास्तेरसंभवः ॥ सगुणब्रह्मणीवात्र प्रत्ययावृत्तिसंभवात् ॥५५॥

नो विचारस्य न संभवतीत्यभिप्रायेणानीविचारासमर्थं न पुरुषार्थाय नाकिं कर्तव्यमित्यपेक्षा-
यां विचारेणासमर्थोऽपि न कुर्वीतोपासनमेवेति नियमाकुर्यात् तात्तेन तदुपपादयति ॥५५॥ नामगत्र सं-
भवो नाम तदुपदेष्टुर्गुरोरात्मनः सापेक्षस्य देशकालादेर्वा संभवः तस्मादित्यर्थः ॥ न च निर्गुणब्रह्म-
तत्त्वस्य गुणरहितत्वात्तदुपासनं न घटत इत्याशंक्योपासनस्य प्रत्ययावृत्तिरूपत्वात्तस्य सगुणब्रह्मणी-
व निर्गुणेऽपि तत्संभवतीत्याह ॥५६॥ ननु निर्गुणस्य ब्रह्मणो वाङ्मनसयोरगोचरत्वात्तदुपासनमि-

निःस्पृहः स्वयमतिविरक्तः श्रद्धालुस्तत्त्वविचारादेव धीमतामात्मतत्त्वविनिश्चयविचारवतां योगि-
नां विशेषेण कामश्च ब्रह्मलोके कुले भवति जायत इत्यर्थः ॥ इदं स्मात्संगाकौ तिरायत इत्यतत्राह ॥ दिव्यस्मा-
त्कारणान् योगिकुले जन्म दुर्लभमत्यंतपुण्येनाऽलभ्यमित्यर्थः ॥ तस्य दुर्लभत्वमुपपादयति ॥५८॥
दिव्यस्मात्कारणात् तत्र तस्मिन् जन्मनि पौर्वदेहिके पूर्वदेहे भवं तं ॥ बुद्धिसंयोगं तत्त्वविचारयो-
ग्यबुद्धिसंबंधं योगी लभते प्राप्नोति ॥ न केवलं बुद्धिसंबंधमात्रलाभः ॥ किंतु ततः पूर्वस्मादपि

अथवा योगिनामेव कुले भवति धीमतां ॥ निःस्पृहो ब्रह्मतत्त्वस्य विचारात्तद्धि दुर्लभं ॥५८॥
तत्र तं बुद्धिसंयोगं लभते पौर्वदेहिकं ॥ यतते च ततो भूयस्तस्मादेतद्धि दुर्लभं ॥५९॥ पूर्वाभ्या-
सेन तेनैव ह्रियते ह्यवशोऽपि सः ॥ अनेकजन्मसंसिद्धस्ततो याति परां गतिं ॥६०॥ ब्रह्मलो-
काभिवांछायां सम्यक्सत्यां निरुध्य तां ॥ विचारयेद्य आत्मानं न तु साक्षात्करोत्ययं ॥६१॥

त्वा बुद्धियोगं यतते चाधिकं प्रयत्नं करोति ॥ तस्मादेतज्जन्म दुर्लभमित्यर्थः ॥ भूयोऽभ्यासे कारणमाह ॥५९॥
स योगभ्रष्टः तेन पूर्वाभ्यासेनैवावशोऽप्यस्वाधीनोऽपि ह्रियते आकृष्यते ॥ एवमनेकपुनर्जन्मसुकृ-
तेन प्रयत्नेन संसिद्धः तत्त्वज्ञानसंपन्नः ॥ ततस्तस्मात्तत्त्वज्ञानात्परां गतिं मुक्तिं याति प्राप्नोतीत्यर्थः ॥
प्राणामिप्रतिबंधानाह दर्शयति ॥६०॥ ब्रह्मलोकपर्यंताभिवांछायां सत्यां सम्यक् तां निरुध्य य आत्मा-
नं विचारयेत्तस्य साक्षात्कारो न जायत इत्यर्थः ॥ ननु तर्हि तस्य कदापि मुक्तिर्न स्यादित्याशंक्याह

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

130

शमादयः शांतोदांतउपरतिस्तुः समाहितो भूत्वेति श्रुत्युक्ताः शमादयः श्रवणादयेश्रुतनयोसंतयो।
निदिध्यासितव्य इति श्रुत्या विहितैः एतैः साधनैः तत्तत्वज्ञानस्य प्रतिबंधस्य निवर्तनेन उत्पत्तियोग्ये
स्मिन्प्रतिबंधे तत्त्वे नीते सति विनाशिते सति अतः प्रतिबंधापगमादेव तत्त्वस्य प्रत्यगात्मनोज्ञानत्वे
आमातीत्यर्थः ॥ इदानीं भाविप्रतिबंधं दर्शयति आगामिप्रतिबंधो यजन्मांतरहेतुः प्रारब्धशेषइत्यर्थः।
तस्य च भोगसमर्थेन निहत्यभावान्निहन्त्रौ कालनियमो नास्तीत्याह ॥ स च एकेन जन्मना द्वाभ्यां वा
भरतस्येति शेषः ॥ भरतस्य त्रिजन्मभिः क्षीणश्च अनुश्रूयते ॥ न केवलं जन्मनात्रिजन्मभिरिति नियत

आगामिबंधः श्रवणाद्येष्वनवरतकृतैश्चोदितैः स्यैवं ॥ नीतेस्मिन्प्रतिबंधेनः स्वस्वरूपज्ञानमस्युत ॥४४॥
आगामिप्रतिबंधश्च वामदेवे समीरितः ॥ एकेन जन्मना क्षीणो भरतस्य त्रिजन्मभिः ॥४५॥
योगभ्रष्टस्य गीतायामतीते बहुजन्मनि ॥ प्रतिबंधक्षयः प्रोक्तो न विचारोऽप्यनर्थकः ॥४६॥
प्राप्य पुण्यकृतां लोकानात्मतत्त्वविचारतः ॥ शुचीनां श्रीमतां गेहे साभिलाषोऽभिजायते ॥४७॥

कालांतरे भवत्येवोचितरत्यागेकाह ॥४॥ योगभ्रष्टस्य तत्र सालोक्यं प्राप्य पुनर्विचारे विहितस्यार्थः तर्हि
मननविचारेण निष्फलः स्यादित्याशंक्याह ॥ प्रतिबंधनिवृत्तेस्तत्र संवादेन तज्ज्ञानफलसंभ
वादिति भावः ॥ गीतायां प्रतिपादितमर्थं दर्शयति ॥ प्राप्य पुण्यकृतां लोकानित्यादिना तनोत्यपि
परां गतिमित्यंतेन ॥४८॥ योगभ्रष्टस्यात्मतत्त्वविचारबलादेव पुण्यकृतां पुण्यकारिणां लोका
स्वर्गविशेषास्तान्प्राप्य तत्र बहुकालं सुखमनुभूय तद्भोगावसाने साभिलाषः स्वर्गादस्मिँल्लोके प
वित्राणां सदाचाराणां श्रीमतां कुले अभिजायते ॥ एतावत्प्रमाह ॥४९॥ ॥

131

अयमर्थः कश्चिद्यतिः पूर्वं गार्हस्थ्ये कस्यांचिन्महिष्यां स्नेहं कृत्वा पश्चात्संन्यासेनानंत
श्रवणे प्रवृत्तोपि तेनैव स्नेहेन जनितानुवृत्तिबंधात्तेन गुरूपदिष्टमपि न ज्ञातवानिति वेदविद्या।
गाथा लोके प्रसिद्धेत्यनेनानुवादाः प्राक्पूर्वक्तेनेत्यर्थः ॥ तर्हि तस्य विषयसनत्वक्षये ज्ञानोत्पत्तिः कथमत।
आह ॥४९॥ गुरुस्तस्यानुवोपदिष्टा ॥ तदीयं महिषीस्नेहमनुसृत्य तस्या एव महिष्यास्तत्वं तस्या।
हिष्यप्यापिकं ब्रह्मज्ञानं बोधितवान् ॥ ततः सोपि महिषीलक्षणस्नेहप्रतिबंधकापगमेन गुरूपदिष्टं

अतीतेनापि महिषीस्नेहेन प्रतिबंधतः ॥ भिक्षुस्तत्त्वं न वेदेति गाथा लोके प्रगी।
यते ॥५०॥ अनुसृत्य गुरुः स्नेहं महिष्यां तत्त्वमुक्तवान् ॥ ततो यथावद्वेदैष प्रतिबं।
धस्य संक्षयात् ॥५१॥ प्रतिबंधो वर्तमानो विषयासक्तिलक्षणः ॥ प्रज्ञामांद्यं कुत।
र्कश्च विपर्ययदुराग्रहः ॥५२॥ ॥

तत्रैव यथावद्बालोक्तप्रकारेणैव ज्ञातवानित्यर्थः ॥ एवमतीतप्रतिबंधं प्रदर्श्य वर्तमानं दर्श।
यति ॥५२॥ वर्तमानप्रतिबंधः ॥ चित्तस्य विषयासक्तिरूप एकः प्रज्ञामांद्यं बुद्धेः तैक्ष्ण्याभावः कु।
तर्कश्च शास्त्रसिद्धतार्किकत्वेन श्रुत्यर्थस्यान्यथोहनं ॥ विपर्ययदुराग्रहः ॥ विपर्यये आत्मनः कर्तृत्वा
दिधर्मयुक्तत्वज्ञाने दृढदुराग्रहो युक्तिरहितोऽभिनिवेशः ॥ एतेषामन्यतमस्यापि सत्त्वे ज्ञानं नो
देतीत्यर्थः ॥ अस्यापि प्रतिबंधस्य केन निवृत्तिरित्यत आह ॥५३॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इह जन्मनि श्रवणादिकं न जन्मान्तरेऽपरोक्षज्ञानं भवतीत्यत्रापि गर्भे नु सन्नन्वेषामवेदमहं देवानां
जनिमानि विश्वेत्यादिका श्रुतिरर्थतः पठति ॥ ३४ ॥ इह जन्मन्यसन्निहितेऽपि जन्मान्तरसंस्कारानुरोधेन दृष्टा
न्तमाह ॥ दृष्टान्तं विवृणोति ॥ ३५ ॥ आदिशब्देन परिगृहीतानि निदर्शनान्तराणि आह ॥ दार्ष्टान्तिके योजयति
॥ ३६ ॥ बहुवारं विचारितेऽपि तत्त्वे प्रतिबन्धबलात् साक्षात्कारो न जायते इत्येतद्दार्ष्टान्तिककार्यं विलि
ख्यापि तन्निमित्तमाह ॥ ३७ ॥ तामेव वार्त्तिकाशुदाहरति ॥ कृततत्त्वज्ञानमित्यादिना भूतप्रतिबन्धमाह

इह वामुत्र वा विद्येत्येवं सूत्रकृतोदिते ॥ शृण्वन्तोऽप्यत्र बहवो यन्न विद्युरिति श्रुतिः ॥ ३४ ॥ गर्भ
एव शयानः सन् वामदेवोऽवबुद्धवान् ॥ पूर्वाभ्यस्तविचारेण यद्वदध्ययनादिषु ॥ ३५ ॥ बहुवार
मधीतेऽपि तदा नायाति चेत्पुनः ॥ दिनान्तरेऽनधीत्यैव पूर्वाधीतं स्मरेन्नरः ॥ ३६ ॥ कालेन परि
पच्यन्ते कृषिगर्भादयो यथा ॥ तद्वदात्मविचारोऽपि शनैः कालेन पच्यते ॥ ३७ ॥ पुनः पुनर्विचा
रेऽपि त्रिविधप्रतिबन्धतः ॥ न वेत्ति तत्त्वमित्येतद्वार्त्तिके सम्यगीरितं ॥ ३८ ॥ कृततत्त्वज्ञानमिति वे
न हि वेत्ति परं तत्त्वं स्यात् ॥ यस्माद्वापि च भूतो वा भावी वा वर्तते यतः ॥ ३९ ॥ अधीतवेदवेदार्थोऽ
प्यत एव न मुच्यते ॥ हिरण्यनिधिदृष्टान्तादिदमेव हि दर्शितं ॥ ४० ॥

त्वेतेन ॥ न तु तावत्सर्वं मन्त्रं ब्रह्मज्ञानं स्पष्टं न भवतीत्यत्र कारणं स्फुटयति ॥ उक्तमाह ॥ ३८ ॥ बन्धः प्रति
बन्धं तेन वक्तव्यमित्यर्थः ॥ सोऽपि प्रतिबन्धो भूतो भावी वर्तमान इति त्रिविध इत्याह ॥ भवत्येवं त्रिवि
ध प्रतिबन्धकत्वादित्यर्थः ॥ सति प्रतिबन्धे ज्ञानेनो
पः प्रतिबन्धफलतः किमित्यत आह ॥ ३९ ॥ अत एव प्रतिबन्धसद्भावादेवेत्यर्थः ॥ सति प्रतिबन्धे ज्ञानेनो
देतीत्येतदर्थमाह हिरण्यनिधिनिहितमलेनाः श्रुतिस्मरन्ती ... प्रदर्शितमित्याह ॥ ननु तौ

ननु ब्रह्मोपासनवद्ब्रह्मसाक्षात्कारस्याप्युपदेशमात्रादेव सिद्धेः किं नस्यादित्याशंक्याह ॥ २९ ॥ आप्तोप
देशमात्रेणोपासनानुष्ठानं योगिनो ब्रह्मज्ञानं संपद्यते ॥ परोक्षज्ञानं तु विचारमन्तरेण न जायते इत्य
क्तेन तत्कारणमाह ॥ परोक्षज्ञानमिति ॥ ३० ॥ यत अविचार एव परोक्षज्ञानं प्रतिबध्नाति नाविचारोऽतः
त्रिधा ॥ सकृदुपदेशादेव परोक्षज्ञानमिति संपद्यते ॥ अविचारप्रतिबद्धस्यापरोक्षज्ञानस्य तु विचारादृ
ते न त्रिवृत्तिर्न तेन प्रत्यगात्मनिर्णयः संभवति ॥ अतो विचारः कर्तव्य इति भावः ॥ ननु विचारे कृतेऽपि यदापरो

वेदवाक्यानि निर्णीतुमिच्छन्मीमांसतां जनः ॥ आप्तोपदेशमात्रेणाप्यनुष्ठानं हि संभवेत् ॥ २९ ॥
ब्रह्मसाक्षात्कृतिस्त्वेवं विचारेण विना नृणां ॥ आप्तोपदेशमात्रेण न संभवति कुत्रचित् ॥ ३० ॥
परोक्षज्ञानमश्रद्धा प्रतिबध्नाति नेतरत् ॥ अविचारोऽपरोक्षस्य ज्ञानस्य प्रतिबन्धकः ॥ ३१ ॥ वि
चार्याप्यापरोक्ष्येण ब्रह्मात्मानं न वेत्ति चेत् ॥ आपरोक्ष्यावसानत्वाद्भूयो भूयो विचारयेत् ॥ ३२ ॥
विचारयन्नामरणं नैवात्मानं लभेत चेत् ॥ जन्मान्तरे लभेतैव प्रतिबन्धक्षये सति ॥ ३३ ॥

क्षज्ञानं न जायते तदा किं कर्तव्यमित्यत आह ॥ ३२ ॥ ननु पदार्थौ सम्यग्विचार्यापि वाक्यार्थं ब्रह्मात्मैक
त्वमपरोक्षतया न जानातीति चेत्तदापि पुनः पुनर्विचार एव कर्तव्यः अपरोक्षज्ञानहेतोरन्यस्याभावादि
ति भावः ॥ ननु भूयो भूयो विचारेणापि इह साक्षात्कारानुदये सति विचारो व्यर्थः स्यादित्याशंक्याह ॥ ३३
नानिदेशतोऽवगतमिमामाशंक्य ब्रह्मसूत्रकृता व्यासेनैहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनादित्यस्मिन्सू
त्रेऽभिधानादित्याह ॥ सति प्रतिबन्धे इह जन्मनि ज्ञानानुत्पत्तौ श्रुतिं दर्शयति ॥ ३३ ॥

ध्यानदीपिकाटीकायां ... ४

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

विरोधाभावमुदाहृत्य दर्शयति॥ केचन विप्रतिपद्यमाना उपलभ्यन्त इत्याशंक्याह॥ अत इत्यत आह॥ सर्वे॥ वैदिककर्मानुष्ठाने श्रद्धावतएवाधिकारितेत्यर्थः॥ एतावता परोक्षज्ञाने किमायातमित्यत आह॥ सकृद॥ उपदेशेन भवेन् इत्युत्पद्यते॥ ननु तर्हि अतः शास्त्रेषु विचारः किमर्थ इत्याशंक्यानुष्ठेययोः कर्मोपासनयोः संदेहसंभवान्निर्णयाय विचारः क्रियत इत्याह॥ १७॥ संदेहसंभवमेवोपपादयति॥ अनेकासु शाखासु तत्र तत्र वोदितकर्मोपासने बाधकं सम्यगाहृत्य निर्णीतं समस्तं दर्शिनः प्रभुः समर्थः कः न कोपीत्यर्थः॥ ननु तर्हि अनुष्ठेयमेव कर्मोपासनयोः शास्त्रमित्याशंक्याह॥ १८॥ भेतिमन्द्रादिभिः पूर्वाचार्यैः निर्णीतं योनुष्ठानम॥

अपरोक्षशिलाबुद्धिर्न परोक्षेशतां नुदेत्॥ प्रतिमादिषु विष्णुत्वे को वा विप्रतिपद्यते॥ १४॥ अश्रद्धालोरविश्वासो नोदाहरणमर्हति॥ श्रद्धालोरेव सर्वत्र वैदिकेष्वधिकारितः॥ १५॥ सकृदाप्तोपदेशेन परोक्षज्ञानमुद्भवेत्॥ विष्णुमूर्त्युपदेशो हि न मीमांसामपेक्षते॥ १६॥ कर्मोपास्ती विचार्येते अनुष्ठेयाविनिर्णयात्॥ बहुशाखाविप्रकीर्णं निर्णेतुं कः प्रभुर्नरः॥ १७॥ निर्णीतोऽर्थः कल्पसूत्रैर्ग्रथितस्तावतास्तिकः॥ विचारमन्तरेणापि शक्तोऽनुष्ठातुमञ्जसा॥ १८॥ उपास्तीनामनुष्ठानमार्षग्रन्थेषु वर्णितम्॥ विचाराक्षममर्त्याश्च तच्छ्रुत्वोपासते गुरोः॥ १९॥

कारः कल्पसूत्रैः ग्रथितो निर्णीतोर्थः तावता तेन आस्तिकः श्रद्धावान् विचारमन्तरेण विनापि कर्म सम्यगनुष्ठातुं शक्तो भवेत्॥ ननु तर्हि उपासनाविचाराभावात् तदनुष्ठाने कथं संभवेदित्याशंक्याह॥ १९॥ आर्षग्रन्थेषु अगस्त्यादिऋषिप्रणीतेषु उपासनानुष्ठानप्रकारो वर्णितः तत्र विचाराक्षमाः समर्थाः मनुष्याः कल्पसूत्रादिवत् अवलम्ब्य गुरुमुखात् तच्छ्रुत्वा उपासत इति भावः॥ ननु तर्हि वेदान्तेष्वपि ग्रन्थकर्तृभिर्वेदवाक्यविचारः कृतः किमर्थ इत्याशंक्य॥ तत्त्वदर्शिना बोधमेव क्रियते नानुष्ठानसिद्धये इत्याह॥ २५॥ ॥

न ज्ञाने परोक्षमपि शास्त्रोक्तेनैव प्रकारेण ब्रह्मणः सच्चिदानन्दरूपनिश्चायकत्वात् तत्त्वज्ञानमेव न भ्रम इत्यर्थः॥ न तु सम्यग्ज्ञानादिवाक्यैर्ब्रह्मणः सच्चिदानन्दरूपत्वमिव॥ तत्त्वमस्यादिवाक्यैः प्रत्यग्रूपत्वमपि तस्य बोध्यत एव॥ अतः शास्त्रजन्यस्यापि ब्रह्मज्ञानस्य प्रत्यग्रूपत्वाविषयत्वात् परोक्षत्वमेवेत्याशंक्याह॥ १९॥ यद्यपि वेदान्तेषु महावाक्यैर्ब्रह्म प्रत्यगात्मत्वेनैवोपदिष्टं तथाप्येतत्तत्त्वरूपत्वमनधिकारिणः कार्यप्रयोजनपदार्थविवेकशून्यस्य दुर्बोधं बोद्धुमशक्यमतः केवलाद्वाक्यात्तत्त्वरूपत्वमनुपलभ्य परोक्षज्ञानमुत्पद्यत इत्यर्थः॥ ननु सम्यग्ज्ञानस्य प्रमाणवस्तुतन्त्रत्वात् प्रमाणस्य वाक्यस्य तत्त्वमस्यादिवाक्य

शास्त्रोक्तेनैव मार्गेण सच्चिदानन्दनिश्चयात्॥ परोक्षमपि तज्ज्ञानं तत्त्वज्ञानं न तु भ्रमः॥ १९॥
ब्रह्म यद्यपि शास्त्रेषु प्रत्यक्त्वेनैव वर्णितम्॥ महावाक्यैस्तथाप्येतद्दुर्बोधमविचारिणः॥ २०॥
देहाद्यात्मत्वविभ्रान्तौ जाग्रत्यां न हठात्पुमान्॥ ब्रह्मात्मत्वेन विज्ञातुं क्षमते मन्दधीत्वतः॥ २१
ब्रह्ममात्रं सुविज्ञेयं श्रद्धालोः शास्त्रदर्शिनः॥ अपरोक्षद्वैतबुद्धिः परोक्षाद्वैतबुद्ध्यनुत्॥ २२॥

रूपस्य सद्भावादसत्त्वात् ब्रह्मात्मैकत्वलक्षणस्य विद्यमानत्वात् अतो विचारमन्तरेण दुर्बोधत्वमित्याशंक्यापरोक्षस्य सद्भावादित्याह॥ २१॥ ब्रह्मात्मैकत्वापरोक्षज्ञानविरोधिनो देहेन्द्रियादिष्वात्मत्वभ्रमस्य विचारनिवर्त्यस्य सद्भावात् तन्निवृत्तये विचारोऽपेक्ष्यत इत्यर्थः॥ ननु तर्हि देहेन्द्रियादिगोचरस्य द्वैतभ्रमस्य सद्भावाद्वितीयब्रह्मगोचरं परोक्षज्ञानमपि नोदीयादित्याशंक्यापरोक्षद्वैतभ्रमस्य परोक्षाद्वैतज्ञानाविरोधित्वात् कुतो बाधः॥ स इति शास्त्रात् परोक्षज्ञानमुत्पद्यत एवेत्याह॥ २२॥ अपरोक्षद्वैतबुद्धिरयं तत्परोक्षाद्वैतबुद्ध्यनुत् श्रद्धालोर्ब्रह्ममात्रं सुविज्ञेयमिति योजना॥ अपरोक्षभ्रमस्य परोक्षसम्यग्ज्ञानाविरोधित्वे दृ

134

135

२१

ध्यानदी॥ ९॥

११

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

136

प्रत्यग्व्यक्तिंबुद्ध्यादिसाक्षिणमानंदात्मानमनुल्लिख्याविषयीकृत्यशास्त्रात्सत्यज्ञानादिवाक्यात्ब्रह्मा
स्तीत्येवंसामान्याकारेणजायमानेनज्ञानेनमात्रास्यापूर्णमनात्मापरोक्षज्ञानेविवक्षितमित्यर्थः॥ तत्र
दृष्टांतः विष्ण्वादिमूर्तिवदिति॥ विष्ण्वादिमूर्तिप्रतिपादकशास्त्रजन्यज्ञानवदित्यर्थः॥ ननुशास्त्रेणवि
ष्ण्वादिमूर्तेःशंखचक्रादिविशेषवत्त्वेनोल्लेखात्कथमत्रपरोक्षत्वमित्याशंक्याह॥१५॥ शास्त्रेणचतुर्भुज
त्वमित्यादिविशेषप्रतीतावपिचक्षुरादिभिर्विष्ण्वादिमूर्तिमविषयीकुर्वन्पुरुषःपरोक्षतामेवतत्त्वा
पप्रतीत्याह॥ नतदाविष्णुमीक्षत॥ नह्युपासनाकालेविष्णुरूपास्येनेदंतेनेंद्रियैर्विषयीकरोतीम
त्यर्थः॥ ननुविष्ण्वादिगोचरस्यास्यव्यक्तिगोचरत्वाभावाद्भ्रमत्वमित्याशंक्य॥ प्रमाणेनजनितत्वान्नभ्रमत्वमित्याह॥

प्रत्यग्व्यक्तिमनुल्लिख्यशास्त्राद्विष्ण्वादिमूर्तिवत्॥ अस्तिब्रह्मेतिसामान्यज्ञानेनस्यात्परोक्ष
धीः॥१५॥ चतुर्भुजाद्यवगतावपिमूर्तिमनुल्लिखन्॥ अक्षैःपरोक्षज्ञान्येवनतदाविष्णुमीक्षते॥
१६॥ परोक्षत्वापराधेनभवेन्नाभ्रमताखिलं॥ प्रमाणेनैवशास्त्रेणसत्यमूर्तेर्विभासनात्॥१७॥ स
च्चिदानंदरूपस्यशास्त्राज्ज्ञानेप्यनुल्लिखन्॥ प्रत्यंचंसाक्षिणंतत्त्वंब्रह्म[illegible]वीक्षते॥१८

परोक्षज्ञानंभ्रांतिरितिनतुकारणंनभवति॥ किंतुविषयासत्त्वं॥ इहतुनस्वाकारेणैवसत्त्वेनशास्त्रेणोपप
न्नमित्यर्थः॥१७॥ ननुसच्चिदानंदस्यप्रत्यक्त्वेनब्रह्मणोपिज्ञानेनकथं
यथार्थभ्रमत्वाभावःविष्ण्वादिमूर्तेरिवभ्रमस्यतत्प्रमाणत्वमित्यर्थः परोक्षज्ञानस्यब्रह्मसाक्षात्कारोदयाभावादित्याह॥ स
च्चिदानंदरूपस्याभ्रमस्यापिकुतःपरोक्षत्वंनशास्त्रात्परोक्षज्ञानंभवतिविशेषेणप्रकाशते
ऽज्ञानमनेनप्रत्यक्त्वेनसंशयकःसंस्कारःसच्चिदानंदरूपस्य
त्यादिशास्त्रात्सच्चिदानंदस्वरूपस्यब्रह्मणोपिज्ञानेपिप्रत्यक्त्वेनसाक्षिणंब्रह्मतत्त्वंलक्षणःप्रत्यगात्म
त्वपरामर्शनाभावान्नैवपश्यति॥ कथंनहितत्रतथाविषयत्वगोचरस्यज्ञानस्यतत्त्व

137

प्रमायासंवादिभ्रमाभावेऽस्यत्वादयःफलसिद्ध्यर्थंदेवतात्वेनमहस्यसानाःकाष्ठाभवेयुःस्त्रीतोदेवतावा
भावादित्यर्थः॥ वाक्यांतमाह॥ पंचाग्निविद्यायांयोषावावगौतमाग्निःपुरुषोवावगौतमाग्निःपृ
थिवीवावगौतमाग्निःपर्जन्योवावगौतमाग्निःअसौवावद्युलोकोगौतमाग्निरित्यादिवाक्यैर्योषि
त्पुरुषपृथिवीपर्जन्यद्युलोकानामग्नित्वेनोपासनंब्रह्मलोकावाप्तिःफलदंभवेदित्यर्थः॥ आदि
शब्देनमनोब्रह्मेत्युपासीतआदित्योब्रह्मेत्यादेशइत्येवमादयोगृह्यन्ते॥ रज्जौवस्तुनिमिथ्याबुद्धिरूपपादि
तसंवादिभ्रमंबुद्धिसौकर्यायसंदर्शयति॥११॥ विद्धिनाद्विहिताद्युपासनादन्यथावस्तुविज्ञा
नाद्विपरीतज्ञानादीप्सितमभिलषितंफलंकाकतालीयतोदैवान्नलभ्यते॥ सोऽयंसंवादिभ्रम

प्रमायाःसन्निकादारुशिलाःस्युर्देवताःकथं॥ अग्नित्वादिधियोपास्याःकथंवायोषिता
दयः॥१०॥ अयथावस्तुविज्ञानात्फलंलभ्यतईप्सितं॥ काकतालीयतःसोऽयंसंवादिभ्रमउच्य
ते॥११॥ स्वयंभ्रमोऽपिसंवादीयथासम्यक्फलप्रदः॥ ब्रह्मतत्त्वोपासनापितथामुक्तिफल
प्रदा॥१२॥ वेदांतेभ्योब्रह्मतत्त्वमखंडैकरसात्मकं॥ परोक्षमवगम्यैतदहमस्मीत्युपास

इत्यर्थः॥ ननुब्रह्मोपासनस्ययथावस्तुविषयत्वात्कथंसंवादिभ्रमत्वंमुक्तिफलप्रदत्वमित्याशं
क्य॥ संवादिभ्रमवदेवेत्याह॥ स्वयंभ्रमोऽपीति॥१२॥ ननुब्रह्मतत्त्वज्ञानोपासनेक्रियतेज्ञानंवा॥ आ
द्येउपासनावैयर्थ्यंमोक्षसाधनस्यज्ञानस्यैवविद्यमानत्वात्॥ द्वितीयेविषयापरिज्ञानादुपासन
मेवनस्यादित्याशंक्याह॥ वेदांतेति॥१३॥ अयमभिप्रायःअखंडैकत्वापरोक्षज्ञानस्यमोक्षसाध
नस्यानुत्पन्नत्वान्नोपासनावैयर्थ्यं॥ शास्त्रात्परोक्षतयावगतत्वाद्ब्रह्मणउपासनाविषयत्वमिति
उपास्यब्रह्मतत्त्वगोचरस्यपरोक्षज्ञानस्यकिंरूपमित्याकांक्षायामाह॥ प्रत्यगिति॥१४॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA



यादीपप्रभायां मणिभ्रान्तिरस्ति स विसंवादिभ्रम इति स्मृतो विद्वद्भिः॥ मणिलाभलक्षणार्थक्रियारहितत्वात्॥ मणिप्रभायां मणिबुद्धिस्तु मणिलाभलक्षणार्थक्रियावत्वात्संवादिभ्रम उच्यत इत्यर्थः॥ प्रत्यक्षविषये संवादिभ्रमं दर्शयित्वानुमानविषयेपि तं दर्शयति॥ ७॥ क्वचिद्देशे स्थितं बाष्पं धूमत्वेन निश्चित्य तन्मूलप्रदेशे तं प्रदेशोग्निमान् धूमवत्वादित्यनुमाय प्रवृत्तेन पुरुषेण दैवगत्या यद्यग्निरुपलभ्यते तदा बाष्पविषये धूमत्वानुमानं संवादिभ्रमो मतः॥ आगमविषयेपि तं दर्शयति॥ ८॥ गोदावर्युदकस्यापि गङ्गोदकत्वमागमसिद्धं मत्वा तत्प्रोक्षणाच्छुद्धिर्लभ्यत एवमथापि गोदावर्युदके गङ्गोदक।

दीपप्रभामणिभ्रान्तिर्विसंवादिभ्रमः स्मृतः॥ मणिप्रभामणिभ्रान्तिः संवादिभ्रम उच्यते
बाष्पं धूमतया बुद्ध्वा तत्राङ्गारानुमानतः॥ वह्निर्यदृच्छया लब्धः स संवादिभ्रमो मतः॥ ७
गोदावर्युदकं गङ्गोदकं मत्वा विशुद्धये॥ संप्रोक्ष्य शुद्धिमाप्नोति स संवादिभ्रमो मतः॥ ८॥ ज्व
रेणाप्तः सन्निपातं भ्रान्त्या नारायणं स्मरन्॥ मृतः स्वर्गमवाप्नोति स संवादिभ्रमो मतः॥ ९
प्रत्यक्षस्यानुमानस्य तथा शब्दस्य गोचरे॥ उक्तन्यायेन संवादिभ्रमाः सन्ति हि कोटिशः॥ १०

कत्वबुद्धिः स्याद्भ्रान्तिरेव॥ उदाहरणान्तरमाह॥ ९॥ ज्वरेण सन्निपातेनाप्तः प्राप्तः पुरुषः॥ इदं नारायणस्मरणं मम स्वर्गसाधनमिति ज्ञानमन्तरेणापि सन्निपातवशात्प्रभ्रमवशान्नारायणाख्यपुरुषवत्तया वैद्यादिवन्नारायणं स्मरन्॥ मृतः स्वर्गमाप्नोत्येव॥ हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः॥ विकृतपुत्रमहवाप्रस्यनामिलोपि नारायणेति म्रियमाण उपैति मुक्तिं किमुतादरेण वदन्नेभ्यः॥ अत्रापि नारायणनाम्नः पुत्रनामत्वज्ञानं भ्रान्तिरेव॥ एवं त्रिविधसंवादिभ्रमोदाहरणेन सिद्धम॥

139

तीति प्रतिपादितं प्रतिजानीते॥ यथा संवादिभ्रमेणाप्यवश्यमभिप्रेतार्थलाभो भवति॥ एवं ब्रह्मतत्त्वोपासनयापि अभिलषिते ब्रह्मभावलक्षणो मोक्षो भवतीत्यर्थः॥ तत्र किं प्रमाणमित्यत आह॥ एतदुपासनायामपि मोक्षो स्यात्तत्त्वाद्भ्युपनीयोपनिषद्यनेकप्रकारेण ब्रह्मतत्त्वोपासनाश्रुतत्वादित्यर्थः॥ संवादिभ्रमवद्विदिताम्नं दृष्टान्तं प्रपञ्चयितुं संवादिभ्रमप्रतिपादकं वार्तिकं पठति॥ १॥ मणिप्रदीपप्रभमणिप्रदीपौ तयोः प्रभे मणिप्रदीपप्रभे तयोरिति विग्रहः॥ मणिप्रभायां दीपप्रभायां च यां मणिबुद्धिः सा मिथ्याज्ञानमेवाविशिष्टं तुल्यमिति॥ तथापि मणिप्रभायां मणिबुद्ध्याभिधावतः पुरुषस्य मणिला।

मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः॥ मिथ्याज्ञानाविशेषेपि विशेषोर्थक्रियां प्रति॥ २॥
दीपोपवरकस्यान्तर्वर्तते तत्प्रभा बहिः॥ दृश्यते द्वार्यथान्यत्र तद्वद्दृष्टा मणेः प्रभा॥ ३॥ दूरे प्र
भाद्वयं दृष्ट्वा मणिबुद्ध्याभिधावतोः॥ प्रभायां मणिबुद्धिस्तु मिथ्याज्ञानं द्वयोरपि॥ ४॥ न ल
भ्यते मणिर्दीपप्रभां प्रत्यभिधावता॥ प्रभायां धावतावश्यं लभ्येतैव मणिर्मणेः॥ ५॥

भो भवति॥ इतरस्य तु स नास्तीत्यर्थक्रियायां विशेषमस्तीत्यर्थः॥ वार्तिकं व्याचष्टे॥ दीपोपवरकस्यान्तरित्यादिना श्लोकत्रयेण॥ कस्मिंश्चिन्मन्दिरे अपवरकस्यान्तः स्थितस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे रत्नमिव वर्तुलोपलभ्यते॥ तथान्यस्मिन्मन्दिरे अपवरकस्यान्तः स्थितस्य रत्नस्य प्रभा बहिर्द्वारप्रदेशे दीपप्रभेव रत्नसमानोपलभ्यते॥ तथाविधप्रभाद्वयं दूरतो दृष्ट्वायं मणिरिति बुद्ध्या द्वौ पुरुषावभिधावतः तत्र तयोः द्वयोरपि प्रभाविषये जायमानं मणिज्ञानं भ्रान्तमेव॥ तथापि दीपप्रभायां मणिबुद्ध्या धावता पुरुषेण मणिर्न लभ्यते॥ मणेः प्रभायां मणिबुद्ध्या धावता मणिर्लभ्यत एव॥ भवत्वेवं वार्तिकार्थः प्रकृते किमायातमित्यत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु तत्त्वस्यैकरूपस्य कूटस्थबोधने श्रुतिषु विगानं कुतो दृश्यत इत्याशंक्य ॥ ननु तत्त्वे विगानमस्ति श्रपि तत
द्बोधनप्रकारे तद्दपि बोधपद्धत्यविज्ञैर्वैषम्यान्नसारेणासुरेश्वराचार्यैः क्रमितमाह ॥ ७१ ॥ कूटस्थस्यैकरूपत्वेन तत्त्व
तिपादकानामेव कुतो विप्रतिपत्तिरित्याशंक्य ॥ श्रुतितात्पर्यबोधरहितानामेव विप्रतिपत्तिर्न तत्त्वविदा
मित्याह ॥ ७२ ॥ नहि विवेकिनो निश्चयः कोऽदृश इत्याकांक्षायामाह ॥ ७३ ॥ ग्रंथाभ्यासफलमाह ॥ ७४ ॥ इति
श्रीरामकृष्णाख्यविदुषा विरचिता कूटस्थदीपव्याख्या प्रकरणं ॥ ८ ॥ ॐ नमः श्रीभारतीतीर्थविद्या

श्ववाद्य नमस्कृत्य तेऽकृतिबोधयिते सदा ॥ जीवमोक्षेनराह्यापि समाश्रित्य प्रबोधयेत ॥ १ ॥ य
यायया भवेन्मोक्षस्तु सन्निःश्रुतिगात्मनि ॥ सा सैव भक्तिपानस्य साधीमाचार्यभाषिते ॥ २ ॥ श्रु
तितात्पर्यमखिलमबुद्ध्वा भ्राम्यते जडः ॥ विवेकी त्वखिलं बुद्ध्वा तिष्ठत्यानन्दवारिधौ ॥ ३ ॥ मायामे
घो जगन्नीरं वर्षत्वेष यथा तथा ॥ चिदाकाशस्य नो हानिर्न वा लाभ इति स्थितिः ॥ ४ ॥ इमं कूटस्थदी
पं योऽनुसंधत्ते निरंतरं ॥ स्वयं कूटस्थरूपेण दीप्यतेऽसौ निरंतरं ॥ ५ ॥ इत्यष्टमप्रकरणं ॥ ८ ॥ ॐ संवा
दिभ्रमवद्ब्रह्मतत्त्वोपास्त्यापि मुच्यते ॥ उत्तरे तापनीयेऽतः श्रुतोपास्तिरनेकधा ॥ १ ॥

रण्यमुनीश्वरौ ॥ क्रियते ध्यानदीपस्य व्याख्या संक्षेपतो मया ॥ इह तावद्वेदांतशास्त्रे निर्गुणब्रह्मतत्त्वविवे-
कादिसाधनचतुष्टयसंपन्नस्य श्रवणमनननिदिध्यासनानुष्ठानवतस्तत्त्वं पदार्थविवेचनपूर्व-
कं महावाक्यार्थापरोक्षज्ञानेन ब्रह्मभावलक्षणो मोक्षो भवतीति प्रतिपादितं ॥ तत्र कृतोपनिषत्क-
स्यापि बुद्धिमांद्यादिना केनचिन्निमित्तेन वाक्यार्थविषयापरोक्षज्ञानासंभवे ॥ [illegible] ।

प्रमाणाभावान्मैवमिति पविरुक्तेति ॥ मातिशंकनमासिति ॥ कूटस्थस्य वास्तवत्वेऽपि प्रमाणं नोपल-
भ्यत इत्याशंक्य श्रुतयः सर्वा अपि प्रमाणमित्याह ॥ ८५ ॥ अत्र कूटस्थस्य पारमार्थिकत्वे प्रतिपन्नमन्त-
मप्यहत्व किंचन महे तेऽर्थः ॥ ननु कूटस्थस्य जीवेशयोश्च वास्तवत्वाविशेषवत्साधने श्रुतयः प्र-
वर्तंते ॥ ननु तर्कैः किं विद्वेषिता स्यादित्याशंक्य ॥ न मन्दत्वेनोक्तमर्थं विरुद्धोकारणमपश्यन्नतात्र-
तर्कोपन्यास इत्याह ॥ ८६ ॥ ननु किमिमनत आह ॥ मुमुक्षूणामुक्तमर्थः कोऽदृशोऽनुसंधेय इत्यत आह ।

कूटस्थत्वाश्रयो का स्यादिति चेन्नातिशंक्यतां ॥ कूटस्थमायिकत्वे तु प्रमाणं न हि विद्यते ८७
वास्तवं बोधयन्त्यस्य वेदांताः सकला अपि ॥ सपत्नरूपं वस्त्वन्यन्न सहंत्यत्र किंचन ॥ ८८ ॥ श्रुत्य
र्थं विस्मरन्नेवं तर्केणोक्तं किंचन ॥ तेन तार्किकशंकानामत्र कोऽवसरो भवेत् ॥ ८९ ॥ तस्मा
त्कुतर्कं संत्यज्य मुमुक्षुः श्रुतिमाश्रयेत् ॥ श्रुत्या तन्मायया जीवेशौ करोतीति प्रदर्शितं ॥ ९० ॥
ईक्षणादिप्रवेशांता सृष्टिरीशकृता भवेत् ॥ जाग्रदादिविमोक्षांतः संसारो जीवकर्तृकः
असंग एव कूटस्थः सर्वदा नास्य कश्चन ॥ भवत्यतिशयस्तेन मनस्येवं विचार्यतां ॥ ९२ ॥ न निरोधो
न चोत्पत्तिर्न बद्धो न च साधकः ॥ न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता ॥ ९३ ॥

श्रुतिषु जीवेशयोर्मायिकत्वे ईक्षणादिप्रवेशांतायाः सृष्टेरीशकर्तृत्वे ॥ जाग्रत्स्वप्नसुषुप्त्यादिमोक्षा
न्तलक्षणस्य संसारस्य जीवकर्तृत्वे ॥ कूटस्थस्यासंगत्वादिके ॥ स्वतिशयराहित्यलक्षणस्य व्यवहारातीतस्यास-
ङ्गत्वे च प्रतिपादिते ॥ अतो मुमुक्षुरिममर्थं सर्वदा विचारयेदित्यभिप्रायः ॥ कूटस्थस्य जन्माद्यतिशयाभा-
वः श्रुतावगम्यत इत्याशंक्य श्रुतिवाक्यादिमभिप्रेमतद्दाकं पठति ॥ ९४ ॥ ननु तर्हि श्रुतिषु ततस्तज्जीव-
संसारादिस्वरूपप्रतिपादने किमर्थमित्याशंक्य वाचामगोचरस्यात्मनो बोधनायेत्याह ॥ अवाङ्म

140
141
CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

इत्येवंप्रकारेण सततं संहितादिपुराणेषु जीवेश्वरत्वादिकल्पनारहितः
प्रकाशचैतन्यरूपः शिवः कूटस्थो विविच्यत इत्यन्वयः । जीवेशत्वादिरहितः केवलोऽद्वितीयः स्वप्रभः स्वयं
मायिकत्वप्रदर्शनार्थमाह ॥५५॥ जीवेशावाभासेन करोतीत्याद्याः श्रुतयो
मायाविद्याधीनयोश्चिदाभासयोर्मायिकत्वं प्रतिपादयन्तीति भावः । माया चाविद्या च स्वयमेव भवतीति श्रुतिः
त्वेन प्रतिपादितयोर्जीवेशयोः ॥ पार्थिवत्वादिविशेषरहितो भवेदित्याह ॥ मायिकत्वेन तयोः देहादिभावेन
दित्याह ॥ ननु घटकाद्यज्ञानाद्विनष्टेन देहादिभावेन तत्त्वापि भवितेति ॥ नग्नजीवेश्वरभेदे हेतोर्मा

इति शैवपुराणोक्तकूटस्थः प्रविविच्यते ॥ जीवेशत्वादिरहितः केवलः स्वप्रभः शिवः ॥५५॥ मा
याभासेन जीवेशौ करोतीति श्रुतत्वतः ॥ मायिकावेव जीवेशौ स्वच्छौ तौ काचकुम्भवत् ॥५६॥
घटनतं यमनो देहात्मत्वं प्रदर्शयेत् ॥ मायिकावपि सर्वस्मादन्यस्मात् स्वच्छतां गतौ ॥५७॥ चि
द्रूपत्वं च संभाव्यं चित्तेनैव प्रकाशनात् ॥ सर्वकल्पनशक्ताया मायाया दुष्करं नहि ॥५८॥ अस्म
न्निद्रापि जीवेशौ चेतनौ स्वप्नगौ सृजेत् ॥ महामाया सृजत्येतावित्याश्चर्यं किमत्र तत् ॥५९॥ सर्वज्ञत्वा
दिकं चेशे कल्पयित्वा प्रदर्शयेत् ॥ धर्मिणो कल्पयेद्यस्याः को भारो धर्मकल्पने ॥६०॥

मायायाः कल्पनात्वेऽपि नग्नजीवेश्वरेऽपि चैतन्यमनुविद्धमित्याशङ्क्याह जन्मयोरीश्वरमनसोर्यथायोग्यं तदुद
दित्याह ॥६१॥ अथ तत्काराद्विवेकेन तद्विवेकस्य सामान्याभावादित्याह ॥६२॥ चिद्रूपत्वेन प्रकाश
नमपि मायिकयोरुपपन्नमित्याशङ्का ॥ न स्वतः स्वटकारित्वादुपपन्नमित्याह ॥ अकार्यं कल्पितं कथा
येन दृष्टयति ॥६३॥ ईश्वरस्यापि मायिकत्वेन स्वानीववत् सर्वज्ञत्वादिकं कथमित्याशङ्क्य ॥ सर्वज्ञत्वादि
कमपि मायैव कल्पयतीत्याह ॥ तदुपपत्तिमाह ॥ ननु जीवेशयोरविकूटस्थस्यापि मायिकत्वप्रस-

एवं कूटस्थस्य चिदाभासादिभ्यो विविच्य प्रदर्शितमात्रस्य शुद्धस्य आत्मत्वप्रतिपादनेन विवेकः कृतः इदानीं ब्रह्मणः
५५ ॥ कामादिरूपत्वेनाऽसत्तान्तःसाक्षित्वेन ॥ कूटस्थस्य ब्रह्मत्वं चेतनागमात्र साक्षित्वेन किं तत्साधयो
सत्तान्तःसाक्षित्वेन ॥ ततः सर्वकल्पनाशक्तिमत्प्रयोजनासाक्षित्वेन च शिवप्रवर्तितकृतिः ॥ सत्वास
मविषयत्वादनेकरूपः ॥ सर्वार्थावभासकत्वेन सर्वसंबंधित्वात्संस्पर्शाद्यस्तस्मात् ॥ अत्रैवेदमभिप्रेतं ॥ वि
मतः शिवो द्वैतादिभ्योऽभिधेयत्वेनादिसाक्षित्वात् ॥ यद्यदहन्त्वादिभ्यो नाभिधेयं ॥ नन्वहन्त्वादिसाक्षीन

एवं च सति विवेकः स्याज्जगत्स्वमादिकं तर्कजाः ॥ विडम्बनाहेतुत्वं वेद्याः स्वेडनोक्तिप्रकारतः ॥५५॥
द्वैतेः साक्षितया हेतुः भोगभावस्य च स्थितः ॥ जीवभावे तथा तौ सीमाभासात्ताननवस्त ॥
नः ॥५६॥ असत्यालेखनत्वेन सत्यः सर्वजडस्य तु ॥ साधकत्वेन विरूपः सदाप्रेमास्पदत्वतः ॥५७
मनोरूपः सर्वार्थसाधकत्वेन हेतुना ॥ सर्वसंबंधवत्त्वेन संस्पर्शः संस्थितः शिवः ॥५८॥

भवति ॥ यथाहन्त्वादिः ॥ विमतः सत्यो भवितुमर्हति ॥ मिथ्याधिष्ठानत्वात् सर्वरजताधिष्ठानशुक्ति
वत् ॥ विमतः चिद्रूपः जडमात्रावभासकत्वाद्विरूपो न भवति ॥ तस्मात् जडावभासकमपि न भवति ॥
यथा घटादिः ॥ विमतः परिशुद्धः सर्वसंबंधित्वात् जगतः सत्त्वसंबंधित्वे च सर्वार्थसाधकत्वेन ॥ विमतः
सर्वसंबंधवान् सर्वावभासकत्वात् ॥ यः सर्वसंबंधवान्न भवति स सर्वावभासकोऽपि न भवति ॥ यथा
दीपादिरिति ॥ उदाहृतपुराणवाक्यस्य तात्पर्यमाह ॥५८॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नगदेकदेशत्वेनानेन जीवेनानुप्रविश्य नामादिकृतमिति सिद्धं ॥ ननु जगदधिष्ठानचैतन्यस्यैकत्वात्प्रत्यक्पदार्थ-
योः पौनरुक्त्यमित्याशंक्य ॥ नयोरौपाधिको भेदो वास्तवस्त्वैक्यमित्याह ॥ जगन्नदेकदेशाख्येति ॥ ५० ॥ जगदि-
ति तदेकदेश इति च प्रख्याप्यमाणस्य समारोपस्य तयानाभावकवचनं ॥ ननु चिदाभासस्य सविकारत्वना-
दिवदधिष्ठानारोप्योभयधर्मवत्त्वानुपलंभात्कथमारोपितत्वमित्याशंक्याह ॥ ५१ ॥ बुद्ध्युपाधिद्वारा समा-
रोप्यमाणं कर्तृत्वभोक्तृत्वसमानत्वादीनि स्फुरणलक्षणमात्मरूपं चेचरत्वस्वतो भाति सर्वप्रतिभा-

एतस्मिन्नेव चैतन्ये जगदारोप्यते यदा ॥ तदा तदेकदेशस्य जीवाभासस्य का कथा ॥ ५२ ॥ जगन्न-
देकदेशाख्यसमारोप्यस्य भेदतः ॥ तत्त्वंपदार्थौ भिन्नौ स्तो वस्तुतस्त्वेकता चितः ॥ ५३ ॥ कर्तृत्वा-
दीन्बुद्धिधर्मान्स्फूर्त्याख्यां चात्मरूपतां ॥ दधद्विभाति पुरत आभासोऽतो भ्रमो भवेत् ॥ ५४ ॥ का बु-
द्धिः कोऽयमाभासः को वात्मात्र जगत्कथं ॥ इत्यनिर्णयतो मोहः सोऽयं संसार इष्यते ॥ ५५ ॥ बुद्ध्या-
दीनां स्वरूपं यो विविनक्ति स तत्त्ववित् ॥ स एव मुक्त इत्येवं वेदान्तेषु विनिश्चयः ॥ ५६ ॥

स्तेः ॥ एतत्राभासः कल्पितत्वमर्थः ॥ अस्य भ्रमस्य किं कारणमित्याकांक्षायां बुद्ध्यादिस्वरूपापरिज्ञा-
नमेवेत्याह ॥ तस्य निवर्तनीयत्वात्पानर्थहेतुतामाह ॥ अस्य किं निवर्तकमित्याकांक्षायां ॥ बुद्ध्यादीनां स्वरू-
पविवेक एव निवर्तकस्तस्मिन्प्रमेयतत्त्वविद्धानेवस्मादीनां तत्त्वविद्वचनं नियतमित्याह ॥ ५३ ॥ एवं बंधमोक्ष-
योरविवेकमूलत्वेन समहेतुत्वादेकस्यैव बंधः कस्य मोक्ष इत्येवमादिरूपाः तार्किकैः क्रियमाणाः कुत-
र्काः परिहासविशेषाः स्वेनोक्तयुक्तिभिः ॥ तेषां निरूक्तत्वात्पादानात्परिहरणीया इत्याह ॥ ५७ ॥

ननु तर्हि विवरणाचार्यैः बाधायां सामानाधिकरण्यं कृतोऽन्यथा कृतमित्याशंक्य ॥ नेहं शब्देन कूटस्थस्या-
विवक्षितत्वादित्याह ॥ सामान्येनेति कूटस्थस्य न विवक्षेत्यन्वयमर्थं विद्वन्तीति ॥ ५६ ॥ जीवितो वृत्त्यादिभ्यो विवे-
चितस्त्वंपदलक्ष्यः कूटस्थो वस्तुमाणलक्षणा ॥ तस्य ब्रह्मरूपता समानादिलक्षणब्रह्मरूपतां वक्तुं विवर-
णादिषु बाधायां सामानाधिकरण्यस्य निराकरणपूर्वकं मुख्यसामानाधिकरण्यमुक्तमित्यर्थः ॥ इदानीं
कूटस्थस्य ब्रह्मणोक्तं संभावयितुं कूटस्थशब्देन विवक्षितमर्थमाह ॥ ५७ ॥ आदिशब्देन मनआदयो गृ-

सर्वं ब्रह्मेति जगता सामानाधिकरण्यवत् ॥ अहं ब्रह्मेति जीवेन सामानाधिकृतिर्भवेत् ॥ ५८ ॥
सामानाधिकरण्यस्य बाधार्थत्वं निराकृतं ॥ प्रयत्नतो विवरणे कूटस्थस्य विवक्षया ॥ ५९ ॥ शो-
धितस्त्वंपदार्थो यः कूटस्थो ब्रह्मरूपतां ॥ तस्य वक्तुं विवरणे तथोक्तमितरत्र च ॥ ६० ॥ देहेंद्रियादि-
युक्तस्य जीवाभासभ्रमस्य या ॥ अधिष्ठानचितिः सैषा कूटस्थात्र विवक्षिता ॥ ६१ ॥ जगद्भ्रमस्य सर्व-
स्य यदधिष्ठानमीरितं ॥ त्रय्यंतेषु तदत्र स्याद्ब्रह्मशब्दविवक्षितं ॥ ६२ ॥

रिते ॥ एवं चेद्देहेंद्रियादियुक्तस्य शरीरद्वयसहितस्य जीवाभासभ्रमस्य चिदाभासरूपभ्रमस्य याधिष्ठानवि-
ति ॥ यदधिष्ठानचैतन्यमस्ति तदत्र वेदांतेषु कूटस्थत्वेन विवक्षितमित्यर्थः ॥ ब्रह्मशब्दस्यार्थमाह ॥ ५८ ॥ कृ-
त्स्नजगत्कल्पनाधिष्ठानं यच्चैतन्यं वेदांतेषु निरूपितं ॥ तदत्र ब्रह्मशब्देन विवक्षितमित्यर्थः ॥ ननु जीवभ्रमाधि-
ष्ठानचैतन्ये कूटस्थस्यानुपपत्तेः ॥ जीवस्यारोपितत्वासिद्धेरित्याशंक्य ॥ तस्यारोपितत्वे कैमुतिकन्यायेन ।

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

जीवापेतेजीवरहितेजीवेनमुक्तमितियावत् ॥ वावएवसजीवोनम्रियतइत्यर्थः ॥ ननुजीवस्यावि[ना]-
शित्वेऽहंब्रह्मास्मीति ॥ अविनाशिब्रह्मतादात्म्यज्ञानेनघटतइत्याशंकते ॥ विनाशीसन्जीवोऽहंब्रह्मास्मीतिब्र-
ह्मरूपेणात्मानंनवुध्येतनजानीयात् ॥ विनाश्यविनाशिनोरेकत्वविरोधादितिचेन्मुख्यसामानाधिकर-
ण्याभावेऽपिबाधायामपिसामानाधिकरण्यसंभवाज्जीवभाववाधेनब्रह्मभावोवर्ण्यतामित्याशंकातत्र-
स्याह ॥ बाधायांसामानाधिकरण्येनवाक्यार्थप्रतिपत्तिप्रकारोवार्तिककारैःस्पष्टीकृतोऽभिहितइत्ये-
तमर्थंतद्वाक्योदाहरणपूर्वकंदर्शयति ॥ ४५ ॥ स्थाणावेषपुमानितिमतिर्यद्वत्पुरुषबोधेनस्था-

जीवापेतंवावकिलशरीरंम्रियतेनसः ॥ इत्यत्रनविमोक्षार्थःकिंतुलोकांतरेगतिः ॥ ४६ ॥
नाहंब्रह्मेतिवुध्येतसविनाशीतिचेन्नतत् ॥ सामानाधिकरण्यस्यबाधायामपिसंभवात् ॥
योयंस्थाणुःपुमानेषपुंधियास्थाणुधीरिव ॥ ब्रह्मास्मीतिधियाशेषाह्यहंबुद्धिर्निवर्तते ॥ ४७ ॥
नैष्कर्म्यसिद्धावप्येवमाचार्यैःस्पष्टमीरितं ॥ सामानाधिकरण्यस्यबाधार्थत्वंततोस्तुतत्

णुबुद्धिर्निवर्ततेयथा ॥ एवमहंब्रह्मास्मीतिबोधेनाहंबुद्धिःकर्ताहमस्मीत्येवमादिरूपासर्वाविनि-
वर्ततइति ॥ एवमुक्तप्रकारेणाचार्यैर्वार्तिककारैर्नैष्कर्म्यसिद्धौसामानाधिकरण्यस्यबाधार्थत्वं
स्पष्टमीरितं ॥ फलितमाहततोस्त्विति ॥ ततःकारणाद्ब्रह्माहमस्मीतिवाक्येतत्सामानाधिक-
रण्यस्यबाधार्थत्वमस्त्वित्यर्थः ॥ नन्वेवमपिकूटस्थबाधायांसमानाधिकरण्येनकापिरष्ट-
मित्याशंक्य ॥ सर्वबोधतत्स्त्वेतित्वबाधायांसमानाधिकरण्यइष्टमेतदपि
नहिविरुध्यतीत्याह ॥ सर्वबोधेति ॥ ४७ ॥

इदंबोधेस्पष्टत्वपिसमानमित्याह ॥ स्वाहिकर्तृधर्मीधिकत्वाद्दोषइत्याशंक्यायंपरिहारःप्रवि-
ष्टेऽपिसमानइत्याह ॥ अनयोर्धर्मीधिकत्वेदेहेनध्यसमइत्याह ॥ प्रज्ञानघनएवैतेभ्यःभूतेभ्यःसमु-
त्थायतान्येवानुविनश्यति ॥ नप्रेत्यसंज्ञास्तीत्यौपाधिकरूपस्यविनाशप्रतिपादिकांश्रुतिंदर्शय-
ति ॥ ३८ ॥ एषप्रज्ञानघनआत्मापतेभ्योदेहेंद्रियादिरूपेभ्यःपंचभूतकार्येभ्योनिमित्तभूतेभ्यउ-
पाधिभ्यःसमुत्थायजीवत्वाभिमानंप्राप्यतान्येवदेहादीनिविनश्यंत्यनुविनश्यति ॥ तेषुविनश्य-
त्स्वनष्टांतेजीवत्वाभिमानंजहाति एवंसोपाधिकरूपस्यविनाशित्वंयाज्ञवल्क्योमैत्रेय्यैउक्त्वा

कथंप्रतिष्ठेसंज्ञाऽपैतस्याहेतिवीक्ष्यकथंवद ॥ मायिकत्वंतयोक्त्वास्याविनाश-
श्रुसमस्तयोः ॥ ३८ ॥ समुत्थायेभ्यःभूतेभ्यःतान्येवानुविनश्यति ॥ विस्पष्टमे-
तिमैत्रेय्यैयाज्ञवल्क्यउवाचहि ॥ ३९ ॥ अविनाश्ययमात्मेतिकूटस्थःप्रविवे-
चितः मात्रासंसर्गइत्येवमसंगत्वस्यकीर्तनात् ॥ ४० ॥ ॥

नित्यर्थः ॥ अविनाशीवाअरेयमात्मानुच्छित्तिधर्मेतिश्रुत्याकूटस्थःततोविभिन्नःप्रदर्शितइ-
त्याह ॥ मात्रासंसर्गस्त्वस्यभवतीतिश्रुत्याविनाशित्वेहेतुमसंगत्वंचोक्तवानित्याह ॥ मात्रेति
मीयतेइतिमात्रादेहादयःताभिरस्यात्मनोसंसर्गोभवतीत्यर्थः ॥ ननुजीवापेतंवावकिलेदंम्रि-
यतेनजीवोम्रियतइतिश्रुत्या ॥ अस्योपाधिकस्याप्यविनाशित्वंप्रतिपादितमित्याशंक्य ॥ त-
स्याःश्रुतेर्देहांतरप्राप्तिविषयतया ॥ नात्यंतिनाशाभावपरत्वमित्याह ॥ ४० ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा सदिति सत्तामेवमवलंबते न सदोभियतेन हृदितिभावः ॥ न चैवं तर्हि देहातिरिक्तो धीरपि न सिद्ध्ये-
दिति प्रतिबंद्या परिहरति ॥ प्रतिबंदी मा च नेत्येकं ते ॥१४॥ देहव्यतिरिक्ताया बुद्धेः सविविक्तानो भवतीत्या-
दिष्कृति सिद्धत्वाज्ञानमसिति भावः ॥ ननु तर्हि विविक्ता देहातिरिक्ता बुद्धिरभ्युपगम्यते चेत्तर्हि प्रवेशस्या-
ति बलाद्बुद्ध्यतिरिक्तश्चिदाभासोऽप्यभ्युपेयस्तमाह ॥१५॥ बुद्ध्युपाधिकस्यैव प्रवेशोऽभ्युपगम्यते न तदतिरिक्त-
स्येति शंकते ॥ धियैवेयत्कृतो बुद्ध्यतिरिक्तश्चिदाभासोऽप्यभ्युपेयस्तमाह ॥१६॥ बुद्ध्युपाधिकस्यैव प्रवेशा-

न हि धीभावभाविता दाभासोऽस्ति धियः पृथक् ॥ यथा सत्वमेवाकें धीरप्येवं
स्वदेहतः ॥१७॥ देहस्सत्वेऽपि बुद्धिः स्यात्का हानिस्तथा सति ॥ बुद्धेरन्यश्चिदाभासः
प्रवेशश्रुतिगृह्यतः ॥१८॥ धीयुक्तस्य प्रवेशश्चेन्नैतरेये धियः पृथक् ॥ आत्मा प्र-
वेशं संकल्प्य प्रविष्ट इति गीयते ॥१९॥ कथं न्विदं मादेहं मदृते स्यादितीरणा-
त् ॥ विधाय मूर्ध्नः सीमानं प्रविष्टः संसरत्ययं ॥२०॥ ॥

बुद्ध्युपेतेन न तदतिरिक्तस्येति शंकते ॥ धियैवेयत्कृतो बुद्ध्यतिरिक्तस्यैव प्रवेशश्रवणान्नैवमिति परिह-
रति ॥ तामेव श्रुतिमर्थतः पठति ॥२०॥ स ईयं परमात्मा मा सादेहं प्रत्यागिव देहस्य जात देहस्तेः सहभवंत-
ते इति मदृते देहमिदं जडं ज्ञानेन मत्कृते ॥ चैतन्येनैव विदार्य कथं न स्यादिति कथयम्पि निवेदेहेति विचा-
र्य मूर्ध्नः ॥ सीमानं कपालत्रयमध्यप्रदेशं विदार्य ॥ स्वसृष्टिं पिमाने प्रविष्टः ततः संसरति
जाग्रदादिकमनुभवतीत्यर्थः ॥ ननु संसारस्यात्मनः प्रवेशोऽप्युक्तः इति शंकते ॥२१॥॥

उक्ते सत्त्वं न परिच्छेदप्रयोजकं न भवतीत्याह ॥ उक्तमर्थं दृष्टांतेन स्पष्टयति ॥२४॥ दारुकोशस्य-
स्थयोः प्रस्थयोः स्थिते सक्तुनासक्तुनि तंडुलपरिमाणेऽन्तनाधिकभावहे तेन भवन इत्यर्थः ॥ कोश-
प्रस्थे तंडुलपरिमाणेनाधिकभावेऽपि प्रतिबिंबलक्षणस्याधिकास्तीत्याशंक्य ॥ तर्हि बुद्धावपि चि-
दाभासो भवतेवांगीकृतः स्यादित्याह ॥२७॥ प्रतिबिंबोगीकारेश्चिदाभासः कथमंगीकृतः स्यादि-
त्याशंक्य ॥ प्रतिबिंबाभासशब्दाभ्याममभिधेयस्यार्थस्यैक्यादित्याह ॥२८॥ प्रतिबिंबस्याभासत्वं कथ-
मित्याशंक्याभासलक्षणयोगादित्याह ॥ हि यस्मात्कारणात्प्रतिबिंबो बिंबलक्षणरहितो बिंबव-

न कुप्रसहशी बुद्धिः सक्तुत्वादिति चेदिति ॥ अक्तत्वमपरिच्छेदे किं स्यान्नोन भवेत्तव ॥ २५
प्रस्थेन दारुजन्मेन कांस्यजन्मेन वा न हि ॥ विशेषः तंडुलादीनां परिमाणे विशिष्यते ॥ २६
परिमाणाविशेषेऽपि प्रतिबिंबो विशिष्यते ॥ कांस्ये यदि तदा बुद्धावप्याभासो भवेत्तदा-
त् ॥२७॥ ईषद्भासनमाभासः प्रतिबिंबस्तथाविधः ॥ बिंबलक्षणहीनः सन् बिंबवद्भास-
ते सहि ॥२८॥ ससंगत्वविकाराभ्यां बिंबलक्षणहीनता ॥ स्फूर्तिरूपत्वमेतस्य बिंबवद्भा-
सनं विदुः ॥२९॥॥

द्वभासते ते नो बिंबाभास इति भावः ॥ आभासलक्षणयोगित्वमेव स्पष्ट-
यति ॥२८॥ एतस्य चिदाभासस्य ससंगत्वविकारित्वाभ्यां बिंबभूतासंगाविकारिचैतन्यलक्ष-
णहीनत्वे ॥ स्फुरणरूपत्वे बिंबवदवभासनमित्यर्थः ॥ हेतुलक्षणरहितो हेतुवद-
वभासमानो हेत्वाभास इतिवत् ॥ इत्थं चिदाभासस्य प्रयोजकं तानि बाह्यक्रम-
इदानीं तस्य बुद्धेः पृथक् सत्त्वं साधयितुं पूर्वपक्षमाह ॥२९॥॥ राम

148

149

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चिदाभासव्यतिरिक्तकूटस्थस्याभ्युपगमः स्वकपोलकल्पित इत्याशंक्याचार्यैः कूटस्थस्योपपा-
दितत्वान्नैवमित्याह ॥ २४ ॥ अन्तःकरणतद्वृत्तिसाक्षी चैतन्यविग्रहः ॥ आनंदरूपः सत्यः सन्किं नात्मा-
नं प्रपद्यसे इत्यादावित्यर्थः ॥ कूटस्थातिरिक्तः चिदाभासोऽपि वर्णित इत्याह ॥ आत्माभासेति ॥ २५ ॥
आत्मा चाभासश्चाश्रयश्च आत्माभासाश्रया इति द्वंद्वसमासः ॥ मुखाभासाश्रया इव यथापि तथा
गम्यते प्रसिद्धे ॥ आभासो मुखप्रतिबिंबः आश्रयो दर्पणादिरित्येते यथा प्रसिद्धास्तथा गम्यन्ते एव-
मात्मा कूटस्थ आभासश्चिदाभासः ॥ आश्रयोऽन्तःकरणादिरिति ॥ नयो विषयाः स्वयुक्तिभ्यामेव गम्य

द्विगुणीकृतचैतन्ये जन्मनाशानुभूतितः ॥ अकूटस्थं तदन्यत्तु कूटस्थमविकारतः ॥ २४
अन्तःकरणतद्वृत्तिसाक्षीत्यादावनेकधा ॥ कूटस्थ एव सर्वत्र पूर्वाचार्यैर्विनिश्चितः ॥ २५
आत्माभासाश्रयाश्चैवं मुखाभासाश्रया यथा ॥ गम्यन्ते शास्त्रयुक्तिभ्यामाभासासत्त्वमी-
रितम् ॥ २६ ॥ बुद्ध्यवच्छिन्नकूटस्थो लोकान्तरगमागमौ ॥ कर्तुं शक्तो घटाकाशवदाभासेन
किं वद ॥ २७ ॥ शृण्वसङ्गः परिच्छेदमात्राज्जीवो भवेन्न हि ॥ अन्यथा घटकुड्याद्यैरवच्छिन्नस्य जी-

नेत्यर्थः ॥ अत्र चाभासत्वेन कूटस्थातिरिक्तश्चिदाभासो वर्णित इति भावः ॥ मनसः साक्षी बुद्धेः
साक्षीति बुद्धिसाक्षिणः श्रुतिपारिकेषाद्वंदपद्मश्रुतिरूपो वर्भवेतिचिदाभासप्रतिपादकं ॥ विका-
रित्वादिरूपः युक्तिः सर्वमेवोक्तमिति भावः ॥ २६ ॥ ननु चिदाभासकल्पितैति ॥ बुद्ध्यवच्छिन्नकल्पमानयाऽव्याव
च्छिन्नः कूटस्थ एव घटाकाशवदुपाधिगतो लोकान्तरे गमनागमने कर्तुं शक्नोति ॥ अतश्चिदा-
भासकल्पनायोगो वृथेति भावः ॥ असंगस्य कूटस्थस्य बुद्ध्यवच्छेदकमात्रेण जीवत्वे न घटते ॥ अन्य-

भवत्येवमसम्बन्धावोचानिर्विलयानेनकथकूटस्थो वाभासतेत्याशंक्य ॥ तदाभावसाक्षितेना-
साववगम्यते इत्याह ॥ २८ ॥ वृत्तिसंयोगो वृत्तिभावाश्चयेन चैतन्येनावभासते सह कूटस्थो वर्णितव्यश्च-
र्थः ॥ एवं च सति किंफलितमित्यत आह ॥ अहंवृत्तेरिति ॥ २९ ॥ वृत्तेर्घटस्य घटमात्रावभासकः चिदाभासः
घटस्य ज्ञाततावभासकं वृत्त्यवच्छिन्नं चैतन्यमिति द्विगुणीकृतचैतन्ये कार्यमिति तेनाद्विगुणत्वम् कूटस्थचैतन्य
सम्बन्धासकश्चिदाभासश्चेति द्विगुणं चैतन्यमस्ति ॥ तत्रोपपत्तिमाह ॥ यतो द्विगुणं चैतन्यमस्ति ततः
सर्वथैव तयोः संयोगः तत्रवृत्तिविशेषयमयिकं च ततः इति शेषः ॥ ननु चापि घटादौ ज्ञातताज्ञातता

कृत्स्नदिक्क्रियविक्रिये जायेते नश्यतो विलाः ॥ सर्वत्रापि विलीयेते ह्यात्मन्येकसमाधिषु ॥ ३०
संयोगो विलयस्तेनाभावाश्चावभासिता ॥ निर्विकारेण येनासौ कूटस्थ इति चोच्यते ॥ ३१
घटे द्विगुणचैतन्ये यथा बाह्ये तथान्तरे ॥ वृत्तिष्वपि ततः तत्र वैशद्यं संधिषूदितम् ॥ ३२ ॥ ज्ञा-
तताज्ञातते न स्तो घटवद्वृत्तिषु क्वचित् ॥ स्वस्य स्वेनागृहीतत्वात्ताभिश्चाज्ञाननाशनात् ॥ ३३

वभासकत्वेन कूटस्थः किं नेष्यते इत्याशंक्य ॥ तत्र ज्ञातताद्यभावादेवेत्याह ॥ ३३ ॥ तत्रोपपत्तिमाह ॥
स्वस्येति ॥ तासां वृत्तीनां स्वस्य स्वप्रकाशत्वेन ज्ञानव्याप्तिर्नास्ति ॥ ताभि-
स्ताभिर्ज्ञानव्याप्तिभ्यां ज्ञातताज्ञातते न भवतः ॥ वृत्तीनां स्वस्वप्रकाशत्वेन ज्ञानव्याप्तिरपि नास्तीत्यर्थः ॥ ननु कू-
टस्थतेऽभिः स्वात्मनि मात्रेण स्वगोचरा ज्ञानस्य निवर्तितत्वाद् ज्ञानस्य व्याप्तिरपि नास्तीत्यर्थः ॥ ननु कू-
टस्थकूटस्थचिदाभासयोरपि चित्त्वे समाने ॥ एकस्य कूटस्थत्वमपरस्य न कूटस्थत्वमित्येतत्कुत इत्या-
शंक्य ॥ चिदाभासनिष्ठयोर्जन्मनाशयोरनुभूयमानत्वादस्याकूटस्थात्कूटस्थत्वमितरस्य विका-
रित्वे प्रमाणाभावात्कूटस्थत्वमित्याह ॥ २३ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यातिसंपाद्यविषयविवृतिः ॥ २० ॥ बुद्धिकृतवयोः स्वप्नकालावधिनंतवे ॥ २८ ॥

150

151

१७

विताब्रह्मचैतन्येनेत्यर्थः ॥ चिदाभासस्य कुंभमात्रनिष्ठफलत्वप्रतिपादनार्थमाभासेन सह वृत्त्येकः स्फुरेदजोऽस्तित्य
र्थः ॥ कुंभस्य चिदाभासव्याप्तोऽभयभास्यत्वमित्याह ॥ ९ ॥ यतो वृत्तस्य ब्रह्म चिदाभासोभयभास्यत्वात् कुंभे
ज्ञाततेन हि गृह्णाति चैतन्ये भाति ॥ नन्विदमेव चेत् ज्ञाततावभासकं चैतन्यमेवास्तु किं केनोक्तं तेन स्वच्छ क्रियत इ
त्याह ॥ यथा दिनि यथा कंसमन्तरेव ब्रह्म चैतन्यमप्येवास्ति किंकाश्रुत्तव्याख्यायां व्याख्याता नाकदेशाज्ञविनियोज
ना ॥ स्वयं चेद्वज्ञातो घटइति व्यवहारभेदादपि चिदाभासव्याप्तत्वमपि दोषवनात्मव्यत्याह ॥ वेदापमिति ॥ ९ ॥
देहादहं द्वि चिदाभासव्याप्ततो विविच्यते यथा तथा देहात् तः चिदाभासकृदस्थो विवेचनीय इत्याह ॥ या

धीवृत्त्याभासकूटस्थैर्व्याप्तो घटः एवं विना ॥ कुंभमात्रफलत्वाल्लेकमाभासतः स्फुरेत् ॥ ९
चैतन्ये हि गुणं कुंभे ज्ञाततेन स्फुरत्यतः ॥ अमेनेव्य व साख्यालयमाङ्रे तत्र यथोदिते ॥ ९ ॥ चैतन्य
मिति यावद्विक्रियाभासमप्रसारितः ॥ चिज्ञातो ऽवदश क्रियेव लाभप्रमाणे भवेत ॥ ९ ॥ आभासः
व्याप्तो दे देहादिर्थं हि विवित ॥ नहदाभासकूटस्थौ विविच्येते तथा पि ॥ ९ ॥ अहंवृत्तो चिदा
भासः कामक्रोधादिका स्वव ॥ संव्याप्य वर्तते तद्वन्मेनो देवज्ञिये यातथा ॥ ९ ॥ कुम्भाद्भाष
येतमेलो दंता यतकदाचन ॥ एवमाभासमहितमात्र यः स्वयमाषिका ॥ ९ ॥

भासवह्नेति ॥ नन्विदं देहादि हि चिदाभासव्याप्यत्वदाकारवृत्ति विषयत्वेन विषयगोचरत्वमाभावात् क
येतश्चापकश्चिदाभासोऽभ्युपगमनत्व्याख्यातव्यः ॥ विषयगोचरत्वमभावे एवइमादिह विज्ञाताः ।
द्यापकश्चिदाभासोऽभ्युपगमे शंकतेति सदृष्टान्तमाह ॥ ९ ॥ अहमादिवृत्तीनामेव चिदाभासभास्यत्वे
दृष्टान्तप्रपंचेनेत्यहयति ॥ ९ ॥ एवं चिदाभासस्थमात्रकूटस्थस्य रूपं अत्राह यथेति तद्विषयोगिनेहत्वा ।

फलितमाह ॥ यतः केवलाद्यात्रैदृश्येनैव जननात्मकमर्थं नमतः कुंभे चिदाभासलक्षणस्य फलस्य जीना वि
देवज्ञाततेनाभ्युपसिद्धमित्यर्थः ॥ नन्वत्रापि चिदाभासोऽनुकल्पनीयः अत्र वेदान्त्येव फलमव्रता
दिन्याशंक्याह ॥ ब्रह्मचैतन्येऽपि फले वचारिस्फुरणे न भवतीति कुतः स्वतन्त्र आह ॥ मानामायाविमानमह
तः एवं सर्वविषयासम्बन्धात् ॥ फलस्वत तदुभयज्ञाना प्रमाणाद्विकिम्भवः ॥ ननुविदं पराणार्थप्रमेय
विद्यादिहरे वार्तिके कवि रुद्धमिव्यायोऽनव ॥ नन्विद्धत्वामभिन्नत्वदेवोपयोमितियोरितितवरिति ॥ ९ ॥ अस्या
वायमर्थः पराणार्थः वाह्याविषयाः न पराणार्थेन प्रमेयेषु प्रमाणा विषयेषु सत्स्वपि प्रमाणफल
वेनाभ्युपगतानामिति दविदितानिमेवेदान्तसायनाद्वेदान्ते नोक्तिप्रमाणतः वेदान्तवाक्येन ब्रह्म प्रमाणेनमेयो

ज्ञानत्वेनाम ऊंभेनव चिदाभासफलोदयः ॥ नफलेब्रह्मचैतन्यं मानात् ब्रह्मापि सत्वतः ॥ ९ ॥
पराणार्थप्रमेयेषु या फलत्वेन संमता ॥ संवित्सैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणतः ॥ ९ ॥
तिवार्तिककारेण चित्ताटर्पणे विवृतिते ॥ ब्रह्मविन्फलयोर्भेदः साहस्रविप्रहतोयतः ॥ ९ ॥
आभासउदितस्तस्माज्ज्ञानत्वेजनयेदटे ॥ नत्स्न चैतन्यमाभास्यमज्ञानत्वं वदेवहि ॥ ९ ॥

यो ज्ञातत्वोर्थः रत्यनेन वार्तिकेन ब्रह्म चैतन्यसदृशः चिदाभासः प्रमाणफलत्वेन विवक्षितो न ब्रा
ह्मचैतन्यमितिभावः वार्तिककारवागसी दृशी विवक्षेति ज्ञातोऽवगान्तव्याशंक्य ॥ नत्त्रकोभिः श्री
मदाचार्यैरुपदेशसाहस्र्यां ब्रह्मचैतन्यचिदाभासयोर्भेदस्य प्रतिपादितत्वादित्याह ॥ ९ ॥ ब्रह्मवि
त्फले च ब्रह्मवित्फलेतयोर्विवित्तिग्रहः एवं सतिप्रकृते किमायातमित्यत आह ॥ ९ ॥ यस्माद्ब्रह्मवि
त्फलयोर्भेदः सिद्धस्तस्माद्घटे उदित उत्पन्न आभासस्तत्र घटे ज्ञातत्वं जनयेत् ॥ उत्पन्नं ज्ञातत्वं पुन
रज्ञातत्ववत् ब्रह्मणेव भास्यं भवतिहि प्रसिद्धमित्यर्थः ॥ एवं ब्रह्मचिदाभासयोर्भेदस्य प्रतिपादितेवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

चिदाभासान्तधीवृत्तिः चिन्मात्राभासः चिदाभासः चिद्यतीति चित् सोऽन्तेऽवयवो भागो यस्याः साधीवृत्तिर्ज्ञानमि
त्युच्यते बोधेद्वावुद्दिश्य वार्तिकेऽभिधानात् तत्र दृष्टान्तः लोहान्तकुन्तवदिति जाड्यमत्र तः स्फुलिङ्गरहितत
मज्ञानमित्युच्यते एताभ्यां पर्यायेण व्याप्तः सर्वतः संबद्धः कुम्भो ज्ञातोऽज्ञात इति बोध्यत इत्यर्थः नन्वज्ञा
तस्य कुम्भस्याज्ञानव्याप्ततादृशवत् चिदाभासस्यापि ज्ञानव्याप्तस्य ज्ञातस्य कुम्भस्य कुन्ताग्रस्थितस्या
वभासस्य तत्सिम्भाशंका ज्ञातस्याज्ञातस्य ज्ञातता ज्ञाननेनैव ज्ञातस्यापि ज्ञातता ज्ञानमात्रोपलीनाः ज्ञातं कुं
भवतु ज्ञातस्यापि चिदाभासत्वं भवतीत्याह ॥ अज्ञातेति ॥ यथाज्ञातकुम्भो ब्रह्मणा भास्यः तथा ज्ञातः

चिदाभासान्तधीवृत्तिः ज्ञानं लोहान्तकुन्तवत् ॥ जाड्यमज्ञानमेताभ्यां व्याप्तः कुम्भो द्विधोच्यते ॥ १ ॥
अज्ञातो ब्रह्मणा भास्यो ज्ञातः कुम्भस्तथा न किम् ॥ ज्ञातत्वजननेनैव चिदाभासपरिक्षयः ॥ २ ॥ आ
भासहीनया बुद्ध्या ज्ञातत्वं नैव जन्यते ॥ तादृग्बुद्धेर्विशेषः को मृदादेः स्याद्धि कारिणः ॥ ३ ॥
ज्ञातत्वं जायते कुम्भे मृदालिप्तेन जायते चेत् ॥ धीमात्रव्याप्तकुम्भस्य ज्ञातत्वं नेष्यते तथा ॥ ४ ॥

कुम्भो किं ब्रह्मणावभास्यो न भवति ॥ किं न भवत्येवेत्यर्थः कुत इत्यत आह ॥ ननु ज्ञातता जननता यान्ता
न मिव ज्ञातता जनननामायापि बुद्धौ ज्ञाते किमते न चिदाभासेनेत्याशंका ॥ चिदाभासरहितया बुद्ध्या
दिवदप्रकाशरूपेण ज्ञातता जननं नैव संभवतीत्याह ॥ ३ ॥ चिदाभासरहितबुद्धिव्याप्तस्य घटस्य ज्ञातता
भावे दृष्टान्तप्रदर्शनेन स्पष्टयति ॥ ४ ॥ लोके कुम्भविषये घटः मृदा प्रकारकरूपया लिप्तोऽपि न प्राप्नोति ज्ञात
इति तथा अन्यथा ॥ तथा चिदाभासरहितबुद्धिव्याप्तस्यापि कुम्भस्य ज्ञातत्वं नाभ्युपगन्तव्यमिति भावः ॥

इदानीं दृष्टान्तः घटस्य चिदाभासधीभेदप्रदर्शनाय देहादिष्वपि चिदाभासब्रह्मणी विभज्य दर्शय
ति ॥ १ ॥ घटैकाकारधीस्था चिदिति ॥ घटस्यैकाकारवदाकारो यस्याः सा घटैकाकारा तया धियि स्थिता व
र्तमाना या चिदाभासो घटमेकमेवावभासयेत् ॥ न स्पष्टं घटस्य ज्ञातता व्याप्यमेवज्ञा ज्ञातता ज्ञानं इति व
ह्वाह ॥ ५ ॥ घटस्य ज्ञातता ब्रह्मचैतन्येन ब्रह्मचैतन्येनाधिष्ठानभूतेनावभास्यते प्रकाश्यते इत्यर्थः ॥
न तु ज्ञानतावभासकं चैतन्यं नैव इत्यनीतिसंभवाद्बुद्धिः किमर्थमाशंक्य ॥ घटस्य ज्ञातताद्

चिदाभासविशिष्टानां तथानेकधियामसौ ॥ संधिं धियामभावं च भास
यन्प्रविविच्यताम् ॥ ६ ॥ घटैकाकारधीस्था चिद्घटमेवावभासयेत् ॥ घटस्य
ज्ञातता ब्रह्मचैतन्येनावभासते ॥ ७ ॥ अज्ञातत्वेन भातोऽयं घटो ब्रह्मस्फुरण
सदा ॥ अग्रतो वा परिष्टात्तु ज्ञातत्वेनैव सोऽभिदा ॥ ८ ॥ ॥

भेदः सिद्धोऽर्थस्त्याह ॥ अज्ञातत्वेनेति ॥ ७ ॥ बुद्ध्युद्भवात्पूर्वं ब्रह्मणैवाज्ञातत्वेन प्रकाशितो ॥ बुद्ध्यु
त्पन्नोऽस्मात्ज्ञातत्वेन ब्रह्मणैव प्रकाश्यते ॥ इतीयाने वबोधो नाम्य इत्यर्थः ॥ नन्वेकस्यैव घटस्य ज्ञा
तत्वाज्ञातत्वलक्षणं द्वैरूप्यं कथं संभवतीत्याशंक्य ॥ तद्द्वयबोधनाय ज्ञातता ज्ञातता निमित्त
योर्ज्ञानाज्ञानयोः ॥ स्वरूपं तावद्दर्शयति ॥ ८ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मस्य मोक्षसाधनस्य ब्रह्मात्मैकत्वज्ञानस्य तत्पदार्थशोधनपूर्वकत्वात्तत्पदार्थशोधनपूर्वकं कूटस्थ-
दीपाख्यं ग्रन्थमारभमाण आचार्यो ग्रन्थस्य वेदान्तप्रकरणत्वेन तदीयैः प्रवृत्तिविषयादिभिः तद्वत्त्वसिद्धि-
मभिप्रेत्य तत्पदलक्ष्यवाच्यौ कूटस्थजीवौ सदृष्टान्तं भेदेन निर्दिशति ॥ आदित्यदीपितेत्यादिना ॥ आदित्य-
शब्दस्यादित्यस्यार्थः ॥ तेन च तस्मिन्नेव आलोको लक्ष्यते ॥ तेन दीपिते प्रकाशिते कुड्ये दर्पणादित्यदीप्तिव-
त् ॥ दर्पणो हि निपतत्पर्यायो हेतुः कुड्यसंबन्धिभिरादित्यरश्मिभिः तत्प्रकाशनमिव कूटस्थभासितः कूटस्थेना-
विकारित्वेन तेन भासितः प्रकाशितो देहो धीस्थजीवेन बुद्धिस्थचिदाभासेन भास्यते प्रकाश्यते ॥ अनेन
सामान्यतो विशेषतश्च कूटस्थावभासकादित्यप्रकाशद्वयमिव देहावभासकं चैतन्यद्वयमस्तीति प्रति-

आदित्यदीपिते कुड्ये दर्पणादित्यदीप्तिवत् ॥ कूटस्थभासितो देहो धीस्थजीवेन भास्यते ॥ १ ॥
अनेकदर्पणादित्यदीप्तीनां बहुसन्धिषु ॥ इतरा बाध्यते तासामभावेऽपि प्रकाशते ॥ २ ॥

ज्ञातं भवति ॥ ननु तत्र दर्पणादित्यदीप्तिव्यतिरेकेणादित्यदीप्तिर्नोपलभ्यत इत्याशंक्य ॥ ताभ्यस्तां
विभज्य दर्शयति ॥ १ ॥ यथानेकानेकदर्पणजन्याः कुड्ये तत्र तत्र मण्डलाकारा विशेषदीप्तयः अनेके तासां
संधौ मध्ये देशे तासां सामान्यप्रकाशरूपादित्यप्रभा भासते ॥ अभिव्यक्तोपलभ्यते ॥ तासां दर्पणजन्य-
प्रभाणामभावे दर्पणापगमादिना सत्येव स्वयं सर्वत्र प्रकाशते ॥ दृष्टान्तसिद्धमर्थं दार्ष्टान्तिके योजं-
यति ॥ यथा तेनैव प्रकारेण चिदाभासविशिष्टानां चित्तवृत्तिविशेषरूपाणामनेकधियामनेकानां बुद्धि-
वृत्तीनां संततानादिशक्त्याभ्यानां संधिमध्यकाले जाग्रदादौ धियां तासां प्रलये बुद्धिवृत्तीनामभावे च
सुषुप्त्यादौ भासकत्वेन प्रकाशमानः सोऽपि कूटस्थः प्रविविच्यतां ॥ नामभेदेन ज्ञायतामित्यर्थः ॥ २ ॥

अज्ञाननिवृत्तिफलं कृतकृत्यत्वं प्राप्यप्राप्तत्वं च दर्शयति ॥ धन्योऽहमिति ॥ २९३ ॥ इदानीं कृतकृत्यत्वप्र-
प्त्यादिनानाकारेः निरतिशयत्वमाह ॥ अतः परं वक्तव्याभावान्नान्यद्विद्वत्परिक्षव्येति निर्दिश-
ति ॥ २९४ ॥ अस्य सर्वस्य कारणभूतपुण्यपुञ्जस्य परिपाकमनुस्मरन्नत्यन्तं नृत्यतीत्याह ॥ २९५ ॥ एवंविधपुण्य-
संपादकं शास्त्रं ज्ञानं चानुस्मरन्नत्यन्तं हृष्यति ॥ २९६ ॥ इदानीं सम्यक्ज्ञानसाधनं शास्त्रं ज्ञानं तदुपदेष्टारं गुरुं
चानुस्मरन्तृप्यति ॥ तत्फलभूतं ब्रह्मज्ञानं तज्जन्यं सुखं चानुस्मरन्नृत्यति ॥ ग्रन्थाभ्या-

धन्योऽहं धन्योऽहं कर्तव्यं मे न विद्यते किंचित् ॥ धन्योऽहं धन्योऽहं प्राप्तव्यं सर्वम-
द्य संपन्नं ॥ २९३ ॥ धन्योऽहं धन्योऽहं तृप्तेर्मे कोपमा भवेल्लोके ॥ धन्योऽहं धन्योऽहं धन्यः
पुनः पुनर्धन्यः ॥ २९४ ॥ अहो पुण्यमहो पुण्यं फलितं फलितं दृढं ॥ अस्य
पुण्यस्य संपत्तेरहो वयमहो वयं ॥ २९५ ॥ अहो शास्त्रमहो शास्त्रमहो गुरुरहो गु-
रुः ॥ अहो ज्ञानमहो ज्ञानमहो सुखमहो सुखं ॥ २९७ ॥ तृप्तिदीपमिमं नित्यं ये
ऽनुसंदधते बुधाः ॥ ब्रह्मानन्दे निमज्जन्तस्ते तृप्यन्ति निरंतरं ॥ २९८ ॥ इति तृप्ति-
दीपाख्यं सप्तमं प्रकरणं ॥ ७ ॥

सफलमाह तृप्तिदीपमि- ति ॥ २९८ ॥ मोहानीलतो विस्तरेण निरूपितः

हितो मोहसंज्ञानं तृप्तिः सा तीक्ष्णतेन तज्जन्यप्रतिफलितत्वजीयते सोऽप्रमाता ॥ कूटस्थः प्रमा-
णफलेऽप्यपि विषयाणां हृत्तिसंबन्धमवेक्ष्य पापिपिमोहोऽस्य शान्तश्च प्रमाणविषयतः स्वात्मा स्वयं परात्मा
इति श्रीपरमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्य-
विदुषा विरचिता तृप्तिदीपव्याख्या सप्तमं प्रकरणं ॥ ७ ॥ ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ

कूटस्थदीपव्याख्या... ॥
१०

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

158

एवमाचरणे निमित्तमाह येनायमिति ॥ अयमज्ञानी अज्ञात्मिलोके विरुद्धायेन यादृशेन नष्टेनाचा-
रेण नष्टु यत्ते तत्तमवगच्छतिति दाचरणेनेन कर्तव्यमेव तर्हि तदृश्वकार्यं न रमपि प्रसक्तेनेतनत आह
अज्ञप्रबोधायेति ॥ यतस्तहि सत्त्वविदः अत्र लोके अज्ञप्रबोधायाद्य स्वकर्तव्यं नैवास्मनस्तदन्तसोयेन न
बोधनं कर्तव्यमित्यर्थः ॥ ९१ ॥ तत्त्ववेत्तिष्ठ साधनयोस्तामर्थमाह ॥ कृतकृत्यतयेति ॥ असौ विद्वान्सर्वो
प्रकारेण कृतकृत्यतया कृतकृत्यानावेयेनासौ कृतकृत्यस्तस्य भावस्तया तया तथा नसः स न व सम्यग्ज्ञा
प्रकारेण प्राप्तप्राप्यतया प्राप्तप्राप्येयेन सः प्राप्तप्राप्यस्तस्य भावस्तत्ता तया तत्त्वपन्नरूपो भवन्न स्वमन

येनायं नष्टेनानाच्छ्रुतेते कार्यमेव तत्तत् ॥ अज्ञप्रबोधाद्वैवान्यत्कार्यमस्त्यत्र तद्विदः ॥ ९१ ॥ कृ-
तकृत्यतया तृप्तः प्राप्तप्राप्यतया पुनः ॥ तृप्यन्नेवं स्वमनसा मन्यतेसौ निरंतरं ॥ ९२ ॥ धन्योहं
धन्योहं नित्यं स्वात्मानमञ्जसा वेद्मि ॥ धन्योहं धन्योहं ब्रह्मानंदो विभाति मे स्पष्टं ॥ ९४ ॥ धन्योहं
धन्योहं दुःखं सांसारिकं न वीक्षेद्य ॥ धन्योहं धन्योहं स्वस्याज्ञानं पलायितं क्वापि ॥ ९५ ॥

सा निरंतरमेवं मन्यते ॥ ९३ ॥ किमभ्यतस्तन्यत आह ॥ धन्योहमित्यादिना ॥ धन्यः कृतार्थः आत्मार्थे विद्या-
नित्यमनवरतं स्वात्मानं स्वरूपानिजं अंजसा यथावत् अविद्वेत्प्रभ्रामास्मनो ब्रह्मसाक्षात्कारोऽत्र विज्ञाना-
म्यतोयमस्मदर्थः ॥ एवमात्मनत्त्वाभविनिश्चिन्तो न हि संसारिधर्मा यत्तस्मात्त्वमात्मनिमित्तो नहि दर्शयति ॥ ध-
न्योहमिति ॥ ब्रह्मानंदः ब्रह्मभवानंदः मे स्पष्टं विभाति स्पष्टं यथा भवति तथा स्फुरतीत्यर्थः ॥ ९४ ॥ एवं-
विधस्यास्मानहमिमधियायानिष्टनिवृत्तिमापितप्राप्त्या आह ॥ धन्योहमिति ॥ अद्येदानीं इत्येव दुःखं स्वरू-
पं संसारं नवीक्षे न पश्याम्यतः कृतार्थोस्म्यर्थः ॥ दुःखापत्तिनीकारणमाह ॥ धन्योहमिति ॥ अनेक

159

तर्हि ज्ञानिवदज्ञानिनोपि प्रवृत्तानावाप्स्यंते नेत्याशंक्याह प्रवृत्तानादेति ॥ ८५ ॥ विद्वद्वाग्देशेन प्रवृ-
त्तस्तुतं ॥ तर्हि किं स्थितिमध्ये वर्तमानेन तेन किं कर्तव्यमित्यत आह ॥ विद्वानिति ॥ विद्वान्स्वात्मदृशोक-
स्थितिमध्ये तिष्ठन्नेव तदनुरोधतस्तेषामनुसारेण शरीरादिभिः सर्वाः क्रियाः करोत्येव तन्नाकस्थितो
न निवारयेदित्यर्थः ॥ ८७ ॥ अस्यैव तत्त्वबुभुत्सूनां मध्ये वर्तितस्य कृत्यमाह ॥ एषमध्य इति ॥ एषवि-
द्वान्बुभुत्सूनां मध्ये यदा तिष्ठेत्तदा पृथग्बुभुत्सूनां बोधाय तत्त्वं तान्जनान्प्रति ताः क्रियाः दूषयन्स्वय

दृष्टं नावाग्देश्या यो बोधहीनस्य सर्वथा ॥ स्वर्गाय वापवर्गाय पतितत्वं नयोग्यमि ॥ ८६
विद्वान्वेदस्तादृशो मध्ये तिष्ठन्नरदुरोपत ॥ कायेन मनसा वाचा करोत्येवाखिलाः क्रियाः ॥ ८७
एषमध्ये बुभुत्सूनां यदा तिष्ठेत्तदा पुनः ॥ बोधाय तेषां क्रियाः सर्वाः दूषयन्स्वजनस्वयं ॥ ८८
अविद्वदनुसारेण हि निर्दृष्टस्पृज्यते ॥ स्तनंधयानुसारेण वर्तते तत्पिता यतः ॥ ८९ ॥ अधि-
क्षिप्तस्ताडितो वापि बालेन स पिता तदा ॥ न क्लिश्नाति न कुप्येत बालं प्रत्युत लालयेत् ॥ ९० ॥
निंदितस्तूयमानो वा विद्वानज्ञैर्न निंदति ॥ न स्तौति किंतु तेषां स्याद्यथा बोधस्तथाचरेत् ॥ ९१ ॥

मपित्यजेत ॥ ८८ ॥ कृत एवं कर्तव्यमित्यत आह ॥ अविद्वदनुसारेणेति ॥ अज्ञान्यनुसारेण ज्ञानिनो वर्त-
नं तु चितं कृपालुत्वात्तेषामनुकंपनीयत्वाच्चेति भावः ॥ एवं कुतो दृष्टमित्यत आह ॥ स्तनंधयानुसारेण
ति स्तनंधयाः स्तनपानकर्तारः शिशवस्तदर्थः ॥ ८९ ॥ पिता स्तनंधयानुसारित्वमेव दर्शयति ॥ अधि-
क्षिप्तस्ताडितो वेति ॥ ९० ॥ दार्ष्टान्तिके योजयति ॥ निंदित इति ॥ विद्वानज्ञैर्निंदितः स्तूयमानो वा
येन निंदति न स्तौति ॥ किंतु तेषामज्ञानिनां यथा बोध उपजायते ॥ तथाचरेत ॥ ९१ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

तत्र विद्यायां बाधितत्वेऽपि तत्कार्यस्य प्रतीयमानस्य बाधितत्वासंभवात्तेन बोधस्य बाधो भवेदित्याशंक्योपादाननिवृत्तिवत्तस्यापि बाधितत्वाज्ञ्ञेनापि बाधः शंकितुं शक्यत इत्याह ॥ बाधितमिति ॥ तत्र दृष्टांतमाह ॥ जीवन्मुक्तेरिति ॥ प्रारब्धमेषक ॥ ४१ ॥ देहदर्शनं तत्त्वबोधस्य बाधाभावे कैमुतिकन्यायप्रदर्शनेन दृढयितुं तत्र नकुलेन दृष्टांतमाह ॥ गृहीतेति ॥ यः समर्थः पापयत्ताज्ञोऽपि विद्यायां निमग्नो भवति किंलक्षणः फलेषु वितृष्णाज्ञानस्य हितेषु वेदेषु परिचितेष्वहसत्त्वेति ॥ नापि प्राप्यते मत्र काप्रमाप्रमाणेनान्यो स्थिरस्य ॥ ४२ ॥ दृष्टांतसिद्धमर्थं दार्ष्टांतिके योजयति ॥ आदावितिश्रादौ विद्याभ्यास

बाधिते दृष्टपतनासत्त्वे स्नेऽवबोधेन शक्यते ॥ जीवन्मुक्तिर्न मार्जारैर्दृष्टिरव्याहतार्थसङ्गतः ॥ ४३ ॥
अपि पापरूपतायोगेऽत्र विद्वत्त्वमेव समाददः ॥ निःफलेषु वितृष्णोऽयं सत्तां मत्र कास्पृमा ॥ ४४ ॥
आदावविद्यया चित्रैः स्वकार्यैर्जृम्भमाणया ॥ युध्यमानो बोधः पश्चाद्बिद्यया दृढो वा प्रातःकथम् ॥ ४५ ॥
तिष्ठन्तु तानि कार्याणि बोधेनाविलाः ॥ न भीतिर्बोधसम्राजः कीर्तिः प्रत्युत तस्य ताः ॥ ४६ ॥
य एवमतिशूरेण बोधेन न वियुज्यते ॥ प्रवृत्त्या वा निवृत्त्या वा देहादिगतयास्य किं ॥ ४७ ॥

सम्यग्वितेवक्रविधैः तत्कार्यैः प्रमादतः तत्तत्कर्मभिर्जृम्भमाणया विवर्धमानया तया विद्यया बोधो युद्धा युद्ध्यमानः श्रवणादिभ्यां समुपासित्वा तन्मननादिभ्यां समाप्रयत्नेन स दृढो भवति तदा नीरविद्यानिवृत्तो सत्यां निर्मूलेन तत्कार्याणां प्रत्यासेन कथं बाधयितुं कथमपि बाधयितुं समर्थः ॥ ४८ ॥ उपपादितमर्थं श्रोतृबुद्ध्यारोहाय प्रपञ्चकारेणाह ॥ तिष्ठन्त्विति भवन्तु वेदनालेश कमीमायातनिमित्ततयाह ॥ य एवमिति ॥ यः प्रमाणेन सम्यक् प्रकारेणातिशूरेण विद्यातत्कार्यवातकेन बोधेन प्रज्ञालिकत्वाभ्यां न वियुज्यते न कदापि वियुक्तो भवति ॥ तस्य पुंसो देहादिनिष्ठया प्रवृत्त्या वा निवृत्त्या वा किं न किमपीष्टमनिष्टं वेत्यर्थः ॥ ४९ ॥

ऽतः पविहाय्यतमित्याशंकाम्निविषयकत्वदृष्टान्तेनाद्याह ॥ यं कर्मीत्यादिना ॥ कर्मीति सात्विकं कर्मानुष्ठानोपयोगी देहदेवाकर्तृज्ञानिविष्कं प्रत्ययात्मानं न विजानाति तत्त्वविद्वान् तस्य ब्रह्मत्वं बुद्धेकाभिमाः कर्मानुष्ठाने किं हीयते ॥ ५० ॥ देहेति जानन्निर्णीमिथ्यात्वबुद्ध्यापरित्यक्ताभिर्देहवान्बुद्धिभिः कर्मानुष्ठाने जानिनो वा किं हीयते ॥ अतो निर्विषयकत्वदाविणः परित्यक्तो यत्नमित्यर्थः ॥ ५१ ॥ कर्मानुष्ठाने प्रयोजनस्याभावात्तज्ज्ञानिनोऽप्रवृत्तावप्यतत्त्वत इति शंकते प्रवृत्तिरिति उपयोगाभावे निवृत्तावपि समानत्वं परिहरति निवृत्तिरिति निवृत्तेरवि देहत्वाज्ञोपयोगाभाव इति शंकते बोधहेतोरिति ॥ तर्हि प्रवृत्तिरेव

यं कर्मीन विजानाति साक्षिणं तस्य तत्त्ववित् ॥ ब्रह्मत्वं बुध्यतां तत्र कर्मिणः किं विहीयते ॥ ५२ ॥
देहवान्बुद्ध्यमानस्तु जानन्नाटतवृत्तिनः ॥ कर्मी प्रवर्तयत्वाभिज्ञोऽनितो हीयते तु किं ॥ ५३ ॥
प्रवृत्तिर्नोपयुक्ता चेन्निवृत्तिः कोपयुज्यते ॥ बोधहेतुर्निवृत्तिश्चेद्बुभुत्सायां तथेतरा ॥ ५४ ॥
बुद्धश्चेन्न बुभुत्सेत नाप्यसौ बुध्यते पुनः ॥ अबाधादनुवर्तेत बोधो नान्यस्य साधनात् ॥ ५५ ॥
नाविद्या नापि तत्कार्यं बोधं बाधितुमर्हति ॥ पुरैव तत्त्वबोधेन बाधिते ते उभे यतः ॥ ५६ ॥

पि बुभुत्साहेतुत्वादुपयोगावलोक्याह ॥ बुभुत्सायामिति ॥ ५८ ॥ ननु बुद्धस्य बुभुत्साभावात्प्रवृत्तेरनुपयोगित्वमिति पुनः शंकते ॥ बुद्धश्चेदिति ॥ तर्हि बुद्धस्य पुनर्बोधाभावात्तद्धेतुनिवृत्तिरपि बुद्धेऽप्रत्युपयोगिनी स्यादिति ॥ नाप्यसाविति ॥ सकृज्ज्ञातस्य बोधस्य स्थिरत्वात्प्रतिवृत्तिर्निरपेक्षस्तत्स्थायाशंक्य स्थिरत्वे बाधकाभावमपेक्ष्यते ॥ न साधनान्तरमित्याह अबाधादिति ॥ बाधकप्रमाणाजन्यस्य ज्ञानस्य बलवत्प्रमाणेन बाधाभावादनुवृत्तिः स्यादेवातो न साधनान्तरं तदर्थमपेक्ष्यमित्यर्थः ॥ ५९ ॥ ननु प्रमाणेनानैरपि बाधाभावेऽप्यविद्यातत्कार्येण कर्तृत्वाध्यासेन बाधः स्यादित्याशंक्याह ॥ नाविद्येति ॥ तत्र हेतुमाह पुरैवे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

160

161

नि॰ ८०॥

९९

ननु समाधिफलमनुभवः संपादनीय इत्याशंक्य ॥ न समत्वस्य फलान्तरं संपाद्यमस्तीत्याह ॥ अपाकृ-
ते कृतं कृतमनेनेति गमयति ॥ एवं सर्वेषु कर्तव्यानभ्युपगमे नियतवृत्तिं प्रसंगेन त्याशंक्य ॥ प्रारब्धव-
शात्प्राप्तमनियतवृत्तिमंगीकरोति ॥ व्यवहारयन्ति ॥ लौकिको भिक्षाटनादिर्वा शास्त्रीयो जपसमा-
ध्यादिः स यथापि व्याप्नोति सिद्धं हि सादर्शं व्यवहारः कर्तृत्वभोक्तृत्वरहितस्य समस्यारब्धं कर्मानतिक्र-
मप्रवर्तनात्सिद्धत्वः ॥ ७० ॥ एवं ज्ञानिनमभिधाय शोधवादेनाहमथवेति ॥ लोकानुग्रहकाम्यया शा-

विक्षेपो नास्ति यस्मान्मे न समाधिस्ततो मम ॥ विक्षेपो वा समाधिर्वा मनसः स्याद्विकारिणः ॥
नित्यानन्दस्वरूपस्य कोऽसौ चात्रभवः पृथक् ॥ कृतं कृत्यं प्रापणीयं प्राप्तमित्येव निश्चयः ॥ ७१ ॥ व्यवहा-
रो लौकिको वा शास्त्रीयो वान्यथापि वा ॥ ममाकर्तुर्लेपहीनस्य यथारब्धं प्रवर्तताम् ॥ ७२ ॥ अथवा
कृतकृत्योऽपि लोकानुग्रहकाम्यया ॥ शास्त्रीयेणैव मार्गेण वर्तेऽहं का मम क्षतिः ॥ ७३ ॥ देवार्च-
नस्नानशौचभिक्षादौ वर्ततां वपुः ॥ तारं जपतु वाक्तद्वत्पठत्वाम्नायमस्तकम् ॥ ७४ ॥ विष्णुं ध्या-
यतु धीर्यद्वा ब्रह्मानन्दे विलीयताम् ॥ साक्ष्यहं किंचिदप्यत्र न कुर्वे नापि कारये ॥ ७५ ॥ एवं च
कलहः क्व संभवेत्कर्मिणो मम ॥ विभिन्नविषयत्वेन नष्टयोः संभवेन्न तु ॥ ७६ ॥ वपुर्वाग्धी-
धुतिर्बुधः कर्मिणो नतत्साक्षिणि ॥ तानितः साक्ष्यलेपत्वे निर्विरोधेन गच्छति ॥ ७७ ॥ एवं
चान्योन्यमूढानामज्ञानां विवदन्तु वा ॥ विवदेतां तु इमं तो हमसन्देहविलोकने ॥ ७८ ॥

णानुग्रहेच्छयेत्यर्थः ॥ ७३ ॥ ननु शास्त्रीयमार्गेण वर्तमानो योगी कार्येतद्धितदभिमानप्रयुक्तो विका-
रः स्यादेवेत्याशंक्याह ॥ देवार्चनेत्यादिश्लोकद्वयेन ॥ तारं प्रणवं आम्नायमस्तकं वेदान्तवाक्ये ॥ ७५
कलिनस्याहकर्मिणीति ॥ ७६ ॥ विभिन्नविषयत्वमेव स्पष्टयति वपुरिति ॥ ७७ ॥ यथापि योज्ञानिकर्मि-

अज्ञानिनामज्ञानेन ज्ञानिनो ज्ञानेन कर्मणि विरोधोऽस्तीत्याशंकां परिहरति ॥ ततो मिथ्या अन्यथा वेति
मेशयवेतो मननं कुर्वते ॥ ममतत्त्वमबाध्यमानोऽसौ विशेषज्ञस्य तर्कः संभूतो श्रवणमनने विपर्यय
निरासायेति दिध्यासनं कर्तव्यमित्याशंक्य देहात्मप्रत्ययाभावात्तत्त्वावबोधस्य विपर्ययस्याभावात्तदपि नाव-
श्यमित्याह ॥ ८५ ॥ ननु विपर्ययाभावेऽहं मनुष्य इति व्यवहारः कथं स्यादित्याशंक्य ॥ वासनावशादनु-
वर्तत इत्याह ॥ ८६ ॥ तर्हि स्यात्व्यवहारस्यानिवृत्तिरिति ध्यानं संपाद्यमित्याशंक्य ॥ प्रारब्धक्षयं तदेकास्य

शृण्वन्तु ज्ञाननिष्ठा ये जानन्तु स्मरन्तु योऽस्म्यहम् ॥ मन्यन्तां संशयापन्ना न मन्येऽहमसंशयः ॥ ८५ ॥
विपर्यस्तो निदिध्यासेत्किं ध्यानमविपर्यये ॥ देहात्मत्वविपर्यासं न कदाचिद्भजाम्यहम् ॥ ८६ ॥
अहं मनुष्य इत्यादिव्यवहारो विनाप्यमुम् ॥ विपर्यासं चिराभ्यस्तवासनातोऽवकल्पते ॥ ८७ ॥
प्रारब्धकर्मणि क्षीणे व्यवहारो निवर्तते ॥ कर्मक्षये त्वसौ नैव शाम्येद्ध्यानसहस्रतः ॥ ८८ ॥
विरलत्वं व्यवहृतेरिष्टं चेद्ध्यानमस्तु ते ॥ अबाधिकां व्यवहृतिं पश्यन्ध्यायाम्यहं कुतः ॥ ८९ ॥

निवृत्तिर्नास्तीत्याह ॥ ८७ ॥ ननु प्रारब्धनिमित्तकस्यापि व्यवहारस्याविरलतायध्यानं कर्तव्यमेवे-
त्याशंक्य ॥ व्यवहारबाधकत्वदर्शनान्निवृत्तये ध्यानमनुष्ठेयमित्याह ॥ विरलत्वमिति ॥ ८८ ॥ ध्यानस्या
कर्तव्यत्वेऽपि विक्षेपपरिहाराय समाधिः ॥ कर्तव्य इत्याशंक्य ॥ विक्षेपसमाध्यानयोर्मनोधर्मत्वा
त्वविक्षेपनिवारकेऽपि समाधौ समाधिकारक इत्याह ॥ ८९ ॥ ॥ राम

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

श्रुतियोगिशूरः संस्प्रतियोगिनःसेयानन्दर्वकंयथाभवतिनथा॥एवंवसमाराकेमणसर्वरात्मप्रति॥
नदेवानसेयानेन्द्रपंचयतिरः॥विनोन्नाश्रयादिना॥कृतनकृतपतयानमः॥प्रामप्राप्तपापउनशंसेतेनशोक
नेनशेयेन॥तन्नतावदैहिकशास्त्रोविधियोवेलसाएपस्सप्रदर्यपति॥५५॥स्वर्गाद्यर्थंकर्मानद्यादपानवे
लसाएपमाह॥५०॥ननन्नार्थंप्रदृश्यभावेविपरार्थाप्रदृत्तिः॥किनस्यादित्याशंकायाधिकाराभावात्

नदेतत्कृतनकृतमनेनपतियोगिशूरः स्मरे॥यतनसंस्पदेवायमेवंनप्रतिनित्ययाः॥५२॥उः
खिनोत्माः संसारेनकामेषुरापपेतया॥परमानदस्वर्वेदंसंसरामिकिमिद्देया॥५३॥अ
नतिष्ठेनकर्माणिपरलोकाद्येयामवः॥सर्वलोकात्मकः कुस्मादनुतिष्ठामिकिंकथं॥५४॥
अप्रवदनतेतेषासाहाणिवेदानप्यापयंत्वन॥ येत्रापिकारिणोमेतनापिकारोस्किपनतः॥
निद्राभितेस्नानशौचेनेच्छामिनकरोमिच॥द्रष्टारश्चेत्कल्पयंतिकिंमेस्यादन्यकल्पनात्॥
५५॥गुंजापुंजादिदद्येतनान्यारोपितवन्हिना॥नान्यारोपितसंसारधर्मानेवमहंभजे॥५६॥

164

पिनास्तीत्याह॥५७॥नवसेदेहानिर्वाणंयेभिन्नाहस्याद्रिकंपरलोकार्थंस्नानादिकंचभवतात्किप
मातानपलभ्यतेनोकियतनमसिद्धमित्याशंक्य॥तदपिस्वदृष्ट्यानेवास्तिकिंतमयेनेवकालेनश्या
ह॥५८॥श्रमकल्पनयापिबाधोनास्तीत्याशंकानिदृष्टांतेनाह॥ननुफलांतरेच्छाभावेकर्मानुष्ठानेमा
भवतुसाक्षात्कारायश्रवणादितत्वानादिकंकर्तव्यमस्यास्तीत्याशंकायाहदृष्टकारादिकर्तव्यमपि॥

165

श्रवणादिनाफलनिहृत्यालोकमेहमशवणमीवमपनतथाप्यान्यात्मेपिनिनेनमोकेन
श्रवणाद्भ्यानशोकनिवृत्त्यभावेपिशमवत्स्थानिवेन्यासेवःतानकपरामभवात्मासैवशेदिभ्यासिनेचे
आत्मानेवद्विजानीयादहमस्मीतिपूरुषः॥किमिच्छन्कस्यकामायपरीरमनुसंज्वरेदित्यादिवसेनसम
परोत्यानशोकनिवृत्त्यावेजीवावस्येपिविदितेनशकः॥सिद्धांतेनश्रेयपानपरोक्षज्ञानेजीवन्मुक्तत्व
मेतन्निवनपामवस्याहृत्वालक्षेत्तनर्वकंपत्कामारभते॥५५॥किमिच्छन्निरूपयंनाभिहितेनायः
पाकमोलः सप्तनावलाशवतः [illegible] ऊडीचितन्नमिहितः॥पृथक्तृनालमाहनितलहृदिलेपश्यपरो
तर्थीः श्रपरोत्नमतिः पाकमो [illegible] नैविकाप्तन्नेनन्नोकेनाभिहिताज्ञसमसीवावस्थास्थ

शमयन्तोवथेनार्थदृश्यमः [illegible] यथा भोगेनशमयित्वेतत्याः स्थान्नक्यातेतया॥५५॥किमि
च्छन्निरिवाक्योकः शोकमो [illegible] श्रपितः आत्मासमाहावस्येपायशोदस्मित्तसमसी॥५६॥सो
ऽपाविपयेस्वमिरिपितमि [illegible] कृतेकृतेशापणीयेशमस्मिनेवनश्यति॥५७॥येदिका
मुष्मिकाद्यानसिद्धेभकेच्छा [illegible] वऊक्तांतउरामाभत्तनसर्वकप्रनाहतेव॥५८॥ हीत्याह सम

मोक्षाख्यायेतेश्वतिमोक्षः श्रुतेयोक्तुस्पाकाम्यायाहमेविषयांतरकामनयाऊदितत्वात्माऊपाकप्रति॥
योगिप्रदर्शनपूवः संप्रतिजानीन॥५९॥विषयलाभनन्यायाम्हमेविषयांतरकामनयाऊदितत्वात्मा॥
ऊपानेश्रुत्यानतर्भावाविवेकुशलनदेवदर्शयति॥कृतनकृतमवमेवोपपादयति॥६०॥श्रस्यविरुद्धःतत्व
तानोत्पादवंमिहलोकेपदृश्यामपे॥श्रनिष्टनिवृत्तयेचकृष्याणिज्यादिकमामुष्मिकभोगासिद्धये
यागोपासनादिकं॥मुक्तिसाधनज्ञानसिद्धयेश्रवणादिकंचेतिबहुविधकर्तव्यमासीदिदानींतमो
साविकफलेच्छाभावात् वर्णानुदमादात्काररूपासिद्धत्वाचेतत्सर्वंकृषिपागादिश्रवणादिकंकृत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कदाचिदहं मर्त्य इत्येवंविधेनाज्ञानोदयमात्रेणागमप्रमाणजनितं तत्त्वज्ञानं न बाध्यते कुतस्तत्राह
जीवन्मुक्तेति इदं मर्त्यत्वबुद्ध्युपाकरणलक्षणं जीवन्मुक्तिव्रतं नियमेनानुष्ठेयं न भवति किंतु सम्य
ग्ज्ञानेनाभ्रांतिज्ञाननिवृत्तिरूपं वस्तुस्वभावतः अतः कदाचिन्मर्त्यत्वबुद्ध्युदयेपि न तत्त्वज्ञानोत्तरण
तस्यापवाध्यत्वमिति भावः भवतु रज्जुसर्पादिस्थले विपरीतज्ञाननिवृत्त्या तत्कार्यकंपादेश्च
निवृत्तिः प्रकृतदृष्टांते दशमस्त्वमसीति वाक्यविचारजन्यज्ञानेन भ्रमनिवृत्तौ तत्कार्यनिवृत्तौ न तत्कार्या
नुवृत्तिर्नोपलभ्यत इत्याशंक्याह दशमोपीति ५१ दशमोस्मीति ज्ञानोदये सति शिरस्ताडनपूर्वं

नैतावतापराधेन तत्त्वज्ञानं विनश्यति जीवन्मुक्तिव्रतं नेदं किंतु वस्तुस्थितिः खलु ५१
दशमोपि शिरस्ताडं रुदन्बुद्ध्वा न रोदिति शिरोव्रणस्तु मासेन शनैः शाम्यति नो तदा ५२
दशमास्मृतिलाभेन जातो हर्षो व्रणव्यथां तिरोधत्ते मुक्तिलाभस्तथा प्रारब्धदुःखितां ५३
व्रताभावाद्यदा यावत्सलदामयो विविच्यतां रसमेवोदिते भेदे मभ्युपायो यथातथा ५४

कं रोदनमात्रं निवर्तते न तु तन्मूलव्रणजन्यदुःखं निवर्तत एवेत्यर्थः ननु ज्ञानोत्तरकालेपि सप्रारब्धदु
खेऽनुवर्तमाने जीवन्मुक्तिलाभजन्यहर्षस्य तद्दुःखबाधकत्वमसत्वात्कस्य पुरुषार्थः
तो मृतेः अतः पुरुषार्थेनात्राणेव मुक्तिलाभजन्यहर्षस्य तद्दुःखबाधकस्य सत्वान्मुक्तिपुरुषार्थ
नेति दृष्टांतपूर्वकमाह ५२ जीवन्मुक्तिव्रतेनेदमित्युक्ते तत्र व्रतताभावे किमायातमित्यत आह
पुनः पुनर्विचारकरणे दृष्टांतमाह यथा रससेवी नरः एकस्मिन्नेव दिने तद्दायापरिहाराय पुनः
पुनर्भुंक्ते न तु दृष्ट्यास्मानिवृत्तये पुनः पुनर्विचारः क्रियतामित्यर्थः ज्ञानेनाऽनिवर्त्यप्रारब्धक
र्मफलस्य केनचिद्दिनिवृत्तिरित्याशंक्यानारंभन्यग्रहणस्याशेषयेन वा भोगेनैव निवृत्तिरित्याह

सत्योहवेनत्वममव्रतस्येदृढबोधे नैवमभवतिनाथाग्रहाद्विक्रलभवति न रतिशोकेनतरतिपाप्मानं गुहा
ग्रंथिभ्यो विमुक्तोमृतो भवतीतिश्रुतेर्ब्रह्मभावादिरूपफलस्य श्रूयमाणत्वान्तत्फलकांक्षायास्त
स्यजस्त्याप्रवर्ततेयत्कर्मित्यर्थः ननु ब्रह्मज्ञानेन ब्रह्मभावप्राप्तौ चिदाभासत्वमेव विनश्येत अतः
स्वनिवृत्तिविनाशाय कथं प्रवर्ततेत्याशंक्याह ५८ यथा लोके देवत्वप्राप्तिकामा मनुष्या अग्निप्रवेशा
दिना गंगाप्रवेशादौ प्रवर्तंते एवमाभासोपि स्वविनाशाय प्रवर्तेत तस्य तथाविधफलस्य विद्यमानत्वाविद्य
आभासत्वापगमे हेतो ब्रह्मज्ञाने प्रवृत्तिः उपपन्नैवेत्यर्थः ननु तत्त्वज्ञानेनाभासत्वमपगच्छति चेत्कथ

योत्राप्येवं दृढबोधे न भवेद्भावयेत्कृती कृत्वा तदेकचित्तः सन् बोधलवेनिनवे
तरत ५९ देवत्वकामा ह्यग्न्यादौ प्रविशंति यथा तथा साक्षित्वेनावशेषाय
स्वविनाशं स वांछति ६० यावत्स्वदेहदाहं स नरत्वं नैव मुंचति तावदारब्ध
देहः स्यान्नाभासत्वविमोचने ६१ रज्जुज्ञानेपि कंपादिः शनैरेवोपशाम्यति
पुनर्मंदांधकारे सा रज्जुः क्षिप्तोरगी भवेत् ६२ एवमारब्धभोगोपि
शनैः शाम्यति नो हठात् भोगकाले कदाचित्तु मर्त्योहमिति भासतः ६३

तत्त्वविदो जीवद्व्यवहारदशायां प्रारब्धकर्मक्षयपर्यंतं तदुपपत्तिं सदृष्टांतमाह ६१ यथाग्न्यादौ
प्रविष्टः पुरुषो दाहादिना स्वदेहनाशपर्यंतं नरत्वं नरदेहव्यवहारयोग्यत्वं नैव मुंचति एवं प्रारब्धदे
हपर्यंतं चिदाभासत्वव्यवहारो न निवर्तत इत्यर्थः ननु भोक्तृत्वादिभ्रमोपादानस्याज्ञानस्य निवृत्त
त्वात् पुनः कथं भोगानुवृत्तिः कथं वा मर्त्योहमिति विपरीतप्रतीतिरित्याशंक्य दृष्टांतप्रदर्शनेन
तत्सर्वं संभावयति ६२ दार्ष्टांतिके योजयति ननु पुनर्मर्त्यत्वबुद्ध्युदये तेन तत्त्वज्ञानं बाध्येतेत्याशं

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

यथा लोके मिथ्याभियोगकर्त्ता न दोषस्य प्रायश्चित्तं निस्तरेदर्थं मिथ्याभियुक्तः पुनः पुनः क्षमापयति एवम
र्थं चिदाभासो ऽपि साक्षिणं स्वेनात्मनि भोक्तृत्वारोपणलक्षणमिथ्याभियोगदोषप्रायश्चित्तार्थं साक्षि
णमात्मानं क्षमापयन्निव शरणं गतः तत्रैव दृष्टान्तमाह ७१ यथा पापकारिणः पुरुषस्य कृतपापपु
नर्थं सम्यक् तत्पापापनोदाय विहितैः स्नानादिकं प्रायश्चित्तमाचरन् तेन पुनरेव क्षीयते तथायमपि चिदा
भासो संसारित्वारोपणदोषपरिहाराय ध्यानं परिवर्त्तयन्निव सदा साक्षिपरायणो भवति एवं साक्षि

मिथ्याभियोगदोषस्य प्रायश्चित्तत्वसिद्धये ॥ क्षमापयन्निवात्मानं साक्षिणं शरणं गतः ७१
प्रायश्चित्तं पापकृत्यं स्नानादावर्त्तते यथा ॥ आवर्त्तयन्निव ध्यानं सदा साक्षिपरायणः ७२ उपा
स्यकाः प्रतिमां पूजाविलासेषु विलज्जते ॥ जानन्तो ऽयं तदाभासः स्वप्रख्यातौ विलज्जतः ७३ गृ
हीतो ब्राह्मणो म्लेच्छैः प्रायश्चित्तं चरन्मनः ॥ म्लेच्छैः संकीर्यते नैव तथाभासः शरीरकैः ७४ यौ
वराज्ये स्थितो राजपुत्रः साम्राज्यवाञ्छया ॥ राजानुकारी भवति तथा साक्ष्यनुकार्ययम् ७५

परानेहृष्टैलैकपवर्णपेस्वगुणापवादायनेनत्वात्तत्वे सदृष्टान्तमाह ७२ इदानीं शरीरस्य तथा हि विचित्र
विदाभासस्य पुनर्म्लेच्छैः सहतादात्म्यप्रमाभावे दृष्टान्तमाह ७३ न केवलं स्वापराधनिवृत्तये साक्षित्वमनुसर
णं किंतु सहत्वयोजनसिद्ध्यर्थमपीति सिद्धावलोकनन्यायेन सदृष्टान्तमाह ७४ राजानुकारी भवति
राजैव प्रजारंजनादिगुणवान्भवतीत्यर्थः न तु युवराजस्य राजानुकारो साम्राज्यफले स तेनैव
साक्ष्यनुकारतो एतत्स्वरूपस्य लोकदृष्ट्या प्रवर्त्तनं इत्याशङ्क्याह ७५ ॥

चिदाभासः स्वेनसहितो यो यः साक्षिणमनुसरन्तं तत्स्वरूपं सवं तज्जीवरूपं स्वरूपात्मनो देहा
दीनमनुसरत्यर्थः एवं भ्रांतिज्ञानेन मलिनं किं भवतीत्यत आह एतत्किमिति ७६ अयं चि... भासः भ्रां
त्या निर्मलता च त्वर्थः एवं भ्रांतिज्ञानेन मलिनं किं भवतीत्यर्थः तत्र दृष्टान्तमाह कुड्यं चिदेवेति दृष्टां
तं भ्रांतिरेव नानाविधा यो यो निवर्त्यते स्वात्मन्याविर्भवतीत्यर्थः तत्र दृष्टान्तमाह कुड्ये विचत्रितं दृष्टां
ते निवर्त्यति ७७ एवमविवेककारणाभावे चिदाभासे भ्रांत्यात्मन्यध्यस्तं तच्चित्रं विवेककारणानामभावे दृष्टां
यति ७८ चिदाभासः कुड्यस्य स्वात्मानं शरीरं तु तानि च विविधभेदेन नानात्वेन सर्वं समवालम्बेनू
यति ७९ चिदाभासः कुड्यस्य भ्रांतिपरिशिष्टस्य स्वरूपभास्वत्त्वात्तेन सर्वं स्वस्मिन्नध्यारोपयन्कथं संलग्नं
मिति मन्यते इत्यभ्रांतिपरिस्त्वस्य स्वाभासस्वरूपत्वात्तेन सर्वं स्वस्मिन्नध्यारोपयन्कथं संलग्नं निजं

साक्षिसमत्वमध्यास्ते नापैतेव पुनस्तये ॥ तत्सर्वं वास्तवं स्वस्वरूपमेवेति मन्यतः ७९
एतस्मिन्भ्रांतिकाले शरीरे पुनरवलम्ब्य ॥ स्वयमेव जन्ममामीति मन्यते हि कुड्येव चित्र ७९
पुत्रदारेषु तत्पत्न्यां तथाभीतिय याचाहृत्या ॥ मम ते पुरुषस्ते द्विदाभासायाभिमन्यते ७८
विविधभ्रांतिमुक्तिर्नास्व समयायागायनस्मरा ॥ चितयन्साक्षिणं कस्मात्छरीरमनुसज्जते
अनमध्यावलम्बसर्पादिज्ञानेहेतुः पलायने ॥ रज्जुज्ञानेतथाध्यस्तो हृतमप्यनुशोचति ८०

तथा यथा लोके रज्ज्वा सर्पो दिग्भ्रमो वा ज्ञानेनापि कदाचिद्रज्जुसर्पे दृष्टेऽपि मनुष्यो न कम्पते
रूपेन्व दृश्यमाणे साक्षिणं सदा चिंतयन्कस्मान्छरीरमनुसज्जते इति चेत्तत्र बहुधा समनुष्यास्त्ययं क
स्मान्नसंजनेनसंजने देहेऽन्यर्थः भ्रांतिज्ञानं तत्त्वज्ञाननयोर्नैरन्तर्यभावकारणाद्दृष्टान्तप्रदर्शनेनस
विभागस्य चिदाभाससत्तासत्त्वप्रयुक्तत्वाभ्युपगमे चेतनेषु आत्मसत्ताभ्युपगमो निःप्रयोजन
नः स्यादित्याशंक्य ॥ चेतनाचेतनविभागहेतुत्वेन कूटस्थानभ्युपगम्यत्वेऽपि अचेतनवत्स्वनाधि
ष्ठानत्वेन कूटस्थोऽभ्युपगन्तव्य इत्यभिप्रायेण घटादेस्तत्र कल्पितत्वे सदृष्टान्तमाह ॥ यथा चेतन इति

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु त्वमहंशब्दयोरेकार्थत्वात्कथं दशमेऽहं न दशमोऽहमिति कयोः सामान्यमित्याशंक्य इदंरूप्यशब्दार्थयोः स्वयमहंशब्दार्थयोश्च सामान्यविशेषरूपत्वस्योभयत्र साम्यात्तद्वदित्याह ॥ इदंत्वेति ॥ तेन स्वयमहंशब्दयोर्नैकार्थत्वमित्यर्थः ॥५२॥ स्वयंशब्दार्थस्य सामान्यरूपत्वं स्पष्टीकर्तुं लौकिकप्रयोगेणावदर्शयति ॥ देवदत्त स्वयमिति ॥५३॥ भवत्वेवं प्रयोगः लोके कथमेतावता स्वयंशब्दार्थस्य सामान्यरूपत्वमित्याशंक्य देशे दृष्टान्तमाह ॥ इदं रूप्यमिति ॥ यथा रूप्यवस्त्रादौ सर्वत्रेदंशब्दस्य प्रयुज्यमानत्वात्तदर्थस्य सामान्य-

इदंत्वरूप्यते भिन्ने स्वत्वाहन्ते न तेषतो ॥ सामान्यं च विशेषश्च उभयत्रापि गम्यते ॥५२॥ देवदत्तः स्वयं गच्छेत्त्वं वीक्षस्व स्वयं तथा ॥ अहं स्वयं न शक्नोमीत्येवं लोके प्रयुज्यते ॥५३॥ इदं रूप्यमिदं वस्त्रमिति यद्वदिदं तथा ॥ असौ त्वमहमित्येषु स्वयमित्यभिमन्यते ॥५४॥ अहंत्वाद्भिद्यतां स्वत्वं कूटस्थे तेन किं तव ॥ स्वयंशब्दार्थ एवैष कूटस्थ इति मे भवेत् ॥५५॥ अन्यत्ववारकं स्वत्वमिति चेदन्यवारणम् ॥ कूटस्थस्यात्मतां वक्तुरिष्टमेव हि तद्भवेत् ॥५६॥

एवं तथाऽसौ त्वमहमित्येषु सर्वत्र स्वयंशब्दप्रयोगात्तदर्थस्यापि सामान्यरूपत्वमभिमन्तव्यमित्यर्थः ॥५४॥ भवतु स्वयमहंशब्दार्थयोर्लौकिको भेदः एतावता कूटस्थे आत्मत्वं किमायातमित्याशंक्याह ॥ अहंत्वादिति ॥ सामान्यरूपः स्वयंशब्दार्थ एव कूटस्थ इत्यस्मन्मते किमायातमित्याह ॥ स्वयमिति ॥५५॥ ननु स्वत्वरूपेण धर्मेणान्यं निवारयति न कूटस्थत्वं बोधयतीति शंकते ॥ अन्यत्ववारकमिति ॥ स्वयंशब्दार्थस्य कूटस्थस्यैवात्मत्वात्तेनान्यवारणमिष्टमेवेति परिहरति ॥ अन्यवारणं कूटस्थस्येति ॥५६॥

एवमविद्यावरणं दर्शयित्वा विक्षेपाध्यासमाह ॥ शुक्तिगं रूप्यमिति ॥ इदमंशः कार्यविद्यावरणावृतकूटस्थे । ग्रहणागमनमात्रेऽपि च इदंशस्य शुक्तिस्थितस्य विक्षेपाध्यासमर्थः ॥५७॥ अस्य विक्षेपस्य शुक्तिकायां स्थितेऽपि शकलनिरूपणतायाः सामान्यदर्शयति ॥ इदमंशस्येति ॥ शुक्तिकायां स्थितेऽपि रोपेरस्य त्रिकोणत्वादयः कल्पितमपि न भासन्ते ॥ तथा रूप्यस्य बाधितेऽपि ज्ञातेन भासते ॥ एवं स्वयं तत्त्वेन स्वत्वेन कूटस्थस्य निष्ठमारोपितरूपेण चिदाभासे एवं भासत इत्यर्थः ॥५८॥ एवं सामान्यांशज्ञानेऽपि न भयत्रमप्रदर्श्य विशेषांशानीति साम्येन

इदमंशस्य सत्यत्वे शुक्तिगं रूप्यमीर्यते ॥ स्वयंत्वमहमित्येतैर्विक्षेपो वीक्ष्यते तथा ॥५७॥ नीलपृष्ठत्रिकोणत्वं यथा शुक्तौ तिरोहितम् ॥ असंगानन्दताद्येवं कूटस्थेऽपि तिरोहितम् ॥५८॥ आरोपितस्य दृष्टान्ते रूप्यं नाम यथा तथा ॥ कूटस्थाध्यस्तविक्षेपनामाहमिति निश्चयः ॥५९॥ इदमंशं स्वतः पश्यन् रूप्यमित्यभिमन्यते ॥ तथा स्वं च स्वतः पश्यन्नहमित्यभिमन्यते ॥६०॥

साम्योक्तेर्दर्शयति आरोपितस्येति दृष्टान्ते शुक्तिस्थले आरोपितं दर्शयति ॥ नीलपृष्ठत्रिकोणत्वमिति ॥५९॥ साम्योक्तेर्दर्शयति ॥ आरोपितस्येति ॥ दृष्टान्ते शुक्तिस्थले आरोपितं दर्शयति ॥ नीलपृष्ठत्रिकोणत्वमिति ॥ एवं कूटस्थे कल्पितचिदाभासरूपविक्षेपस्यापि शरीरादिषु अनात्मपदार्थस्वरूपत्वम् आत्मरूपत्वमिति नामयुया ॥ एवं कूटस्थे कल्पितविदाभासरूपविक्षेपस्य शरीरादिस्थलेऽपि नापि दृष्टान्ते शुक्तिशकले इदंत्वसंनिकर्षे जाते सति रूप्यमिदमिति ॥ न इति मिति नामेत्यर्थः ॥५९॥ ननु दृष्टान्ते पुरोवर्तिनि शुक्तिशकले इन्द्रियसंनिकर्षे जाते सति रूप्यमिदमिति ॥ अविद्याविकारत्वात्स्वाभिमानः स्वत्वादिशब्दयोः इत्याशंक्याह ॥ नैवं दार्ष्टान्तिके स्वात्मानि विक्षेपस्याभिमानः स्पष्टः सकलात्मा स्वात्मविकारत्वाभिमानमुपपद्यते ॥ नैवं दार्ष्टान्तिके स्वात्मनि विकल्पस्याभिमानः स्यादेवेति स्वात्मनिरूपणाहमित्यभिमानमुपलभ्यते अतो नैव धर्म्यमित्यभिप्रायेणाह ॥ तथा चिदात्मनमवभासमानेन तदनिरिक्ताहमित्यभिमानम्

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु भवन्मते आत्मनः स्वप्रकाशत्वात्॥ तस्मिन्नविद्या नोपपद्यते॥ तत्त्वज्ञानतिमिरयोरिव विरुद्धस्वभावत्वेन नत्वे-
कत्रैवोपपत्तेः अविद्याभावेन तत्कृतमावरणं तु निरुत्थं स्यात् तदभावे च तन्मूलकस्य विक्षेपस्याप्यसंभवः अवि-
द्याभावे च तन्निवर्त्तकस्य तत्त्वज्ञानस्याभावात्॥ ज्ञानवैयर्थ्यं ततश्च तत्प्रतिपादकशास्त्रस्य प्रमाण्यं स्यादित्या-
शंक्य प्रतिबंदी एवंविधानां भवतां तर्काणामनवस्थितेरित्याह॥ स्वप्रकाश इति॥ वादिहृदि स्वतुपपन्नं नाम तिस्मायाः इति भावः
२७॥ ननु भवत्स्वोक्तन्तर्कविरोधेनाभासमानेन ततत्त्वनिश्चयस्याशंक्यत्वानुभवप्रामाण्यानभ्युपगमे केव-
लतर्कस्यातिशयकत्वस्येनैवाभ्युपगतत्वात् तार्किकस्य तत्त्वनिश्चयः कापि स्यादित्याह स्वानुभूताविति।

268

स्वप्रकाशे कुतो विद्या तां विना कथमावृतिः॥ इत्यादितर्कजालानि स्वानुभूतिर्ग्रसत्यसौ॥२८॥ स्वानु-
भूतावविश्वासे तर्कस्याप्यनवस्थितेः॥ कथं वा तार्किकंमन्यस्तत्त्वनिश्चयमाप्नुयात्॥२९॥ बुद्ध्यारोहा-
य तर्कश्चेदपेक्ष्येत तथा सति॥ स्वानुभूत्यनुसारेण तर्क्यतां मा कुतर्क्यताम्॥३०॥ स्वानुभूतिरविद्याया-
मावृतौ च प्रदर्शिता॥ अतः कूटस्थचैतन्यमविरोधीति तर्क्यताम्॥३१॥ न चेद्विरोधि केनेयमावृतिर्ह्य-
न्यथा वद॥ विवेकस्य विरोधित्वात्तत्त्वज्ञानिनि दृश्यताम्॥३२॥ अविद्यावृतकूटस्थे देहद्वययुता चितिः

ति॥ ननु अनुभवस्तत्त्वनिश्चायकः एव॥ तथापि अनुभूयमानस्यार्थस्यासंभावितत्वज्ञापनकोऽपभ्युपेतव्यः तत्
शंकाम नूद्य तर्कस्यानुभवानुसारेणानुकोऽपेक्ष्यतां नोचेत् नत्विरोधेनेत्याह॥ बुद्ध्यारोहायेति॥३०॥ कोऽसावनुभ-
वो यदनुसारेणानुकोऽपेक्ष्यतां नोपयुज्यते का तत्राह अविद्यादिगोचरमनुभवं स्मारयति॥ स्वानुभूति-
रिति फलितमाह अत इति॥३१॥ ननु एवं तर्कसंभवनीयदर्शयति॥ नचेदिति॥ अविद्यावरणसाधकचैतन्या-
स्यैव तद्विरोधित्वे विद्याप्रतीतिरेव न स्यादिति भावः॥ तर्हि अविद्यायाः को विरोधी तत्राह॥ विवेकस्त्विति
विवेकउपनिषद्विचारजन्यं ज्ञानं विवेकस्याविद्याविरोधित्वं कूटस्थमिमं तत्राह॥ ननु तानि नीति॥३२

ननु जीवाभिनिविष्टः कूटस्थोऽस्ति चेत् किमिति न प्रतिभासत इत्याशंक्य॥ जीवेन तिरोहितत्वादिति स-
दृष्टांतमाह॥ जलव्योम्नेति॥ ननु नित्येन स्वप्रकाशस्य विश्वादेः प्रतिपादितत्वमिव्याशंक्य॥ तत्रैवाध्या-
समात्रेणाभिधाय तावत्त्वमित्याह॥ सोऽन्योन्याध्यास इति भाष्यादिप्रसिद्धिनि॥२४॥ ननु यमेवाध्या-
समृद्धस्य कोऽसावनुपाविद्यावकाशेत्याशंक्य॥ जीवकूटस्थयोः संसारदशायां भेदाप्रतीतिरेवाविवे-
कमाह॥ अयमिति॥२५॥ एवं तस्य जीवस्याविद्याकल्पितत्वं स्पष्टीकरणाय अविद्यां विभजते विक्षेपेति

269

जलव्योम्ना घटाकाशो यथा सर्वस्तिरोहितः॥ तथा जीवेन कूटस्थः सोऽन्योन्याध्यास उच्यते
अयं जीवो न कूटस्थं विविनक्ति कदाचन॥ अनादिरविवेकोऽयं मूलाविद्येति गम्यतां॥२५॥
विक्षेपावृतिरूपाभ्यां द्विधाविद्या प्रकल्पिता॥ न भाति नास्ति कूटस्थ इत्यापादनमावृतिः
अज्ञानी विदुषा पृष्टः कूटस्थं न प्रबुध्यते॥ न भाति नास्ति कूटस्थ इति बुद्ध्वा वदत्यपि॥२६॥

विक्षेपेत्यनेनाभ्यर्हितत्वादावृतिं प्रथमं लक्षयति न भातीति॥ कूटस्थो न भाति न प्रकाशते ना-
स्ति चेति व्यवहारहेतुरावरणमिति॥२६॥ ननु अविद्यायास्तत्कृतावरणस्य च सद्भावे किं प्रमाण-
मित्याशंक्य लोकानुभवमेवमाह॥ अज्ञानीति॥ विदुषा कूटस्थं किं जानासीति पृष्टोऽज्ञानी तेन
न जानामीति॥ अज्ञानमनुभूय वदति अयमविद्यानुभवः न केवलमज्ञानानुभवमेव वक्ति॥ अपि
तु नास्ति न भाति कूटस्थ इति कूटस्थाभावाभाने चानुभूय वक्ति॥ अयमावरणानुभवः॥ अत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

घटावच्छिन्नस्य घटाकाशस्य तदनवच्छिन्नस्य महाकाशस्य च प्रसिद्धत्वात्तौ विहायाप्रसिद्धं जलाकाशं व्यु-
त्पादयति ॥ घटावच्छिन्न इति ॥ घटावच्छिन्ने आकाशे यदुदकमस्ति तज्जले बिंबितं सअभ्रनक्षत्रसहितमाकाशं जलाकाश-
मुच्यते ॥ १९ ॥ मेघाकाशं व्युत्पादयति ॥ महाकाशस्येति ॥ तत्र मेघमंडले यज्जलं तस्मिन्प्रतिबिंबः ॥ २० ॥ ननु
मेघे जलस्याप्रतीयमानत्वान्नभसस्तत्र कथं प्रतिबिंबितत्वमित्याशंक्याह ॥ मेघांशेति ॥ मेघस्य
सांद्रजलस्य प्रत्यक्षेणानुपलंभेऽपि वृष्टिलिंगकार्येण मेघे तदुपादानमुदकं सूक्ष्मावयवरूप-
मस्तीत्यनुमीयते ॥ उदकत्वेनैव लिंगेन ॥ विमतं जलमाकाशप्रतिबिंबवद्भवितुमर्हति जलत्वाद्घट-

घटावच्छिन्नखे सांद्रे जले यत्प्रतिबिंबितं ॥ साभ्रनक्षत्रमाकाशं जलाकाश उदीर्यते ॥ १९ ॥ महा-
काशस्य मध्ये यन्मेघमंडलमीक्ष्यते ॥ प्रतिबिंबतया तत्र मेघाकाशो जले स्थितः ॥ २० ॥ मेघांशरूप-
मुदकं तुषाराकारसंस्थितं ॥ तत्र खप्रतिबिंबोऽयं नीरत्वादनुमीयते ॥ २१ ॥ अधिष्ठानतया देहद्वया-
वच्छिन्नचेतनः ॥ कूटवन्निर्विकारेण स्थितः कूटस्थ उच्यते ॥ २२ ॥ कूटस्थे कल्पिता बुद्धिस्तत्र चित्प्र-
तिबिंबकः ॥ प्राणानां धारणाज्जीवः संसारेण स युज्यते ॥ २३ ॥

नुमानेन मेघांशरू-

जलवदित्य-
पजलेऽप्याकाशप्रतिबिंबसद्भावो ज्ञातव्य इत्यर्थः ॥ २१ ॥ एवं दृष्टांतभूतमाकाशचतुष्टयं व्युत्पाद्य दार्ष्टां-
तिके प्रथमोद्दिष्टं कूटस्थं व्युत्पादयति ॥ अधिष्ठानतयेति ॥ पंचीकृतापंचीकृतभूतकार्येण स्थूलसू-
क्ष्मरूपदेहद्वयस्याविद्याकल्पितस्याधारतया वर्तमानत्वेन तदवच्छिन्न आत्मा कूटस्थ इत्युच्य-
ते ॥ तत्र कूटस्थशब्दप्रवृत्तौ निमित्तमाह ॥ कूटवन्निर्विकारेणेति ॥ २२ ॥ एवं कूटस्थं व्युत्पाद्य जीवस्य कूटस्थे
कल्पितबुद्धिप्रतिबिंबत्वेन तन्मध्यपातित्वान्न व्युत्पादयति ॥ कूटस्थ इति ॥ तस्य जीवशब्दाभिधेयत्वे निमि-

270

271

ननु विचारेण जीवजगतोर्बाधेन दृष्टलोकव्यवहारलोपः स्यादित्याशंक्य बाधस्वरूपं विवक्षितमर्थं
विपरीते दोषमाह ॥ नाप्रतीतिरिति ॥ सुषुप्तिमूर्छादौ जगतः प्रतीत्यभावाज्ज्ञानेन विनैव मुक्तिः स्या-
दित्यर्थः ॥ १३ ॥ आत्मैव शिष्यत इत्यनेनापि परमात्मनः सत्यत्वज्ञानमेव विवक्षितं न तु जगद्विस्मृ-
तिर्जीवन्मुक्त्यभावप्रसंगादित्याह ॥ परमात्मेति ॥ १४ ॥ सदा विचारयेदित्युक्तादहं पातपर्यंतं विचा-
रस्य कोऽवधिरित्यत आह ॥ परोक्षेति ॥ १५ ॥ विचारजन्याविद्यायाः परोक्षत्वापरोक्षत्वभेदेन द्वैविध्ये।

नाप्रतीतिस्तयोर्बाधः किंतु मिथ्यात्वनिश्चयः ॥ नो चेत्सुषुप्तिमूर्छादौ मुच्येतायत्नतो जनः ॥
१३ ॥ परमात्मावशेषोऽपि तत्सत्यत्वविनिश्चयः ॥ न जगद्विस्मृतिर्नो चेज्जीवन्मुक्तिर्न संभवेत् ॥ १४ ॥
परोक्षा चापरोक्षेति विद्या द्वेधा विचारजा ॥ तत्रापरोक्षविद्याप्तौ विचारोऽयं समाप्यते ॥ १५ ॥ अस्ति
ब्रह्मेति चेद्वेद परोक्षज्ञानमेव तत् ॥ अहं ब्रह्मेति चेद्वेद साक्षात्कारः स उच्यते ॥ १६ ॥ तत्सा-
क्षात्कारसिद्ध्यर्थमात्मतत्त्वं विविच्यते ॥ येनायं सर्वसंसारात्सद्य एव विमुच्यते ॥ १७ ॥ कूटस्थो
ब्रह्म जीवेशावित्येवं चिच्चतुर्विधा ॥ घटाकाशमहाकाशौ जलाकाशाभ्रखे यथा ॥ १८ ॥

उक्तं तयोरुभयोः स्वरूपं क्रमेण दर्शयति ॥ अस्तीति ॥ १६ ॥ एवंविधात्मसाक्षात्कारसाधारण-
कारणमात्मतत्त्वविवेचनं प्रतिजानीते ॥ तत्साक्षात्कारेति ॥ येन साक्षात्कारेण पुमान्सद्य एव
विमुच्यते ॥ तत्साक्षात्कारसिद्ध्यर्थमिति पूर्वेणान्वयः ॥ १७ ॥ चिदात्मनः पारमार्थिकमेकत्वेऽपि
श्चैते व्यवहारदशायां प्रतीयमानं चैतन्यभेदं दर्शयति ॥ कूटस्थ इति ॥ एकस्यापि चिदात्मनश्चातु-
र्विध्ये दृष्टांतमाह ॥ घटाकाशेति ॥ १८ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

272

रादीति कमाह ॥ स्वच्छेति ॥ एवं परमात्मा मायोपितानां देहिनां देवादीनां परोक्षेति तामेव जीवनामा नः चिदाभासाः पृथक्पृथक् कल्प्यंते न पर्वतादीनां ॥ तेषां तत्कल्पने कारणमित्याह बहुधेति ॥ अमी जीवा देवतिर्यङ्मनुष्यादिशरीरपाश्वा बहुधा संसरंति न परमात्मा तस्य निर्विकारत्वादित्यभिप्रायः ॥८॥ ननु संसारो देवादीनां लौकिकानां आत्मन एव संसार इति वदंति तत्र किं कारणमित्याशंक्य ॥ अज्ञानमेव कारणमिति सदृष्टांतमाह वस्त्रेति ॥९॥ चित्रस्थपर्वतादीनां चिदाभासकल्पनाभावे दृष्टांतपूर्वकमाह ॥

पृथक्पृथक्चिदाभासाश्चैतन्याध्यस्तदेहिनां ॥ कल्प्यंते जीवनामानो बहुधा संसरंत्यमी ॥८॥
वस्त्राभासस्थितान्वर्णान्यद्वदाधारवस्त्रगान् ॥ वदंत्यज्ञास्तथा जीवसंसारं चिद्गतं विदुः ॥९॥
चित्रस्थपर्वतादीनां वस्त्राभासो न लिख्यते ॥ सृष्टिस्थमृत्तिकादीनां चिदाभासास्तथा न हि ॥१०॥
संसारः परमार्थोयं संलग्नः स्वात्मवस्तुनि ॥ इति भ्रांतिरविद्या स्याद्विद्ययैषा निवर्तते ॥११॥
आत्माभासस्य जीवस्य संसारो नात्मवस्तुनः ॥ इति बोधो भवेद्विद्या लभ्यतेसौ विचारणा-
त् ॥१२॥ सदा विचारयेत्तस्माज्जगज्जीवपरात्मनः ॥ जीवभावजगद्भावबाधे स्वात्मैव शिष्यते ॥१३॥

चित्रस्थपर्वतादीनां शरीरप्रयोजनाभावादिति भावः ॥१०॥ एवमात्मन्यारोपितस्य संसारस्य तात्त्विकत्वबुद्धिमविद्यामाह ॥ संसार इति ॥ केयं विद्या तल्लाभोपायं च दर्शयति ॥११॥ विद्यास्वरूपं तल्लाभोपायं च दर्शयति ॥ आत्माभासस्येति ॥१२॥ आत्माभासस्य चिदाभासस्येत्यर्थः ॥ विचारात् लभ्यते विद्या इत्युक्तं कस्य विचारादित्याशंक्याह ॥ सदा विचारयेदिति ॥ ननु परमात्मा विचार्यतां मायात्वस्य याथात्म्यज्ञानाभावस्यानात् ॥ जीवजगतोर्विचारः कोपयुज्यते इत्याशंक्य

273

दृष्टांतस्थितानामवस्थानां स्वरूपं क्रमेणानुवादयति ॥ अज्ञानतत्कार्यरहितः स्वतो दृष्टांते तत्र तंबू पंचीकृतभूतभौतिकरहितः ॥ शुद्धो मायोपाधिकः शुद्धः चैतन्यः ॥ यथा योगं यथावत् इत्यत्र योजनीयं ॥ अत्र तु तत्सोपाधिकः ॥ स्वतश्चिदिति ॥ स्वतः परमात्मा मायातत्कार्यैः रहितो यः स्वतश्चिदंतर्यामी ॥ स्यात् ॥५॥ रातैरिति केचिदन्याख्यंति ॥ स्वतश्चिदिति ॥ यतः परमात्मा मायावी ॥ अपंचीकृतभूतकार्यसमष्टिसूक्ष्मशरीरयोगात् सूत्रात्मेत्युच्यते ॥ मायायोगादंतर्यामी ॥ अपंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगात् विराडिति ॥५॥ ननु परमात्मा ॥ पंचीकृतभूतकार्यसमष्टिस्थूलशरीरोपाधियोगात् विराडिति ॥६॥ ननु परमात्मा

स्वतः शुभ्रोत्र धौतः स्याद्घट्टितोन्नविलेपनात् ॥ मष्याकारैर्लां-
छितः स्याद्रंजितो वर्णपूरणात् ॥४॥ स्वतश्चिदंतर्यामी तु मायावी
सूक्ष्मसृष्टितः ॥ सूत्रात्मा स्थूलसृष्ट्यैष विराडित्युच्यते परः ॥५॥ ब्रह्मा-
द्याः स्तंबपर्यंताः प्राणिनोत्र जडा अपि ॥ उत्तमाधमभावेन वर्तंते पटचित्र-
वत् ॥६॥ चित्रार्पितमनुष्याणां वस्त्राभासाः पृथक्पृथक् ॥ चित्राधारेण
वस्त्रेण सदृशा इव कल्पिताः ॥७॥

तत्र चित्रपटस्थानीयत्वेन दार्ष्टांतिकानि चित्रा-
णि वक्तव्यानि इत्यत आह ॥ ब्रह्माद्या इति ॥ एवं परमात्मनि उत्तमाधमभावेन वर्तमानं ब्रह्मादिस्तं-
बपर्यंतं चेतनात्मकं गिरिनद्यादिजडजातं च चित्रस्थानीयमित्यर्थः ॥६॥ ब्रह्मादिजगतश्चेतनत्व-
कारणं वक्तुं दृष्टांतमाह ॥ चित्रार्पितमनुष्याणामिति ॥ यथा चित्रलिखितानां मनुष्यादिशरी-
राणामेव नानावर्णोपेता वस्त्रविशेषा लिख्यंते ते च शीतादिनिवारकत्वाद्वस्त्राभासा एव ॥७

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

शातल्लणनादिष्वपि ज्ञानस्याहंशब्दप्रयोगदर्शनात्तद्व्यावर्तनायात्र विवक्षितमर्थमाह॥ दृश्यमानस्येति।
दृश्यते न मिथ्याभूतस्य सर्वस्याकाशादेर्जगतस्तत्त्वमधिष्ठानं तयाहं ब्रह्मशब्दवाच्येन वपारमार्थिके सवि
दानंदलक्षणे यद्रूपमस्ति तद्ब्रह्मशब्देनोच्यते कथ्यत इत्यर्थः॥ ज्ञानवार्थमाह तद्ब्रह्मेति॥ तद्ब्रह्मलक्ष
णा च लक्षणस्य प्रकाशात्मा स्वरूपं त्वं रूपं प्रसन्नस्य काशात्मरूपं केसर्वं वेत्यर्थः॥ ॥ इति महावाक्यविवेक
व्याख्यानं समाप्तम्॥ ॥ तेन तत्त्वज्ञो भारतीतीर्थविद्यारण्यमुनीश्वरैः॥ क्रियते चित्रदीपस्य व्याख्यानं स्वर्थबो
धिनी॥ चिकीर्षितस्य ग्रंथस्य निर्विघ्नपरिसमाप्तये परमात्मनो नतिपदेन इष्टदेवतानमस्कारं संपादन

दृश्यमानस्य सर्वस्य जगतस्तत्त्वमीर्यते॥ ब्रह्मशब्देन तद्ब्रह्म स्वप्रकाशात्मरूपकं॥८॥ इति
महावाक्यविवेकः समाप्तः॥ यथा चित्रपटे दृष्टमवस्थानां चतुष्टयं॥ परमात्मनि विज्ञेयं तथाव
स्थाचतुष्टयं॥१॥ यथा धौतो घट्टितश्च लांछितो रंजितः पटः॥ चिदंतर्यामी सूत्रात्मा विराडात्मा।
तथेर्यते॥२॥

लक्ष्यांशे मलमात्रवस्त्वस्य ग्रंथस्य वेदांतप्रकरणत्वात्तदीयैरेव विषयादिभिस्तद्वत्तासिद्धिं मनसि
निधायाध्यारोपापवादाभ्यां निःप्रपंचं प्रपंच्यत इति न्यायमनुसृत्य परमात्मन्यारोपितस्य जगतः स्थि
तिप्रकारं सदृष्टांतं दर्शयति नालीनं यथेति॥ ॥ चित्रपटे यथावस्थानामवस्थानां चतुष्टयं तथैव
परमात्मन्यपि वक्ष्यमाणमवस्थानां चतुष्टयं ज्ञेयमिति॥ किं तद्दृष्टांतदार्ष्टांतिकयो
रुभयोरप्यवस्थाचतुष्टयं क्रमेणोदाहरति॥ यथेति॥ धौतो घट्टितो लांछितो रंजितः इत्येवं प्रकारास्तत्रावा
स्था यथा चित्रपटे उपलभ्यंते॥ तथा परमात्मन्यपि चिदंतर्यामी सूत्रात्मा विराडित्येवमवस्थाचतुष्टयं

त्वंपदलक्ष्यार्थमाह श्रोत्रिति॥ श्रोतुः श्रवणादीनां कर्तुः स्थानेन वाक्यार्थं प्रतिपत्तुः देहेंद्रियातीते देहेंद्रि
यादिलक्षणस्य साक्षिणो यद्वस्तु विद्यते तदिह त्वंपदेरितमिति॥ वाक्यगतेन त्वंपदेन
लक्षितमित्यर्थः॥ एतद्वाक्यस्थेनासीति पदेन तत्त्वंपदस्य मानान्वयिकपदलक्ष्यपदार्थयोरैक्यं
ग्राह्यते प्रत्याय्यत इत्याह॥ एकतेति मिश्रमर्थमाह॥ तदैक्यमिति॥ तयोस्तत्त्वंपदार्थयोरैक्यं प्रमाण
सिद्धमेकत्वमनुभूयतां मुमुक्षुभिरित्यर्थः॥६॥ अयमात्मा ब्रह्मेति वाक्यगतस्यायमात्मा ब्रह्मेति
वाक्यस्यार्थं व्याचिकीर्षुरादावयमात्मेति पदद्वयेन विवक्षितमर्थं क्रमेणाह॥ स्वप्रकाशेति

श्रोतृदेहेंद्रियातीतं वस्त्वत्र त्वंपदेरितं॥ एकता ग्राह्यतेऽसीति तदैक्य
मनुभूयतां॥६॥ स्वप्रकाशापरोक्षत्वमयमित्युक्तितो मतं॥
अहंकारादिदेहांतात्प्रत्यगात्मेति गीयते॥७॥

अयमित्युक्तितोऽयमिति शब्देन स्वप्रकाशापरोक्षत्वं मतमभिमतं अहंकारादिचित्तपरोक्षत्वं च।
दादिवत्स्वपरत्वं व्यावर्तयितुं विशेषणमहंकारेति बोद्धव्यं॥ देहादिष्वप्यात्मशब्दप्रयोगदर्शनादहं
कारादिव्यतिरिक्तं विवक्षितमित्याकांक्षायामाह॥ अहंकारादीति॥ अहंकार आदिर्यस्याहंका
रात्मघादेस्तं किं विवक्षितमित्याकांक्षायामाह॥ तस्मादहंकारादिदेहांतात्स्वप्रकाशस्य सदेहांतोऽहंका
रप्राणमन इंद्रियदेहसंघातस्य सोऽहंकारादिस्तस्माद्देहांतोयस्मात्संघातस्य देहांतोऽहंका
रादिस्त्रासौ देहांतश्चेति॥ तथा तस्मात्प्रत्यगधिष्ठानतया सात्तितया वर्त्तमानत्वात्प्रत्यगात्मेति गी
यते तस्मिन्नात्मशब्दार्थः॥७॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं स्वरूपभूतत्वात्मगतमहावाक्यार्थं निरूप्य यजुःशाखावाक्यमध्ये बृहदारण्यकोपनिषद्गतस्याहं ब्रह्मा-
स्मीति महावाक्यस्यार्थविवक्षरणाय तद्ब्रह्मत्वार्थमाह॥ परिपूर्ण इति॥ परिपूर्णः स्वभावतो देशका-
लवस्तुभिरपरिच्छिन्नः परमात्मास्मिन्मायाकल्पिते जगति विद्याधिकारिणि शमादिसाधनसंपन्ने देह-
विद्यासंपादनयोग्ये ब्राह्मणादिवर्णवति देहे मनुष्यादिशरीरे बुद्धेः उपलक्षितस्य सूक्ष्मशरी-
रस्य साक्षितया विकारित्वेनावभासकतया स्थित्वा वस्थाय स्फुरन् प्रकाशमानोऽहमितीर्यते लक्ष-
णयाहंपदेनोच्यत इत्यर्थः॥३॥ ब्रह्मशब्दार्थमाह॥ स्वतः पूर्ण इति॥ स्वतः परिपूर्णः स्वभावतो देशका-

परिपूर्णः परात्मास्मिन्देहे विद्याधिकारिणि॥ बुद्धेः साक्षितया स्थित्वा स्फुरन्नहमितीर्य-
ते॥३॥ स्वतः पूर्णः परात्मात्र ब्रह्मशब्देन वर्णितः॥ अस्मीत्यैक्यपरामर्शस्तेन ब्रह्म भवाम्य-
हं॥४॥ एकमेवाद्वितीयं सन्नामरूपविवर्जितं॥ सृष्टेः पुराधुनाप्यस्य तादृक्त्वं तदितीर्यते॥५॥

लाद्यनवच्छिन्नः पूर्णः परमात्मात्रास्मिन्महावाक्ये ब्रह्मशब्देन ब्रह्मेत्येतेन पदेन वर्णितः॥
लक्षणयोच्यत इत्यर्थः॥ पदद्वयगतेनास्मीति पदेन पदद्वयसामानाधिकरण्यलभ्यं जीवब्र-
ह्मणोरैक्यं परामृश्यत इत्याह॥ तेन ब्रह्म भवामीति॥४॥ इदानीं छान्दोग्यशाखागतस्य तत्त्वमसीति
वाक्यस्यार्थप्रकाशनाय तत्पदलक्ष्यार्थमाह॥ एकमेवाद्वितीयमिति॥ सदेव सोम्येदमग्र आसी-
देकमेवाद्वितीयमिति वाक्येन सृष्टेः प्रागवस्थायां यन्नामरूपरहितं यत्सद्वस्तु प्रतिपादि-
तमस्त्यस्य सद्वस्तुनोऽधुनापि सृष्ट्युत्तरकालेऽपि तादृक्त्वं विचारदृष्ट्या तथात्वं तदिति पदेनेर्य-

महावाक्यविवेकः ५॥

276

ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ महावाक्यविवेकस्य कुर्वे व्याख्यां समासतः॥ सम्प्रति सो-
ऽयमात्मा ब्रह्मात्मैकत्वावगतिसिद्ध्ये प्रसिद्धानां चतुर्णां महावाक्यानामर्थं क्रमेण निरूपयन् प्रथ-
मं ऋक्शाखागतस्य ऐतरेयोपनिषद्गतवाक्येषु प्रज्ञानं ब्रह्मेति महावाक्ये प्रज्ञानशब्दस्यार्थमा-
ह॥ येनेति॥ येन चक्षुर्द्वाराद्विनिर्गतान्तःकरणवृत्त्युपहितचैतन्येन दर्शनयोग्यं रूपादिकमीक्षते पश्य-
ति॥ शृणु च येन श्रोत्रद्वाराद्विनिर्गतान्तःकरणवृत्त्युपाधिकेन येन शब्दजातं शृणोति॥ तथैव घ्राणद्वा-
राद्विनिर्गतान्तःकरणवृत्त्युपाधिकेन येन गन्धजातं जिघ्रति॥ येन वागिन्द्रियावच्छिन्नेन व्याकरोति पठ-
ति जानीते व्याहरति॥ येन रसनेन्द्रियद्वाराद्विनिर्गतान्तःकरणवृत्त्युपाधिकेन स्वाद्वस्वादु रसो विजानाति॥

येनेक्षते शृणोतीदं जिघ्रति व्याकरोति च॥ स्वाद्वस्वादु विजानाति तत्प्रज्ञानमुदीरितम्॥ १
चतुर्मुखेन्द्रदेवेषु मनुष्याश्वगवादिषु॥ चैतन्यमेकं ब्रह्मातः प्रज्ञानं ब्रह्म मय्यपि॥२॥

अनुक्रमसमन्वयार्थमाह॥ तथा चोक्तानेकैः सकलेन्द्रियान्तःकरणवृत्तिभेदैश्चोपलक्षितं यच्चैत-
न्यमस्ति तदेवात्र प्रज्ञानमित्युच्यत इत्यर्थः॥ अनेन येन वा पश्यतीत्यादेः सर्वाण्येवैतानि प्रज्ञानस्य
नामधेयानीत्यन्तस्यावान्तरवाक्यसंदर्भस्यार्थः संक्षिप्य दर्शितः॥१॥ ॥एवं प्रज्ञानशब्दस्यार्थमभि-
धाय ब्रह्मशब्दार्थमाह॥ चतुर्मुखेति॥ ब्रह्मेन्द्रादिषु देवेषु मनुष्येषु॥ अश्वगवादि-
षु इह यादिष्वाकाशादिभिन्नेषु जङ्गमजन्मादिहेतुभूतं यदेकं चैतन्यमस्ति तद्ब्रह्मेत्यर्थः॥ अनेन च एष
ब्रह्मैष इन्द्र इत्यादेः॥ प्रज्ञाप्रतिष्ठेत्यन्तस्यावान्तरवाक्यस्यार्थः संक्षिप्य दर्शितः॥ समन्वयपदार्थमभिधाय
वाक्यार्थमाह॥ अत इति॥ यतः सर्वत्रावस्थितं प्रज्ञानं ब्रह्मातो मय्यपि स्थितं प्रज्ञानं ब्रह्मैव प्रज्ञानमता

[illegible] ५

277

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मदावितविक्षेपरहितस्य ब्रह्मवित्त्वमयौपचारिकमित्याह॥ विक्षेपइति॥ पारदर्शिनो वेदांतपारंगा-
ताः स्वयं॥६३॥ अत्रापि वासिष्ठवाक्यमुदाहरति॥ दर्शनादर्शने इति॥ यो ब्रह्म जानामि न जानामीति व्य-
वहारद्वयं परित्यज्य स्वमहिम्ना एव केवलस्वरूपेणावतिष्ठते स स्वयं ब्रह्म न ब्रह्मविदित्यर्थः॥६४॥ सकलद्वैत-
विवेचनमुपसंहरति॥ जीवन्मुक्तेरिति॥ अस्यास्त्वयं प्रकारो जीवन्मुक्तेः परा काष्ठा निरतिशया प्र-

विक्षेपो यस्य नास्त्यस्य ब्रह्मवित्त्वं न मन्यते॥ ब्रह्मैवायमिति प्राहुर्मुन-
यः पारदर्शिनः॥६३॥ दर्शनादर्शने हित्वा स्वयं केवलरूपतः॥ यस्तिष्ठति
स तु ब्रह्मन्ब्रह्म न ब्रह्मवित्स्वयं॥६४॥ जीवन्मुक्तेः परा काष्ठा जीवद्वैतवि
वर्जनात्॥ लभ्यतेऽसावतोऽत्रेदमीशद्वैताद्विवेचितं॥६५॥ इति श्रीमत्प
रमहंसपरिव्राजकाचार्यविरचिते द्व
तप्रकरणं॥४॥

एवसानभूमिः जीवद्वैतस्य मनोमयप्रपंचस्य विवर्जनात्परित्यागाल्लभ्यते प्राप्यते अतः करणा-
दिद्वैतं जीवद्वैतं ईशाद्वैतादीश्वरसृष्टद्वैताद्विविच्य विवेचितं पृथग्दर्शितमित्यर्थः॥६५॥ इति श्रीमत्पर-
महंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण रामकृष्णाख्यविदुषा विर-
चिता अद्वैतविवेकपदयोजना चतुर्थप्रकरणं समाप्तम्॥४॥ ॥

मनोनाशविलये किं भवतीत्यत आह॥ चित्ते तस्मिन्निति॥ तस्मिन्नुक्तः सकलव्यापाररहिते चित्ते
च मनोऽपि सर्वव्यापाररहितं भवति एतदित्यर्थः॥ अहमिति कमनोऽवस्थानस्य पुरुषार्थत्वे प्रमाणमाह॥
एतदिति एतत्पदमित्येतदित्यर्थः॥५३॥ वासिष्ठश्लोकद्वयमुदाहरति दृश्यमिति॥ नेदं नास्तीति किं-
चनेत्यादिश्रुत्या द्वितीयब्रह्मातिरिक्तं जगदभावज्ञानेन मनसः सकाशाद्दृश्यनिवारणं संपन्नं य-
दि तर्हि निरतिशयं मोक्षसुखं निष्पन्नमिति जानीयादित्यर्थः॥५४॥ अद्वैतशास्त्रमनर्थं विचारितं न

चित्ते तस्मिन्वृत्तिशून्ये मनस्तिष्ठति मूकवत्॥ एतत्पदं वसिष्ठेन रामाय बहुधेरितं॥५५॥
दृश्यं नास्तीति बोधेन मनसो दृश्यमार्जनं॥ संपन्नं चेत्तदुत्पन्ना परा निर्वाणनिर्वृतिः॥५६॥
विचारितमलं शास्त्रं चिरमुद्ग्राहितं मिथः॥ संत्यक्तवासनान्मौनादृते नास्त्युत्तमं पदं॥
विक्षिप्यते कदाचिद्धीः कर्मणा भोगदायिना॥ पुनः समाहिता सा स्यात्तदैवाभ्यास-
पाटवात्॥५७॥

यापरस्परं गुरुशिष्यादिसंवादद्वारा चिरकालं प्रमापितं च॥ एवं कृत्वा किं निश्चितमित्यत आह
संत्यक्तेति॥ सम्यक्त्यक्तकामादिवासनात्मनस्तूष्णींभावादृते अधिकः पुरुषार्थो ना-
स्तीति निश्चितमित्यर्थः॥५६॥ एवं निरुद्धे कस्यचिच्चित्तस्य प्रारब्धकर्मणा विक्षेपे सति तस्य ती
काराय यत्नः कर्तव्य इत्याह॥ विक्षिप्यत इति॥ भोगप्रदेन प्रारब्धकर्मणा बुद्धिः कदाचि-
द्विक्षिप्यते चेत्तर्हि सा बुद्धिरभ्यासदार्ढ्यात्तदैव पुनरपि समाहिता स्यादित्यर्थः॥५७॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

२८०

तस्मात्तेषामुपायमाह ॥ काम्यादीति ॥ काम्याः कामनाविषयाः स्रगादयः प्राह्येषु वाञ्छादीनां
तेकाम्यादयस्तेषां येदोषास्तेषु जनितं यत्र संसारनिषयत्वादयस्तेषामुद्रिक्तवस्तोकस्तेनाविषयेकाप्स्
स्वपविचारादीनां तेनयोगाः ॥ तेषां कामादीनामागेहस्तेन प्रमादमाहत्य प्रसिद्धेति ॥ भवतु ततः किं
मायातस्मिन्तत्राह तामनिषेधेति ॥ ४४ ॥ नन्वकामादीनां मनस्थंहतत्त्वमात्मनमनस्तमनोराग्यस्य
तेनप्रत्यात्मनो योगापेक्षितत्वंतिशङ्केते ॥ नन्वतमिति ॥ मनोरागस्यमनसस्तत्वस्थेहतत्वाम
वपिपरंपरयानहेतुत्वात्मनस्तत्वं पंचेन्द्रियेभ्यो विहरति ॥ प्रयोषधरति ॥ ४५ ॥ परंपरयाप्रतनस्थेहे

काम्यादिदोषदृष्ट्याद्याः कामादित्यागहेतवः ॥ प्रसिद्धामोक्षहेतुस्तेषु जातेषु सत्त्वशुद्धिः
भवेत् ॥ ४६ ॥ नन्वत्र केषां कामादिर्मनोरागमतं कोहेतिति ॥ प्रयोषदोषबीजत्वात्तदित्यभगवा
नीरिता ॥ ४७ ॥ ध्यायतो विषयान्पुंसः सङ्गस्तेषूपजायते ॥ सङ्गात्संजायते कामः कामात्क्रोधो
भिजायते ॥ ४८ ॥ एवं जनेनमनोरागस्य निर्विकल्पसमाधिना ॥ मनसः कामक्रोधादिप्रसक्ति
कल्पसमाधिना ॥ ४९ ॥ बुद्धत्वेन वीरदोषत्रये नकालवासिना ॥ दीर्घश्रमणबुद्धाधमनोः

एतं विनिर्योगेते ॥ ५० ॥ हीकर्ममुदाहरति ॥ ध्यायतो विषयानितिसि

तत्त्वपदर्शनं यथा भगवा
नहीरागमनोरागस्यकः परिहारो योगस्वयमत्राह ॥ एकस्येति ॥ सोपिकृतः सिद्धतोमत
माह ॥ समस्यादृश्यति ॥ ५१ ॥ नन्वहङ्गागयोगासत्कल्पनतथात्वत्तत्वविनस्य ॥ कामादिरिस्मन्नाह
बुद्धत्वेनेति ॥ बुद्धमवगतेनेन तत्त्वमात्मैकालत्वं योगेन सत्तु तत्त्वेन कामक्रोधादिबुद्धिः
दोषदृष्टितेन प्रकान्तवासिना विजनदेशनिवासश्रीलेन प्रकुर्वतादीर्घ यहत्वद्धानारिमाजो

२८१

नन्वेवरागस्यसंयादृह्येनात्तत्तानर्थहेतोः कामादेः प्रत्यक्षत्वादेहिकामोगमात्रे स्वयोगिकामायप्रभुपग
मेकारोषसन्यसंचकार ॥ नेतमिति ॥ ननविनाशयमानेनविधिनिषेधप्रमाणसमनिकमप्रकामयादीः
नत्यावतं मानस्यतत्वप्रत्येष्टाचरणोस्मारित्यर्थः ॥ ५२ ॥ प्रमत्तकारोषधतिश्रयकलनरनिहनप्रति
पादनपरं सद्वेषतावार्थवचनमुदाहरति ॥ बुद्धाद्वैतेति ॥ बुद्धस्यद्वैतसत्तत्त्वमद्वैतस्वरूपस्यापनेनस
सबुद्धाद्वैतसत्तत्त्वविनस्ययथेष्टाचरणोयदिस्यात्तत्तहिंश्रुचिभक्षणादिकमपिस्यात्तथापा

तत्वंबुद्धापिकामादीन्निःशेषंनजहासिचेत् ॥ यथेष्टाचरणस्तेस्यात्कर्मशास्त्रातिलंघि
नः ॥ ५३ ॥ बुद्धाद्वैतसतत्त्वस्ययथेष्टाचरणंयदि ॥ शुनांतत्त्वदृशांचैवकोभेदोशुचिभक्ष
णे ॥ ५४ ॥ बोधात्पुरामनोमात्रदोषैः क्लिष्टोस्यधुना ॥ अशेषलोकनिंदाचेत्यहोतेबोध
वैभवं ॥ ५५ ॥ विड्वराहादितुल्यत्वेमाकांक्षीस्तत्त्वविद्भवान् ॥ सर्वधीदोषसंत्यागाल्लोकैः
पूज्यस्वदेववत् ॥ ५६ ॥

तत्वमवगत्यवैत्यकोपिविशेषः स्यादित्यर्थः ॥ ५४ ॥ एतावता किमनिष्टमापादितमित्याशंक्य
निरुत्तोतत्त्वदृशांचैवनकोपिविशेषः स्यादित्यर्थः ॥ ५५ ॥ एतावताकिमनिष्टमायातमित्यतोयमोत
कसोपहासमुत्तरमाह ॥ बोधादिति ॥ तत्त्वज्ञानोदयात्पूर्वंकामक्रोधादिचित्तदोषैस्तवक्लेशोभू
दिदानीं सर्वलोकनिंदामपिसहस्वेतिक्लेशाद्वैगुण्यमितिभावः ॥ ५५ ॥ तर्हि किंकर्तव्यमित्यतआह
विड्वराहादीति ॥ सर्वोत्कर्षहेतुत्वात्तत्त्ववोधस्यकामादित्यागात्तत्त्वेननसर्वाधमविड्वराहादिसा
म्यमाकांक्षी ॥ किंतुकामादित्यागात्सकलमनोदोषहानेनसर्वजनैर्देववत्पूज्यस्वभवे

मर्कं ५२

२९

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

किमनयोः शास्त्रीयद्वेतस्यैव तत्वबोधेनरकालमेवदेयत्वेनेत्याह॥ उभयमिति॥ शाकनिवारणं।
किमर्थं ह्यत आह॥ बोधसिद्धयइति॥ नचलिंगमाह शमयतीति॥ एतच्च तत्त्वबोधात्प्राक्कर्तव्यं द्वैतं
ततएव निवृत्तिसिद्धवस्तुविवेकादिवत्ज्ञानसाधनेषु मध्येशान्तः समाहितइतिपदाभ्यां शांति
समाधीश्रवणेन समर्थं॥ ५० ॥ ननुतत्त्वबोधात्प्राक्तनिवारणमित्यभिधानात् उत्तरकालमसत्त्वीका
यतात्पर्यमिति सिद्धान्तोऽयमाह॥ बोधादूर्ध्वमिति॥ उक्तमर्थं व्यतिरेकमुखेन दृढयति॥ कामादीति॥ का
मादिदोषैः क्लेशः सम्बन्धे यस्य तेन पुनः तत्त्वज्ञस्य कृतार्था जीवन्मुक्तत्वं न हि नास्त्येवेत्यर्थः।

दृश्यं तेन तत्त्वबोधशुद्धाक्षिवार्यं बोधसिद्धये॥ शमः समाहितत्वेन साधनेषूक्तं तेनतः ५१
बोधादूर्ध्वं चतद्वैतं जीवन्मुक्तिप्रसिद्धये॥ कामादिक्लेशबन्धेन युक्तस्य न हि मुक्तता
जीवन्मुक्तिरियं मामभूज्जन्मान्तराकृतौ॥ नहि जन्मापि ते तत्तत्स्वर्गमानात्मनो भवान
त्यागि विधाय दोषांस्त्वं मोदयेत मनोरथे। तदा दोषान्कामादीन्कामादिः किं न दीयते ५५

५२॥ ननुकामादिनिवारणे द्वैतस्यायामिति कद्रूपमर्थं दृश्यादित्युक्तौ बालेकिमनया प्राप
तिकया जीवन्मुक्तेति शंकते॥ जीवन्मुक्तिरिति॥ ऐहिकानिष्टनिवृत्तिमेवाभय्या जीवन्मुक्तिमारो
यात्मिकभोगानिवृत्तिमयाहिंदेहमुक्तिरपिमास्त्रयादित्यनिष्टव्यापारं परिहरति॥ नहीति
५३॥ प्रतिबन्धीमोचनेन शंकते तथाति सर्वेति॥ दोषशुक्तेन स्वर्गादेस्त्याज्यतेस कलङ्कघा
यैविधानकर्त्वेनानेविदोषद्वयस्य कामादेः॥ तन्तेन्नाम्नात्वमित्याह॥ नदादोषतनमेति॥ ५५॥

ब्रह्मत्वेति॥ तत्र तत्त्वज्ञानमृपाद्भावशौ विचारात्त्वं यत्तु च णादि
किं न ब्रह्मीयं द्वैतमिथ्याकोत्तायामाह॥ शास्त्रमिति॥ तत्र मनसा सहदेवश्यत्वं॥ आत्मसमाश्रुतेः कालेन
कं तत्त्वास्त्रीयं मानसे जगदिमर्थः॥ ननु ज्ञान स्यातबोधनादिभ्यस्तपर्यनं॥ नत्त्वास्त्रीयं द्वैतं तत्त्वालान्तेकालत्व
यद्वैतनचित्ते मनकार्यादिमाशंक्याह॥ वृद्धेनत्वेनत्वद्वैतमिति॥ दयालाकमसंकचिन्त्कामादीना।
गौतद्वैतातान्त्येनसंयं॥ नर्ध्यामममितितिवाक्यमस्याकार्यनितिबेलित॥ दयालाभवतर्कः कामसानुपपत्तिः
मनागपीतिप्रवोर्ध्वनकामाधवत्स्यात्समस्यानस्मिलितइत्नाममस्यैवेतिवदामः एतेनकाप्यनपपत्तिः

आत्मत्वविचारात्येशास्त्रीयमानसं जगत्॥ वृद्धेनत्वेनचद्वेदयमितिश्रुत्वत्रयासते॥ ५७॥ शा
स्त्राण्यधीत्य मेधावी अभ्यस्य च पुनः पुनः॥ परमंब्रह्मविज्ञाय उल्कावत्तान्यथोत्सृजेत्॥ ५८॥ ग्रं
थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः॥ पलालमिवधान्यार्थी त्यजेत्ग्रन्थमशेषतः॥ ५९॥ त
मेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः॥ नानुध्यायेद्बहूञ्छब्दान्वाचो विग्लापनं हितत्॥ ६०॥
तमेवैकं विजानीत ह्यन्या वाचो विमुञ्चथ॥ यत्नेन हाभ्यन्तरस्यायाः स्कतयः स्कुटाः॥ ६१॥
तमेवैकं विजानीतत्यन्या वाचो विमुञ्चथ॥ कामक्रोधादिकेनोद्धं मनोरास्यंतस्थन॥ ६२॥
शास्त्रीयमपिद्वैतं तत्त्वं भेदमिति निहिता॥ कामक्रोधादिकं त्वाश्रमसनारागस्तस्थन॥
अशास्त्रीयमपि द्वैतं तीव्रं मंदमिति द्विधा॥ कामक्रोधादिकं तीव्रं मनोराज्यं तदेतरत्॥ ६३॥

५६॥ नत्त्वबोधोत्तरकालेन द्वैतप्रतिपादनपराः श्रुतीरुदाहरति॥ शास्त्राण्यधीत्येति॥ ५७॥ ग्रंथमभ्या
५८॥ तत्त्वबोधोत्तरकालं तद्वैतप्रतिपादनपराश्रुतीरुदाहरति॥ शास्त्राण्यधीत्येति॥ ५७॥ ग्रंथमभ्या
स्येति॥ ५९॥ नमेवधीरइति॥ ६०॥ तमेवैकमिति॥ तमेवैकं विजानीतेत्यनेन॥ तमेवैकं ज्ञानयात्मानेअन्या
वाचोमुञ्चथामृतस्यैष सेतुरिति श्रुतिरर्थतः पठिता॥ ६१॥ अशास्त्रीयस्यापिद्वैतस्यावांतरभेदमाह॥
अशास्त्रीयमिति॥ द्विविधस्यापिक्रमेणोदाहरति॥ कामक्रोधादिकमिति इतरन्मंदमित्यर्थः॥ ६२॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु बाधहेतुनिवारणार्थं तत्र द्वितीयज्ञानमेव नो दीपादिनाशो वा तन्निवारणाभावेपि तस्य मिथ्यात्वं तत्रापि स्वपारमार्थिकमहं तत्त्वबोद्धुं शक्नुयामित्यत आह ॥ अनन्तहेतोपीति ॥ १९ ॥ न हेतुतस्तद्बाधज्ञानस्य हेतुत्वात्तत्प्रयोजकस्यापि न तन्निवारणे वेदान्तश्रुतिनियमाभावे प्रमाद इत्याह ॥ फलस्य इति ॥ फलपर्यन्तं फलं यावत्स्वयं प्रतिबन्धकं तत्स्वहेतु तस्य नित्यवृत्ताः तस्मात्त्वं विशेषहेत्वभावे एव हेतुत्वात्तत्र बोद्धव्यं न प्रमाणतः स्वहेतु निवारणे सत्यपि युक्तिर्न सा स्वयमभावतः गुरुशास्त्रादिभिः सत्ताना साधनसामग्रीवशात्त्वं न दृश्यं व स्तु बो- बोद्धुं शक्यं न भवति ॥ अतस्तन्निवारणप्रयोजकमिति भावः ॥ १८ ॥ ननु तथापि स्वहेतुहेतुकत्वमहं तत्र

अनन्तहेतो पीठ स्व हेतु हेतुर्न सम्भवात्मनो ॥ बुद्ध्या वलाद्धयं बोद्धुं शक्यं वस्तु केवलवादिना ॥ १९ ॥ व लयेन सिद्धतो वस्तु कर्मणा स्वाभाविकतः ॥ विरोधि हेत्वभावेपि न शक्यं बोद्धुमद्वयं ॥ २० ॥ प्रबोध के साधके च हेतुर्मोक्षस्य निर्मितेः ॥ अन्वयेन तु मशकाः चेतना स्वान्तरित्यवेक्षतः ॥ २१ ॥ जीवहेतुनश्वा शीघ्रं न शक्यो वेदितुं हिया ॥ उपादीनं तत्त्वं नाशीय मातस्य बोधनात् ॥ २२ ॥ ॥

ज्ञानतिरिक्तं साधकमाह ॥ प्रबोधकमिति ॥ ईश्वरनिर्मितेर्हेतुं प्रबोधकं ॥ न स्वप्रबोधज्ञानेनैव हेतुत्वात् नात्मन्यत्वमन्यस्य साधकं चराचरकर्माण्युपादेयं परस्य ज्ञानसाधनमोहादीनां विरहो हेतुमस्य विषये नमशकाश्चेतिहेतुतो न हेतुमाहात्म्यः कारणात्तद्बाधनत इति भावः ॥ २० ॥ इदानीं जीवस्य हेतुविभजते ॥ जीवहेतुमिति ॥ किं हि विधमपि सदा हेयमेव वेद्यमाह ॥ उपादीनं इति ॥ आनन्दस्या वबोधनात् ॥ तत्स्वावबोधनपर्यन्तमित्यर्थः ॥ २१ ॥ ॥

ननु नहि यथाकारस्वरूपं गत्वा बाधस्य हेतोः पक्षपातो यः ॥ हर्षमानसप्रपञ्चं च संस्कारस्य बोधो नेत्र मान नह यथाकारस्वरूपं गतत्वाद्बाधप्रयोजकत्वाद्बोधहेतुत्वे ततः ॥ वैयर्थ्यमिति ॥ नहि विज्ञानवादात्को सप्रपञ्चहेतुत्वोपपन्नं तिष्ठामो न कथं प्रतिबाधेन तद्दंशीकरोति ॥ वैयर्थ्यमिति ॥ नहि विज्ञानवादात्को- सप्रपञ्च हेतुलोपपन्नं तिष्ठा मोक्षमोहं तद्वादेन तदंगीकरोति विज्ञानवादिनो बाह्यार्थमेवापलपति वयं तु न तथा यथा सवमेद इत्यर्थः । भेदस्य फलमाह ॥ बाध्यमिति ॥ विज्ञानवादिनो बाह्यार्थमेवापलपति ॥ प्रयोजनमिति ॥ मानाधीनावस्तुसिद्धिर्न प्रयोजनवशात्स्वाभ्युपगमोऽपि युक्तः एवमाशंक्याह ॥ प्रयोजनमिति ॥ मानाधीना वस्तुसिद्धिर्न प्रयोजनवशान्नस्वाभ्युपगमो प्रयुक्तः एवमाशंक्याह प्रयोजनस्य सत्त्वमात्रेणास्य लौकिकैर्वादिभिश्चाभ्युपगमा- प्रयोजनाधीनानामानसिद्धस्य प्रयोजनस्य सत्त्वमात्रेणास्य लौकिकैर्वादिभिश्चाभ्युपगमा-

वैयर्थ्यमस्तु वा बाह्येन वा वयमिति मीयमहे ॥ प्रयोजनमपेक्ष्य तेन मानानीति हि
स्थितिः ॥ २३ ॥ बंधस्य मानसं हेतुं तद्दीर्घेन शाम्यति ॥ अभ्यसेद्योगमेवातो ब्रह्म
ज्ञानेन किं वद ॥ २४ ॥ तात्कालिकहेतुशान्तावप्यागामिजन्मनिस्त्वयः ॥ ब्रह्मज्ञानेन वि
नानस्यादिति वेदान्तडिंडिमः ॥ २५ ॥

इति भावः ॥ २२ ॥ मानसं हेतुं स्वबंधहेतुं वेत्तस्य मनोनिरोधात्मकयोगेनैव निवृत्तिसंभवाद्ब्रह्मज्ञानं-
नेत्याशंक्याह ॥ बंधस्येति ॥ २३ ॥ योगेन किं हेतोपशमस्तात्कालि कं उत आत्यन्तिको वेति विकल्प्याद्यमंगीकृत्य द्वितीयं दूषयति ॥ तात्कालिकेति ॥ तात्कालिकस्य मन्य- स्य बंधनिवर्तकत्वाभ्युपगमो विरुद्ध इत्याशंक्याह ॥ बंधस्य इति ॥ २४ ॥ ॥ तदा चेत्सर्वदा कारणावेष्टयिष्यति मानवाः ॥ तदाऽऽत्मस- तेसर्वपापेभ्यः तावत्प्राप्तिर्न ब्रह्मज्ञानादेवबंधनिवृत्तिरिति मन्तव्यमिति ॥ यदा चर्मवदाकाशं वेष्टयिष्यन्ति मानवाः ॥ तदा देवम विज्ञाय दुःखस्यान्तो भविष्यतीत्यादिश्रुतिषु अन्वयव्यतिरेकाभ्यां ब्रह्मज्ञानादेव बंधनिवृत्तिरभि-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नन्वेतावन्वयव्यतिरेकौ बाह्यार्थविषयौ किं न स्यातामित्यत आह ॥ असतीति ॥ नरो मनुष्यः पतद्
पलक्षणमेषामपि स्वप्नादौ स्वप्नसमाध्यादिकाले बाह्यार्थे नष्टेऽपि योषिदादौ प्रतिकूले व्याघ्रादौ
वा पारमार्थिके विषये असत्यपि बध्यते मानेऽपि बध्यते ॥ तावद्दुःखाभ्यां युज्यते ॥ समाध्यादिषु
सत्सु न बाह्यार्थे सत्यपि न बध्यते न सुखदुःखादिमान् भवति ॥ अत एतद्विषयावन्वयव्यतिरेकौ न
स्त इत्यर्थः ॥ २९ ॥ मनोमयप्रपंचस्य बंधकत्वे नान्वयव्यतिरेकावुदाहृत्योपसंहरति ॥ परमिति ॥

असत्यपि च बाह्यार्थे स्वप्नादौ बध्यते नरः ॥ समाधिसुप्तिमूर्छासु सत्यपि
न बध्यते ॥ ३० ॥ देशांतरं गते पुत्रे जीवत्येवात्र तत्पिता ॥ विप्रलंभकवाक्येन मृतं म
त्वा प्ररोदिति ॥ ३१ ॥ मृतेऽपि तस्मिन्वार्तायामश्रुतायां न रोदिति ॥ अतः सर्वस्य
जीवस्य बंधकृन्मानसं जगत् ॥ ३२ ॥ विज्ञानवादो बाह्यार्थवैयर्थ्यात्स्यादिहे
ति चेत् ॥ न हृद्याकारमाधातुं बाह्यस्यापेक्षितत्वतः ॥ ३३ ॥

देशांतरे ग्रामे मठे वा गते पुत्रे जीवत्येव सत्यत्र स्वगृहे स्थितस्तत्पिता विप्रलंभकस्य मिथ्यावचनैः परवं
चकस्य तु मृतोऽयं तव पुत्र इति वाक्येन स्वपुत्रे मृतेऽपि तत्पिता प्रकर्षेण रोदनं करोतीति ॥ ३१ ॥ तस्मि
न्नेव पुत्रे तत्र मृतेऽपि तन्मृतिवार्तायामश्रुतायां सत्यां रोदनं न करोति ॥ फलितमाह ॥ अत इति ॥ ३२ ॥
धीमयस्यैव जगतो बंधहेतुत्वाद्योगाचारो बाह्यार्थापलापादयमस्मदीयसिद्धांतः प्राप्तः स्यादिति शंकते विज्ञा
नेति परिहरति ॥ न हृदीति ॥ यद्यपि मानसप्रपंचस्यैव बंधहेतुत्वं तथापि तद्धेतुत्वेन बाह्यार्थस्याप्यपि॰

श्रीकाशीविज्ञान... ॥ १२ ॥

286

287

इदानीं वार्तिककारवचनमाह ॥ मातेति ॥ मातुः स्वाभिष्टानुष्ठेयविदाभासरूपात्मा न
मानाभिनिष्पत्तिर्मानस्य स्वाभासोऽतः करणवृत्तिरूपस्याभिनिष्पत्तिरुत्पत्तिर्भवतीति शेषः ॥ निष्प
न्नमनुवर्तते तन्मानेन मेयं प्रमेयं घटादिरूपमेति प्राप्नोति ॥ किंच तन्मानेन मेयाभिसंगतेन प्रमेयेन संब
द्धं मनो मेयाभं मेयस्येवाभा यस्य तन्मेयाभं तस्य भावस्तत्त्वं मेयसमानाकारत्वं प्रपद्यते प्राप्नो
तीत्यर्थः ॥ २६ ॥ भवत्वेवं प्रकृते किमायातमित्यत आह ॥ सतीति ॥ नन्वस्मन्मयद्वयस्यैव मनोमय

मातुर्मानाभिनिष्पत्तिर्निष्पन्नं मेयमेति तत् ॥ मेयाभिसंगतं तच्च
मेयाभत्वं प्रपद्यते ॥ २७ ॥ सत्येव विषये द्वौ धीस्तौ मन्मयधीम
यौ ॥ मन्मयो मानमेयः स्यात्साक्षिभास्यस्तु धीमयः ॥ २८ ॥ अन्वय
व्यतिरेकाभ्यां धीमयो जीवबंधकृत् ॥ सत्यस्मिन्सुखदुःखे स्तस्तस्मि
न्नसति न द्वयं ॥ २९ ॥

घटस्तेनैव मनसावरहीनमपाकत्वात्ग्रहकांतराभावोऽसिद्ध इत्याह ॥ मन्मय इति ॥ यथास्मन्मयो
मानमेयः तथा धीमयः साक्षिभास्यरूपमयः ॥ २८ ॥ भवत्वेवं द्विविधे हेतमत्र कस्य हेयत्वं कस्य वा नेति
नत्वायतद्भ्याशंक्य ॥ जीवसृष्टस्य हेयत्वमित्यभिप्रेत्य तस्यैव बंधहेतुत्वं दर्शयति ॥ अन्वय इति ॥ अन्वय
व्यतिरेकावेव दर्शयति सतीति ॥ अस्मिन्जीवसृष्टे मानसप्रपंचे सति विद्यमाने सुखदुःखे स्तः
अतः अस्मिन्नसति न द्वयं सुखदुःखं च नास्तीत्यर्थः ॥ २९ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

ननु श्रोत्रादिस्थले बाह्यविषयाभावात् कथं मनोमयत्वम् इति स्थले तु नन्दनं पपङ्केवा बा
वत्वनः सत्वादिति शंकते ॥ श्रोत्रीति ॥ मानेन प्रमत्वादिप्रमाणेन मेयस्य प्रमेयस्येत्यर्थः ॥ ३ ॥ श्र
मिति स्थले बाह्यविषयस्य नन्वसंभावीकरोति ॥ बाढं इति कथ्यते दिनं हि विषयस्य मनोमयत्वमुच्यते ।
मनसाह ॥ माने निति ॥ मानेन चत्वारादि प्रमाणेन विषयाकृति तत्तत्समेयेन योगात् संभवात् स्या
न्नन्विदं च कथं कल्पितमित्याशंक्याह ॥ आद्येति ॥ ४ ॥ न च तावद्बाह्यकारं वचन मदाहरन्
मेयेति ॥ यथाऽऽद्येनार्शमूषायां सिक्तं तत्तत्रिभं जायते ॥ तत्समानाकारं भवति ॥ यथा तद्धारी

आंति स्वमनोगतं स्फुरति विषयस्य मनोमयं ॥ नाद्यमानेन मेयस्य तन्मनोमयतीति चेत् ॥
बाढं मानेन मेयेन योगात्सा विषयाकृतिः ॥ आद्यवातिं क काटम्यामेयमर्थं यदीरितः ॥
मूषासिक्तं यथाताम्रं तत्रिभं जायते तथा ॥ रूपादीन्व्याप्नुवच्चित्तं तत्रिभं दृश्यते ध्रुवं ॥ ५ ॥
व्यंजको वा यथाऽऽलोको व्यंग्यस्याकारतामियात् ॥ सर्वार्थव्यंजकत्वाद्धीरर्थाकारा प्रदृश्यते

तिविषयाकारतां गत्वा विषयीकरोति चित्तं धवमवलपेन त्रिभं दृश्यते तदुपलभ्यत इत्यर्थः ॥ ६ ॥ ननु ताम्रादे
रग्निसंपर्कात् द्रवत्वं मूषासिक्तस्य कठिनस्य मूषाभिज्ञानेन पृक्वापत्तेर् मूषाकारप्राप्तिर्ना
पि दृश्यते तया लोकादिविलक्षणा या विषयव्याप्तिर् अपि कथं कथं तदाकारप्रतिबिंबाशंक्य दृष्टां
तरमाह ॥ व्यंजक इति ॥ यथा वा व्यंजकः प्रकाशकः प्रालोकः प्रानपादिर्व्यंग्यस्य प्रकाश्यस्य
घटादीनामाकारतां स्वाकारवत्तामियान्याप्नुयात् ॥ एवं धीरपि सर्वार्थव्यंजकत्वात् सकलपदा
र्थप्रकाशकत्वादर्थाकारा प्रदर्शयाकाराच्युतवाकारा यस्याः सा तथा प्रदृश्यते प्रकर्षेणोपलभ्यते ॥

ननु सति भोग्यभेदे भोगभेदः कल्प्येत स एव नास्तीत्याशंक्य एकस्मिन्नपि त्वाद्रेवमित्याह ॥ दृष्यतीति ॥ एको
मृगाद्यर्थो तेन लब्धा दृष्यति ॥ अन्यस्तु पदाविषयस्त्वलाभात् क्रुध्यति ॥ अन्यस्तद्विषये विरक्तस्तं न म
तिपरस्य लाभालाभनिमित्तकौ हर्षकोपौ न भवतीत्यर्थः ॥ ९ ॥ के ते भोग्यभेदा यत्कृतो जीवसृष्टा
श्राकारभेदाः प्रसक्तं प्राह ॥ प्रियइति ॥ मणिरुत्पाप्रियमप्रियत्वोपेक्ष्यत्वलक्षणाकारभेदा जीवैः स
ष्टा विषये प्यसाधारणमनुसृत्य तत्र निरूपणं तदीश्वरनिर्मितमित्यर्थः ॥ १० ॥ अङ्को जीवसृष्टाकारभेद
मुदाहरणेन स्पष्टयति ॥ भार्येति ॥ ननेदा भर्तृभगिनी यातानां देवरपत्नी प्रतियोगिधिया भर्तृ

हृष्यत्येको मणिं लब्ध्वा क्रुध्यत्यन्यो ह्यलाभतः ॥ पश्यत्येव विरक्तोऽत्र न हृष्यति न कुप्यति ॥ १९ ॥
प्रियोऽप्रियउपेक्ष्यश्चेत्याकारा मणिगास्त्रयः ॥ सृष्टा जीवैरीशसृष्टं रूपं साधारणं त्रिषु ॥ २० ॥
भार्या स्नुषा ननांदा च याता मातेत्यनेकधा ॥ प्रतियोगिधियायोषिद्भिद्यते न स्वरूपतः ॥ २१ ॥
ननु ज्ञानानि भिद्यंतामाकारस्तु न भिद्यते ॥ योषिद्वपुषि निश्शयोनष्टो जीवनिर्मितः ॥ २२ ॥

तयेत्यादिलक्षणप्रतियोगिगोचरया बुद्ध्यानतरूपत इत्यर्थः ॥ २१ ॥ ननु योषिद्विषयाणिभा
र्यात्वादिलक्षणप्रतियोगिगोचरयाबुद्ध्यानतरूपत इत्यर्थः ॥ ननु योषिद्विषयाणि भा
र्यास्नुषेत्यादिज्ञानानीत्येव भिन्नानि उपलभ्यं ॥ नतु तद्विषयभूताया योषितास्तु रूपभेदो दृश्यते ॥ अतः श्र
तियोगिधिया योषिद्भिद्यत इत्युक्तमयुक्तमिति शंकते ॥ ननु इति ॥ ज्ञानैव लक्षणस्येव लक्षणप्रा
विनाभूतत्वात्तेषामाकारभेदो गीकर्तव्य एवेत्याशयेन परिहरति ॥ मैवमिति ॥ मैवं मांसमयी योषि
काचिदन्या मनोमयी ॥ मांसमय्या अभेदेपि भिद्यते हि मनोमयी ॥ २२ ॥

288

289

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

मानिव समाज्ञात्मेकमस्य स्वायामणिनीडे मेवास्य तन्त्रा याश्या मते । यदिदमयुतस्मादिनायत्वा
त्मावाप्ययोमनोमयः प्राणमयश्चेतेमनाकाशसंभृताधिकृत्य कौषितकावृषद्वयेणाद्दर्शिता लोमाह ‖ जी
वादिकमिति ‖ ननूक्तसमाज्ञानां जगद्देवतः पातिते ने स्वयं निर्मितत्वात्जीवनिर्मितास्यात्मनः समूलात्म
नाशं कतत्त्वस्य स्वयं निर्मितत्वे पि भोग्यताकार्यस्य जीवनिर्मितत्वानेवमित्याह ‖ ईशो नेति ‖ ४ ‖ ता
न कर्मभ्यो तानि विहितेश्वति चिदं च देवतापरलोकविद्यादिविषयेताने ‖ कर्मैव विहितेन यथादिरूपेण ति

जीवादिके दृश्यवर्गमायोसोडीनतुचात्मनः ‖ वाक्यार्थेति समन्तमन्नाता मन्तव्यास्यवां ‖ ४ ‖
ईशो न तु यथैतानि निर्मितानि निरूपणः ‖ तथापि चाविकर्मण्योजीवो कार्यधीनदूत्तां ‖ ५ ‖
ईशकार्यं जीवभोग्यं जगद्द्वाभ्यां समन्विते ‖ पितृजन्या भर्तृभोग्या यथा योषित्येष्यते ‖ ६ ‖
मायाहृष्टात्मकोतीशो केवलः साधनेतनौ ‖ मनोवृष्टात्मको जीवः सङ्कल्पा भोगसाधने ‖ ७ ‖
ईशनिर्मितमायादौ वस्त्वेकविषयस्थिते ‖ भोक्तृधीवृत्तिनानात्वात्तद्भोगो बहुधेष्यते ‖ ८ ‖

चिदं ‖ हिंसादिरूपेणात्माभ्यामित्यर्थः ‖ तदुक्तं तैत्तिरीये भोक्त्रीत्याद्यिशानेनात्मभोगोपकारकतेस्यर्थः
‖ ४ ‖ किमुक्तं भवतीत्यत आह ‖ ईशइति ‖ जगत्समाजोत्तरौ नोक्त्रीत्यादिरूपमीशकार्यं तेन जीवभो
ग्यत्वेन वहाभ्यामेवह्यमित्यर्थः ‖ एकस्योभयसंबंधे दृष्टान्तमाह ‖ पितृइति ‖ ईशजीवयोर्जगत्सृष्टौ किं
साधनमित्यत आह ‖ मायेति ‖ नन्वेकस्मिन्वस्तुस्वरूपातिरिक्तो भोगः सनाकारणं नास्तिको
जीवेन सृज्यत इत्याशंक्याह ‖ ईशेति ‖ एकस्मिन्नेव विषये बहुविधो भोगः स्वलभ्यमानत्वाद्योजनके

र्विलादिविकल्पधर्मदर्शनेनैतदुक्तमाशंक्याह ‖ मोहेश्वरीति
नैवेश्वरस्यैव जीवस्वरूपेणाविशिष्टत्वेन स्यात्तत्
माहेश्वरी मायेति महेश्वरमिति श्रुत्युक्तमहेश्वरसंबंधिनी या माया सा तस्य निर्माणशक्तिवद्वेदा
नत्वेन सामर्थ्यं वन्मोहनशक्तिश्च मोहनसामर्थ्यमप्यस्ति ‖ तदेतदुक्तं मोहात्मकमितिश्रुतेः ‖ त
स्मादीशस्य मोहनशक्तिस्तेन सर्वान्जीवान्मोहयति ‖ चिदाभेदाद्विरूपः
नः किमित्यत आह ‖ तमिति ‖ अहो मोहनशक्तिः कि मित्यत आह ‖ मोहादिति ‖ मोहात्मवीक्षात ‖ अनीशता चिह्न
ज्ञानं रहितेनकरोति ‖ ९ ‖ ननु तर्हि किमित्यत आह ‖ मोहाच्छरीरात्मभ्रमानगतः शोचति दुःखि
त इत्यर्थः निवर्तयितृ समर्थं तदपि वर्णितमग्नः शरीरे नाहमात्मा भ्रमानेन गतः शोचति दुःखि

माहेश्वरी तु माया या तस्या निर्माणशक्तिवत् ‖ विद्यते मोहशक्तिश्च तं जीवं मोहयत्यसौ
मोहादनीशतां प्राप्य मग्नो वपुषि शोचति ‖ ईशसृष्टमिदं द्वैतं सर्वमुक्तं समासतः ‖ १० ‖
समाप्त्यवाक्तायां द्वैतं जीवसृष्टं प्रपञ्चितं ‖ सप्तान्निसमस्तानेन कर्मणा जनयत्पिता ‖ ११ ‖
मत्रान्नसमेकं देवान्नेद्वे पश्वन्नं चतुर्थकं ‖ मन्त्रवितयमात्मार्थं मन्त्रान्नाति नियोजनं ‖ १२ ‖

नायभिमानेनकरोति ‖ समाने वृक्षे पुरुषो निमग्नोऽनीशया शोचति मुह्यमान इति श्रुतेरित्यर्थः ‖ वस्
वस्तुतो ज्ञानेन विमुच्यत इति ‖ ईशसृष्टमितिसमासतः संक्षेपणोक्तमित्यर्थः ‖ १० ‖ ननु जी
मायां सांकर्य ‖ परिहाराय यदुक्तं निगमयति ‖ ईशसृष्टमिति समासतः संक्षेपणोक्तमित्यर्थः ‖ १० ‖ ननु जी
वसृष्टं द्वैतं किं मानमित्याशंक्याह ‖ सप्तेति ‖ कथं तत्प्रपञ्चितमित्याशंक्य सप्तान्नशब्दवाच्य
द्वैतस्य सृष्टिप्रतिपादिकं यत्सप्तान्नानि मेधया तपसाजनयत्पितेति वाक्यमर्थतः संगृह्णाति ‖ अन्ना
नीति ‖ पिता स्वाहृष्टद्वारा जगदुत्पादनेन सर्वलोकदेहपालको जीव इत्यर्थः ‖ १२ ‖ नन्वन्नसमकस्य
मनेकिमर्थमित्याशंक्य ‖ तद्विनियोगमेकमस्य साधारणं देवान्भाजयत ‖ ब्रीह्यादिना कृत

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं बृहदारण्यकेप्यव्याकृतशब्दवाच्याद्ब्रह्मणो नामरूपात्मकं जगदुत्पन्नमिति स्फुटमित्याह
जगदिति ॥ ८ ॥ विराण्मनुर्नरो गावः इति ॥ तद्धेदं तर्ह्यव्याकृतमासीत्तन्नामरूपाभ्यामेव व्याक्रियतेऽसौ
नामायमिदंरूप इति वाक्येन स्पष्टः ॥ अत्र च एतन्नामरूपे अव्याकृतशब्दवाच्यान्मायोपाधिकाद्ब्र
ह्मणो नामरूपसृष्टिकथनाल्लक्षणया स्पष्टेति कृत्वा ॥ तयोर्नामरूपयोर्विराडादिरूपस्य तत्कार्यस्य सृष्टि
नावनंतरमप्येतर्हि नामरूपाभ्यामेव व्याक्रियतेऽसौनामायमिदंरूपमिति वाक्येनाभिहितात्ते
च विराडादिरूपान्विदमप्यत्रास्मिन्कल्पविशेषास्यादिना ॥ एवमेव यदिदं किंचित्मिथुनमापिपी

जगद्व्याकृतं सर्वं यासीद्व्याक्रियते पुनः ॥ इत्याभ्यां नामरूपाभ्यां विराडादिषु ते स्फुटे ॥ ८ ॥
विराण्मनुर्नरो गावः खराश्वाजावयस्तथा ॥ पिपीलिकावधि द्वंद्वमिति वाजसनेयिनः ॥
कृत्वा रूपान्तरं जैवं देहे प्रविशतीश्वरः ॥ इति ताः श्रुतयः प्राहुर्जीवत्वं प्राणधारणात् ॥ १० ॥ चैत
न्यं यदधिष्ठानं लिंगदेहश्च यः पुनः ॥ चिच्छाया लिंगदेहस्था तत्संघो जीव उच्यते ॥ ११ ॥

लिकाभ्यस्तत्सर्वमसृजतेत्यनेनरूपिणा स्पष्टः ॥ उदाहृताभिः श्रुतिभिः ईश्वरस्याभिध्यानानंतरं ब्र
ह्मणो जीवरूपेण प्रवेशोऽभिहित इत्याह ॥ कृत्वेति ॥ १० ॥ कृत्वा जैवं जीवसंबंधि यद्रूपांतरं प्रविविक्ताद्ब्र
ह्मणो विलक्षणं विकाररूपमिश्वरः ॥ देहे देहेऽनेन जीवेनेत्यादिश्रुतय आहुः ॥ जीवत्वमिति ॥ प्राणादी
नां स्वामित्वेन प्रेरकत्वं प्राणधारणं ॥ १० ॥ तस्माज्जैवरूपं कृत्वा प्रविशतीत्युक्तं किं तदित्यपेक्षायामा
ह ॥ चैतन्यमिति ॥ अधिष्ठाने लिंगदेहकल्पनाधारभूतं यच्चैतन्यमस्ति यश्च कल्पितो लिंगदेहो
यश्च तस्मिन् लिंगदेहे विद्यमाना चिदाभासस्तत्संघस्तेषां त्रयाणां समूहो जीवशब्देनोच्यत इत्य

ईश्वरस्य जगत्कारणत्वेनैव निर्देशश्रुतिरपि प्रमाणं [illegible] कार्यार्थतः पठति ॥ स्वमिति हार्थो
ईश्वरस्य जगत्कारणत्वेनैव [illegible] सत्त्वाभिप्रेतमाकाशमन्यत्सर्वमेव तु कार्यं [illegible] इत्यादिना नामरूपसमं तत
संसृज्य नामरूपे व्याकरवाणीति [illegible] आकाशादिदेहपर्यंतं जगत्सर्वमभिध्यायो
न वाक्येन ब्रह्मणा निर्दिष्टमेव प्रत्यगभिन्नाद्ब्रह्मण आकाशादिदेहपर्यंतं जगन्निर्मितमिति यथा
पि च श्रुतिर्दर्शयति सोऽकामयत ॥ बहु स्यां प्रजायेयेति स तपोऽतप्यत स तपस्तप्त्वा इदं सर्वमसृजत यदि
दं किंचेति वाक्येन तत्सेव ब्रह्मणो जगत्स्रष्टृत्वं पर्यालोचनेन जगत्स्रष्टृत्वेनैव निर्दिष्टं तद्
ब्रह्मणो [illegible] जगत्स्रष्टृत्वं स्फुटमित्याह ॥ इदमिति ॥ सदेव सोम्येदमग्र आ
सीत् ॥ १ ॥ [illegible] एव जगत्स्रष्टृत्वेन स्फुटमित्याह

ईक्षणपूर्वकं तेजोऽसृजत् ॥ स देहाकृतमादर्शी ॥ सम्भूतं ब्रह्मणस्तस्मादेतस्मादात्मनोऽपि च
ईक्षां बहु स्यां प्रजायेयेति कामतः ॥ तपस्तप्त्वासृजत्सर्वं जगदित्याह तैत्ति
राः ॥ ४ ॥ बहु स्यामहमेवातः प्रजायेयेति कामतः ॥ तपस्तप्त्वासृजत्सर्वं जगदित्याह तैत्ति
रिः ॥ ५ ॥ इदमग्रे सदेवासीद्बहुत्वाय तदैक्षत ॥ तेजोऽबन्नाण्डजादीनि ससर्जेति च सामगाः ॥ ६ ॥
विस्फुलिंगा यथा वह्नेर्जायन्तेऽक्षरतस्तथा ॥ विविधाश्चिज्जडा भावा इत्याथर्वणिकश्रुतिः

सीदेकमेवाद्वितीयमिति ॥ सदुपहितेनैव सोपक्रमतदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृ
जतेत्यादिना तस्यैव [illegible] पूर्वकं तेजोऽबन्नसृष्टिमभिधाय तेषां त्रिवृत्करणाभिधानाद्दीपवीजादि
[illegible] प्रविश्य जगत्सर्वं [illegible] सामगा आहुरित्यर्थः ॥ ६ ॥
भवन्तीत्युक्ते जगतो [illegible] आदित्यादिश्रुतेर्ज्वलतो [illegible] विस्फुलिंगाः सहस्रशः प्रभवन्ति सह
[illegible] ॥ यथा सुदीप्तात्पावकाद्विस्फुलिंगाः सहस्रशः प्रभवन्ते सरूपाः [illegible] ब्रह्मणो जग
पः तथाक्षराद्विविधाः सोम्य भावाः प्रजायन्ते तत्र चैवापियन्तीति सरूपाः

उत्पत्तिः स्वप्नप्रसाद विस्फुलिंगादि १ ॥

292
293

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

गे नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ मयाद्वैतविवेकस्य क्रियते पदयोजना॥ चिकीर्षितं
स्य ग्रन्थस्य निष्प्रत्यूहपरिसमाप्त्याभिलषितदेवतानमस्काररूपं मंगलमाचरन्नस्य वेदान्त
शास्त्रप्रकरणत्वाच्छास्त्रीयमेवानुबन्धचतुष्टयं सिद्धवत्कृत्य ग्रन्थारम्भं प्रतिजानीते॥ ईश्वरेणेति॥ ईश्वरेण
कारणोपाधिकेनान्तर्यामिणा जीवेनापि कार्योपाधिकेनाहंप्रत्ययिना च सृष्टमस्ति तेन यद्द्वैतं विवि
च्य विभज्य प्रदर्श्यते॥ अस्य द्वैतविवेचनस्य फलं करतलगतामलकवत्स्पष्टयोजनं च दर्शयति॥ विवेक इति
विवेके जीवेश्वरसृष्टयोर्द्वैतयोर्विवेचने कृते सति॥ जीवेन स्वीकृतो हेयः परित्याज्यो बन्धो यो बन्धः स्फुट

ईश्वरेणापि जीवेन सृष्टं द्वैतं विविच्यते॥ विवेके सति जीवेन हेयो बन्धः स्फुटी भवेत्॥१॥
मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम्॥ स मायी सृजतीत्याहुः श्वेताश्वतरशाखिनः॥२॥
आत्मा वा इदमग्रेऽभूत्स ईक्षत सृजा इति॥ संकल्पेनासृजल्लोकान्स एतानिति बह्वृचाः॥३॥

द्वैतं स्फुटी भवेत्॥ स्पष्टं ज्ञायेत॥ एतावता जीवेन हेयमिति विशिष्टोऽनयोरर्थः॥१॥ ननु सृष्टद्वैतहानौ जीवा
नामेव न स्याद्द्वैतं ते वा द्विनो वर्णयन्तीत्यतः कथमीश्वरसृष्टत्वमवगतं न यतः श्रुतयो बह्वृचश्रुति वि
यात्रेदं चोद्यमन्यापेक्षितमर्हतीत्यभिप्रेत्य श्वेताश्वतरवाक्यानामेवार्थं पठति॥ मायामिति॥ मायो-
पाधिकमीश्वरं प्रकृत्यास्यान्मायोपसृजतेति सममनादेति॥ तच्छेत्र स्वरूपयतः श्वेताश्वतरशा
खिनो वर्णयन्तीत्यर्थः॥२॥ ऐतरेयोपनिषद्वाक्यमर्थतोऽनुक्रामयति॥ आत्मेति॥ आत्मा वा इदमेक
एवाग्र आसीन्नान्यत्किंचन मिषत्स ईक्षत लोकान्नु सृजा इति स इमांल्लोकानसृजतेत्येतेनैव वाक्येनाहि

जीवत्वोपाधिभूतानां कोशानां प्रोक्तानामिहितज्ञानं तत्त्वविभिन्नं जीवत्वमित्याशंक्याह॥ कोशेति॥ कोशाप
धोपाधिः कोशोपाधिविवक्षायां पर्यालोचनायां क्रियमाणायां ब्रह्मैव स्वस्माद्विलक्षणमेव जीवतामी
श्वरव्यवहारविषयतां गच्छति॥ नन्वेकस्यैव विरुद्धधर्मद्वययोगित्वं युगपत्कथं दृष्टं चेत्यत आह॥ पि
तेति॥ यथैक एव देवदत्त एकदैव पुत्रं प्रति पिता भवति पौत्रं प्रति पितामहः॥ एवं ब्रह्मापि कोशोपाधि
विवक्षितायां जीवो भवति॥ शक्त्युपाधिविवक्षायामीश्वरश्च भवतीत्यर्थः॥४१॥ ब्रह्मत्वं तत्त्वजीवत्वमीश्वर
नैवाब्रह्मणो नास्तीत्यनन्तरश्लोकेनाह॥ पुत्रादेरिति॥४२॥ इदानीमुक्तज्ञानस्य फलमाह॥ य एवमिति

कोशोपाधिविवक्षायां याति ब्रह्मैव जीवताम्॥ पिता पितामहश्चैकः पुत्रपौत्रौ यथा प्रति॥४१॥
पुत्रादेरविवक्षायां न पिता न पितामहः॥ तद्वन्नेशो नापि जीवः शक्तिकोशानवेक्षणे॥४२॥ य एवं ब्र-
ह्म वेदैष ब्रह्मैव भवति स्वयं॥ ब्रह्मणो नास्ति जन्मातः पुनरेष न जायते॥४३॥ इति पंचकोशविवेकप्रकरणं
तृतीयं प्रकरणं॥३॥

यः साधनचतुष्टयसंपन्न एवमुक्तेन प्रकारेण पंचकोशविवेकपुरःसरं ब्रह्मस्व-
स्वाभिन्नं सत्यादिलक्षणं वेद॥ साक्षात्करोति स एष स्वयं ब्रह्मैव भवति॥ स यो ह वै तत्परमं ब्रह्म वेद ब्रह्मै-
व भवति ब्रह्मविदाप्नोति परमित्यादिश्रुतिभ्यः॥ ततोऽपि किमित्यत आह॥ ब्रह्मण इति॥ न जायते म्रिय-
ते वा विपश्चिदित्यादिस्मृतेश्च ब्रह्मणो जन्म नास्ति॥ अतएव विद्वानपि स्वात्मनस्तद्रूपत्वावगमाद्ब्रह्मै-
व जायते॥ न स पुनरावर्तत इति श्रुतेरिति॥४३॥ इति श्रीपरमहंसपरिव्राजकाचार्यविद्यारण्यमुनी-
सा श्रीरामकृष्णविरचितायां पंचकोशव्याख्याने तृतीयं प्रकरणम्॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कितद्रूपाविद्यमित्याकांक्षायांतद्भेदक्रमेणादर्शयितुंबादावीश्वरोपाधिभूतांशक्तिंनिरूपयति
शक्तिरिति॥ ऐश्वरीईश्वरोपाधिभूतायाईश्वरसंबंधिनीकाचिदनिर्वचनीयाशक्तिरस्ति॥ सर्ववस्तु
नियामिकासर्वेषामंतर्यामिब्राह्मणोक्तानांपृथिव्यादीनांनियम्यवस्तूनांनियमनकर्त्रीशक्तिरस्ति
साकुत्रवर्ततइत्यतोवानोपलभ्यतइत्याशंक्याह॥ आनंदमयमिति॥ आनंदमयादिषुसर्वलोकेषुसर्वे
षुवस्तुषुगूढावर्तते॥ अतोनोपलभ्यतइत्यर्थः॥ नियमेनानुपलभ्यमानायास्तस्याःसत्वमेवकिंना
स्तीत्याशंक्यजगन्नियमनान्यथानुपपत्त्यासावश्यमभ्युपेयेत्याह॥ वस्तुनःपृथिव्यादीनांकाठिन्यादि

शक्तिरस्त्यैश्वरीकाचित्सर्ववस्तुनियामिका॥ आनंदमयमारभ्यगूढासर्वेषुवस्तुषु॥३७॥
वस्तुधर्मानियम्येरन्शक्त्यानैवयदातदा॥ अन्योन्यधर्मसांकर्याद्विप्लवेतजगत्खलु॥३८॥
चिच्छायावेशतःशक्तिश्चेतनेवविभातिसा॥ तच्छक्त्युपाधिसंयोगाद्ब्रह्मैवेश्वरतांव्रजेत्॥३९॥

वन्नाद्योयदाशक्त्यानैवनियम्येरन्तदान्योन्यधर्मसांकर्यात्सांकर्यादिमिश्रणात्कस्मान्नाज्जगदिदंविप्लवे
त॥ अनियतव्यवहारंविनश्यतोनाशमियादित्यर्थः॥ तत्सिद्धिरितिप्रसिद्धिद्योतनपति॥३८॥ ननुजडायाःशक्तेः
जगन्नियामकत्वंनयुज्यतइत्याशंक्याह॥ चिच्छायेति॥ साशक्तिश्चिच्छायावेशतश्चिदाभासप्रवेशा
च्चेतनेवचेतनवन्मायापत्त्वविभातिप्रतीयते॥ अतोस्यानियामकत्वेनदोषइतिभावः॥ अस्तुशक्तेःकिमा
यातमित्यत्राह॥ तदिति॥ साचासौशक्तिश्चेतिकर्मधारयः सैवोपाधिस्तेनसंयोगःसंबंधस्तस्माद्ब्र
ह्मैवसमष्टिलक्षणामीश्वरतांसर्वज्ञत्वादिधर्मयोगितांव्रजेत्प्राप्नुयात्॥३९॥ ॥

...नेनेनवदते॥ ब्रह्मणापिनस्याविशेषोविभावोपेकब्रह्माणितावद्र
ननुसत्यमवतानानयोरात्मनिश्रितिरस्तेनानेनेनवदते॥ ब्रह्मणापिनस्याद्विशेषो... विमोनिमानो
त्यायपति॥ नव्यापित्वादिति॥ निमित्तविभुसर्वगतेसत्त्वसमाकाशवत्सर्वगतश्चनित्यः॥ निमोनिमानो
चेतनशेतनानां॥ इदंसर्वंयदयमात्मा॥ सर्वंखल्विदंब्रह्मेत्यादिश्रुतेःसर्वात्मत्वाद्वस्तुतोपिनानंत्यंमन
वीनत्वव्यापारत्वानब्रह्मणाहिविषमस्मिन्नानंत्यंदेशकालवस्तुकृतपरिच्छेदराहित्यमभ्युपेतव्यं
मित्यर्थः॥३४॥ नकेवलंकालतःकिंतुकितोपोयाहदेशादिति॥ परिच्छेदहेतूनांदेशकालादिवस्तूनांमा
यायाकल्पितत्वात्तद्गतंयत्वेनगगनादिभिर्गगनेसवनदेशादिभिःकृतः॥ पारमार्थिकःपरिच्छेदोब्रह्मणि
सभवतियतोतोब्रह्मणापानंत्यंतावद्यक्रमेवनदेतत्समात्माब्रह्मेत्यब्रह्मत्वमेवाव्रेह्यावेनविवि

न व्यापित्वाद्देशतोन्तो नित्यत्वान्नापि कालतः॥ न वस्तुतोपि सार्वात्म्यादानंत्यं ब्रह्मणि त्रिधा॥३४॥
देशकालान्यवस्तूनां कल्पितत्वाच्च मायया॥ न देशादिकृतोन्तोस्ति ब्रह्मानंत्यं स्फुटं ततः॥३५॥
सत्यं ज्ञानमनंतं यद्ब्रह्म तद्वस्तु तस्य तत्॥ ईश्वरत्वं च जीवत्वमुपाधिद्वयकल्पितम्॥३६॥

किंस्यमित्येतस्यमात्मैवन्नसिद्धोदेवाब्रह्मभवति॥ प्रथमात्माब्रह्मेत्यादिभिरात्मनोब्रह्माभेदप्रति
ख्याः पंचक्रियाः शसिद्धा इतिशेषः ॥ ननु कृष्यादीनां क्रियाणां गणनामपि सत्वात्कथं पंचसंख्याभिमाणकाराह ॥
कुर्वीति ॥ ११ ॥ कानिनानिक्रियानन्तकानींद्रियाणिमन आह ॥ वाणिति ॥ वागादिभिरसंलक्षिक्रियानन्तिस्ता
सां क्रियाणामनुत्पत्तिर्भवतीति शेषः ॥ अत्राप्युक्तिः कृष्यादिका क्रियानादिमादिकार्यतिगकानुमानेन
दृश्यं तत्सकर्मेंद्रियपंचकसंख्यानात्याह ॥ मनआदिगोलकेषु ति आदिपदेनकरचरणोपस्थगुदादिष्वुद्दिष्व
रुद्यते ॥ १२ ॥ इदानींमनःकर्मेंद्रियपंचकेनेनयत्तनस्थमनसः कृतंसंख्यानेचदर्शयति ॥ मनइति ॥ तस्मान्निरि ।
पंचेन्माद्दानगमनविसर्गानंदकाक्रियाः ॥ कृषिवाणिज्यसेवाद्याः पंचस्वंतर्भवंतिहि ॥ १ ॥ वाक्पा
णिपादपायूपस्थैरक्षैस्तत्क्रियाजनिः ॥ मुखादिगोलकेष्वास्तेतत्कर्मेंद्रियपंचकं ॥ मनोदशेंद्रि
याध्यक्षं हृत्पद्मगोलके स्थितं ॥ तच्चांतःकरणं बाह्येष्वस्वातंत्र्याद्विनेंद्रियैः ॥ १३ ॥ अक्षेष्वर्थार्पितेष्व
तद्गुणदोषविचारकं ॥ सत्वं रजस्तमश्चास्य गुणाविक्रियते हितैः ॥ १४ ॥ वैराग्यं क्षांतिरौदार्यमित्या
द्याः सत्वसंभवाः ॥ कामक्रोधौ लोभयत्नावित्याद्या रजसोत्थिताः ॥ १५ ॥
द्वियतेन तत्त्रिविधकमाह ॥ तदिति ॥ १ ॥ दशेंद्रियाध्यक्षनमेवदर्शयति ॥ अक्षेष्विति ॥ अक्षेषु इंद्रियेषु अर्था
र्पितेषु विषयेषु व्याप्तितेषु सत्स्वपनस्तांतःगुणदोषविचारकं भवति तस्मिन्नीनतस्मिन्समत्वोचनमित्यादि
विचारकारी मर्थः ॥ अयंभावः ॥ आत्मनः प्रमादेनेनाक्षेंद्रियाणामाद्यापाद्यावाद्दीनांचरूपादिज्ञानजन
नमात्रगुणवत्तिलार्थेनातद्गुणदोषविचारस्योपलभ्यमानस्यासंभवान्नेपपमानतत्कारणेनमनोभ्युपगं
तव्यमिति ॥ मनसोवैराग्यकामाद्यनेकविधत्वेनमनस्यदर्शनाय सत्वादिगुणवत्वं दर्शयति ॥ सत्वमिति
ति ॥ तेषांतद्गुणत्वेकारणमाह ॥ विक्रियंतइति हिपनः ॥ तेषां तो विक्रियते विकाराप्नोतीमर्थः ॥ १२ ॥ म
भ्रमो यत्राद्दिगंधीनाः ॥ पंचगुणाज्ञानवाद्यपि ॥ अत्रेशुकष्ठकश्रेयस्त्रात्वात्वादिनाभ्रमोतरंगो द्वा
विमं तेनंदकमर्थे अयमेदर्शयति ॥ गुणाइति ॥ १ ॥ पूर्वगणनाभेदस्वभिधायकार्यतोमेदत्नानायतनकार्या
णिनानेंद्रियाणिभावदाह ॥ श्रोत्रमिति ॥ १ ॥ तेषांस्थानानिव्यापारांश्चदर्शयति ॥ कर्णादिगोलकस्थ ।
मिति ॥ इंद्रियसद्भावेकिंप्रमाणमित्याकांक्षायांकार्यलिंगकानुमानमित्याह ॥ सोस्यादिति ॥ तद्वदुपा
पलब्धेः करणजन्याक्रियात्वाच्छिदिक्रियावदित्याद्यनुमानेनसोस्यादयोर्थोपलब्धिः करणजन्यकार्यत्वेनतदुलेस्तन्ना
भ्रमोकटुकषायाद्यः कायेदिस्पर्श इष्यते ॥ नीलादिकेचित्ररूपेमधुराम्लादिकोरसः ॥ १ ॥ स
रभीतरगंधो द्वौगुणाः सम्यग्विवेचिताः ॥ श्रोत्रंत्वक्चक्षुषीजिह्वाघ्राणंचेंद्रियपंचकं ॥ २ ॥ क
र्णादिगोलकस्थंतच्छब्दादिग्राहकंक्रमात् ॥ सौक्ष्म्यात्कार्यानुमेयंतत्प्रायोधावेद्बहिर्मु
खं ॥ कदाचित्पिहितेकर्णेश्रूयतेशब्दआंतरः ॥ प्राणवायौजाठराग्नौजलपानेन्नभक्षणे ॥
व्यज्यतेह्यांतरः स्पर्शोमीलनेचांतरंतमः ॥ उद्गारेरसगंधौचेत्यक्षाणामांतरग्रहः ॥ २ ॥
एतेषांस्वभावमाह
हिर्मुखं ॥ प्रायइति ॥ परोक्षिवाविनियतत्वात्स्वयंप्रवृत्तिस्तेतेर्थः ॥ १ ॥ प्रायः पाठेनस्वचितेक्विक
रणानां आंतरविषयग्राहकत्वंदर्शयति ॥ कदाचिदिति ॥ कदाचित्करणस्यपिधानेक्कतेसति ॥ प्राणवा
यौजाठराग्नौचविद्यमानआंतरः शब्दः श्रूयते ॥ १ ॥ जलपानेन्नभक्षणेचांतरः स्पर्शोभिव्यज्यतेभि
व्यक्ताभवति ॥ नेत्रमीलनेकृतेआंतरंतमउपलभ्यते ॥ उद्गारेजातेरसगंधौहौगृह्येते ॥ इत्येवंप्रकारेण
णानामांतरग्रहोक्षाणामितिकर्तृविषष्ठी ॥ आंतरस्यविषयस्यग्रहोग्रहणमिंद्रियकर्तृकमांतरवि

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

328

329

नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ॥ पंचभूतविवेकस्य व्याख्यानं क्रियते मया॥ सदेव सोम्येदम
ग्र आसीदेकमेवाद्वितीयं ब्रह्मेति श्रुत्या जगदुत्पत्तेः पुरा यज्जगत्कारणं सद्रूपमद्वितीयं ब्रह्मोक्तं॥ तस्य
वाङ्मनसागोचरत्वेन सहसा वगन्तुमशक्यत्वेन तत्कार्येषु भूतेषु पंचसु भूतपंचकस्य विवेकद्वारेणावग
मबोधनाय योग्यत्वेन भूतपंचकविवेकं प्रतिजानीते॥ सदद्वैतमिति॥ तत्र तावदाकाशादीनां पं
चानां भूतानां गुणानां भेदज्ञापनाय तद्गुणानाह॥ शब्दस्पर्शाविति॥ ननु ते गुणाः किं सर्वे सर्वेषु
उत एकैकस्यैकैको गुण इति विमर्शे यथाक्रममेकद्वित्र्यादिगुणत्वेन तत्प्रकारमभिप्रायेणाह॥ एकद्वित्रिच

सदद्वैतं श्रुतेरुक्तं पंचभूतविवेकतः॥ बोद्धुं शक्यं ततो भूतपंचकं प्रविविच्यते॥१॥ शब्दस्पर्शौ
रूपरसौ गंधो भूतगुणा इमे॥ एकद्वित्रिचतुःपंचगुणा व्योमादिषु क्रमात्॥२॥ प्रतिध्वनिर्विय
च्छब्दो वायौ बीसीति शब्दनं॥ अनुष्णाशीतसंस्पर्शो वह्नौ भुगुभुगुध्वनिः॥३॥ उष्णः स्पर्शः प्रभा रू
पं जले बुलबुलध्वनिः॥ शीतः स्पर्शः शुक्लरूपं रसो माधुर्यमीरितं॥४॥

तुरिति॥२॥ तत्र तत्र प्रकारेणैतद्विशदयति प्रतिध्वनिरित्यादिभिः आकाशे तावदेकरूप एव गुणः स च
प्रतिध्वनिरूपः॥ वायोः शब्दस्पर्शौ॥ तत्र वायौ शब्दमनुकरणेन दर्शयति॥ बीसीति॥ एवमन्यत्राप्यनुक
रणशब्दे द्रष्टव्यं॥ तस्य स्पर्शमाह॥ अनुष्णाशीतसंस्पर्श इति॥ वह्नौ शब्दस्पर्शरूपाणीति त्रयो गुणाः॥
तेष्वसाधारणमभिधीयते॥ वह्नौ भुगुभुगुध्वनिः॥३॥ उष्णः स्पर्शः प्रभारूपमिति॥ जले शब्दादयो रसान्ताश्च
त्वारो गुणास्तानाह॥ जले बुलबुलध्वनिः॥ शीतस्पर्शः शुक्लरूपं रसो माधुर्यमीरितमिति॥४॥

इदानीमपरोक्षज्ञानस्य फलमाह॥ अपरोक्षेति॥ याहृदेशिकपूर्वकं व्याख्यानमपरोक्षात्मविज्ञान
मपरोक्षज्ञानमात्मनो विज्ञाने संशयविपर्ययरहितेनैतज्ञानेन संसारकारणाज्ञानतमसश्चकारणं
यदज्ञानमविद्यैव तमस्तस्य चण्डभास्करो मध्याह्नकालीनः सूर्य इव तत्तमसश्चण्डभास्करस्तस्या
ज्ञानतमसो निवर्तकमित्यर्थः॥६४॥ ग्रंथाभ्यासफलमाह॥ इत्थमिति॥ नरस्त्वमनेन प्रकारेण तत्त्व

अपरोक्षात्मविज्ञानं याहृदेशिकपूर्वकं॥ संसारकारणाज्ञानतम
सश्चण्डभास्करः॥६४॥ इत्थं तत्त्वविवेकं विधाय विधिवन्मनः समाधाय
विगलितसंसृतिबंधः प्राप्नोति परं पदं नरो न चिरादिति॥६५॥ इति
पंचदश्यां प्रथमस्तत्त्वविवेकः समाप्तः॥

स्य ब्रह्मात्मैकत्वलक्षणस्य विवेकं कोशपंचकाद्विवेचनं विधाय कृत्वा तस्मिन्नुक्ते विधिवच्छास्त्रोक्त
प्रकारेण मनः समाधाय स्थिरीकृत्य विगलितसंसृतिबंधः अपरोक्षज्ञानेन विनिवृत्तसंसारबंधः
सन् परं पदं निरतिशयानंदरूपं मोक्षं न चिरादविलंबेन प्राप्नोति साक्षात्कारानंतरं तत्क्षणं ब्रह्मैव भवती
त्यर्थः॥६५॥ इति श्रीरामकृष्णाख्यविदुषा विरचिता प्रथमतत्त्वविवेकव्याख्या समाप्ता॥ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दानीं समाधेः परं प्रयोजनमाह ॥ अनेनेति ॥ अनेन समाधिना वासनाजाले अहंकारममकारकर्तृत्वाद्यभिमानहेतुभूते ज्ञानविरुद्धे संस्काररूपसमूहे निःशेषं यथा भवति तथा प्रविलापिते विनाशिते पुण्यपापाख्ये कर्मसंचये समूलोन्मूलिते समूलं यथा भवति तथोन्मूलिते उद्धृते विनाशिते इति यावत् फलितमाह ॥ वाक्यमिति ॥ वाक्यं तत्त्वमस्यादिवाक्यमप्रतिबद्धं सत्कर्मवासनाभ्यां प्रतिबंधरहिते

अनेन वासनाजाले निःशेषं प्रविलाप्यते ॥ समूलोन्मूलिते पुण्यपापाख्ये कर्मसंचये ॥ ३१ ॥ वाक्यमप्रतिबद्धं सत्प्राक्परोक्षावभासिते ॥ करामलकवद्बोधमपरोक्षं प्रसूयते ॥ ३२ ॥ परोक्षं ब्रह्मविज्ञानं शाब्दं देशिकपूर्वकं ॥ बुद्धिपूर्वकृतं पापं कृत्स्नं दहति वह्निवत् ॥ ३३ ॥

सत्प्राक्परोक्षावभासितेऽपि सर्वं परोक्षतया प्रकाशिते तत्त्वे करामलकवत् करस्थितामलकवद्बोधमपरोक्षं तत्त्वावभासनसमर्थं बोधं ज्ञानं प्रसूयते जनयति ॥ ३२ ॥ इदानीं परोक्षज्ञानस्य फलमाह ॥ परोक्षमिति ॥ देशिकपूर्वकं गुरुमुखादधिगतं शाब्दं शब्दप्रमाणजन्यं परोक्षं ब्रह्मविज्ञानं बुद्धिपूर्वकं ज्ञानपूर्वकं यथा भवति तथा कृतं ॥ कृत्स्नं समस्तं पापं वह्निवद्दहतीति ॥ ३३ ॥

अस्य समाधेरवांतरफलमाह ॥ अनादाविति ॥ अनादौ संसारे ॥ इहास्मिन् संसारे संचिताः संपादिताः कर्मकोटयः कर्मणां पुण्यापुण्यलक्षणानां कोटयः समूहलक्षणाः ॥ अपरिमितानि कर्माणीत्यर्थः ॥ अनेन समाधिना विलयं यांति विनश्यंति ॥ लीयंते चास्य कर्माणि तस्मिन् शुद्धे प्रवर्धते अंतःकरणे ज्ञानाग्निना सर्वकर्माणि दग्धानि तेषु शुद्धो धर्मः सविलासाविद्यानिवर्तकतत्त्वसाक्षात्कारसाधनभूतो ध-

अनादाविह संसारे संचिताः कर्मकोटयः ॥ अनेन विलयं यांति ॥ शुद्धो धर्मो विवर्धते ॥ ३४ ॥ धर्ममेघमिमं प्राहुः समाधिं योगवित्तमाः ॥ वर्षत्येष यतो धर्मामृतधाराः सहस्रशः ॥ ३५ ॥

र्मो विवर्धते स्पष्टं ॥ ३४ ॥ नन्वयं किंप्रमाणमित्यत आह ॥ धर्ममेघमिति ॥ योगवित्तमा अतिशयेन योगज्ञाः ब्रह्मसाक्षात्कारवंत इति यावत् इमं निर्विकल्पसमाधिं धर्ममेघं प्राहुः स्पष्टं प्रतिपादयंति कथयंतीति ॥ यतः कारणादेष निर्विकल्पसमाधिर्धर्मामृतधारा धर्मलक्षणामृतधाराः सहस्र वर्षति ॥ तेषामेकैकशतसहस्रापि निष्फलेः ॥ अतो धर्ममेघं प्राहुरिति शेषं गतार्थं ॥ ३५ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

334

न्तरानीं हृस्मात्कप्रयत्नाभावात्कथं स्यन्तवृत्तिनिर्माणं कालाकालिकप्रयत्नाभावेपिप्रा
थमिकात्स्वप्रयत्नात्सहस्रादिसहकारिसहितात्तदुत्तीमाह॥ वृत्तीनामिति॥ ध्येयैकगोचराणां वृ
त्तीनामनवृत्तिलक्षप्रवाहरूपेणानुगतिलक्षयत्नसमाधिप्रयत्नात्समाधिरेवकालीनादपि॥ सहस्रेष्व
षाकृताभ्यासपाटवः श्रावणविशेषः कर्मीयत्नकृत्संयोगिनः त्रिविधमितनेषामितिपदेनिलिनात्सि
तत्वात॥ यस्मात्सकृत्स्याससंस्कारः पुनः पुनः समाधाभ्यासेनजनितोभावनाख्यः संस्कारविशेष

वृत्तीनामनवृत्तिलक्षप्रयत्नान्समाधिरपि॥ सहस्रासदभ्याससं
स्कारसविवाहवेन॥५७॥ यथादीपोनिवातस्थइत्यादिभि
र्वनेकथा॥ भगवान्निममेवार्थमर्जुनायसमुपयत्॥५८॥

नाभ्यां सहकारिकारणाभ्यां समन्वर्तमानाऽऽववति॥५९॥ ननवयं समाधिः पूर्वाचार्यैः नलि
नाभ्यां सहकारिकारणाभ्यां स्वरवर्तमानाऽऽववति॥ यथादीपइति॥ य
प्रापितोऽस्वस्मापांकात्सर्वगुरुणा श्रीकृष्णेन समेवार्थं प्रतिपादितवानेवमिति॥ यथादीपश्चेति॥ य
थादीपोनिवातस्थोनेंगतेसोपमास्मृतेत्यादिभिः श्लोकैर्वनेकथानानाप्रकारेणभगवान्
तानेसर्वांदिसंपत्तत्रसमेवनिर्विकल्पकसमाधिरूपमर्थमर्जुनायशिष्याय समुपयतनिरू

335

रदानीं निदिध्यासनमाह॥ नाभ्यामिति॥ नाभ्यां श्रवणमननाभ्यां निर्विचिकित्सेऽर्थे निर्गतविचिकि
त्सा संशयो यस्मात्सोऽनिर्विचिकित्सस्तस्मिन्नर्थे विषये स्थापितस्य धारणाविषयेवर्तमानस्य चेतसोऽर
न्तःसंस्थाया यस्मात्सौनिर्विचिकित्सस्तस्मिन्नर्थे ... ॥ एकतानत्वमेकाकारवृत्तिप्रवाहत्वमेतन्निदिध्यास
नं ... स्थितस्याधारणो नेपतेनतिनोऽकृतात॥ ... एकताननतात्वानमितिति॥ ५७॥ तस्यैव निदिध्यासनस्य परिपाक
नमनुच्यते हि प्रसिद्धे योगशास्त्रे॥ तत्र प्रत्ययैकतानता ध्यानमिति॥ निदिध्यासनेनतावत्ध्यानाध्यायेयेचेतनिरयेभासते॥ तन्त्र
रूपशून्यं समाधिमाह॥ ध्यातृध्यानेति॥ निदिध्यासनेनतावत्ध्यानाध्यायेय चेतनिरपेक्षभासते॥ तत्र
दाविन्नमभ्याससेन॥ ध्यातृध्यानेध्यानाध्यानेचक्रमात्मविसर्जनं ध्येयैकगोचरे ध्येयमेकमेवगो

नाभ्यां निर्विचिकित्सेऽर्थे चेतसः स्थापितस्य यत्॥ एकताननत्वमेतद्धि निदिध्यासनमुच्यते
ध्यातृध्यानेपरित्यज्य क्रमाद्ध्येयैकगोचरं॥ निर्वातदीपवच्चित्तं समाधिरभिधीयते॥ ५९॥
वृत्तयस्तु तदानीमज्ञाता अप्यात्मगोचराः॥ स्मरणादनुमीयन्ते व्युत्थितस्य समुत्थितात्॥ ६०॥

... भवति॥ तदा समाधिरुच्यते॥ तत्र दृष्टान्तः॥ निर्वातदीपवदिति॥ वायु
वेगविवर्जितस्य यथा विधेयं भवति॥ नद्दिमिष्यर्थः॥ ६१॥ ननु समाधौ वृत्तीनामनुल्लेखो
रहितेषु देशेषु वर्तमानो दीपो यथा निश्चलो भवति॥ तद्वदित्यर्थः॥ ६१॥ ननु समाधौ वृत्तीनामनुल्लेखा
ध्येयैकगोचरत्वमपि निश्चेतुं नशक्यतइत्याशङ्क्याह॥ वृत्तय इति॥ ...
वृत्तयस्तिति॥ आत्मगोचराः॥ आत्मा गोचरो विषयो यासां ता आत्मगोचराः वृत्तयस्तु तदानीं समाधिकाले अज्ञा
ता अपि व्युत्थितस्य॥ समाधितः व्युत्थितस्य समुत्थितात् स्मरणादनुमीयन्ते॥ तथा च व्युत्थानकाले समाहितोऽः
एवमित्थं वै रूपादनुमीयन्ते॥ ययस्मर्यतेतत्तदनुभूतमिति व्याप्तेर्लोकसिद्धत्वादित्यर्थः॥ ६०॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेसेवमन्यत्र प्रक्ते किमात्मेत्यत आह ॥ विकल्पतदभावाभ्यामिति ॥ विकल्पतदभावाभ्यां वि
कल्पेन विकल्पाभावेन वा असंस्पृष्टात्मवस्तु निःसंस्पर्श इति परमात्मवस्तु निर्विकल्पितं केवलं संवे
द्याद्यात्मत्र विकल्पितं तेनांशं सविकल्पस्य वा निर्विकल्पस्य वेति शंकायां केन विषयीकृतं केवलं तं केवल
लज्ञानात्मा ज्ञानात्मसंवेद्यसंयोगादिः ॥ आदिरात्र दृष्टान्ते यथा गृहीतं तत्र शब्दोऽवधारणे ॥ तत्र द्रव्यनामस
गुणनामसंयोगद्रव्यसमवायिकारणं द्रव्यमिति वा नार्कि केवलमिति ॥ कर्मव्यक्ति विकल्पसमेति ज्ञा
तिकाराश्रयो गुणः ॥ नियमेकमनेकवृत्ति सामान्यमिति लक्षिता जातिः ५ संयोगवियोगासमवायि ।

विकल्पतदभावाभ्यामसंस्पृष्टात्मवस्तु यत् ॥ विकल्पितं केवलं तत्
संवेद्याद्यात्मकल्पिताः ॥ ५१ ॥ द्रव्याद्या वैकल्पदर्शनानुसंधानेन स्वतो
भवेत् ॥ एकत्वासंभावितेनानुसंधानेन मनने तत ॥ ५२ ॥

कारणं ज्ञातीयेकर्मेति लक्षिता क्रिया ॥ एते सर्वे स्वरूपेण कल्पिता एवेत्यर्थः ॥ ५१ ॥ एतावता ग्रंथ
केन द्रव्येण किमुक्तं भवतीत्याकांक्षायां फलितमाह ॥ द्रव्यमिति ॥ द्रव्यं जगत्तोपञ्चपदार्थात्मकं
दिग्द्रव्यजातं कर्मकारणं वा वैकल्पं स्यादिति वा वैकल्पदर्शनानुसंधानेन वैकल्पाभावा नामर्थं स्तनी
वत्रैलक्षण्ये केवलं लक्षणस्यानुसंधाने द्रव्यत्वं भवेत् ॥ एकत्वाशब्दस्यार्थो द्रव्योपयोगार्थ दिनापद
पदाभावो विवेकत्वासंभावितेन केनचिदनन्यत्वेन दृष्टेन कारणेन संभावितेनानुसंधानेन क्रम
स्यार्थस्योपपद्यमानत्ताने यद्दक्षितं मननमित्युच्यते ॥ ५२ ॥

सिद्धांतीत्याशंक्य तस्याज्ञेयत्वमिति विकल्पस्यैकदेशमाह ॥ विकल्पस्येति ॥ सविकल्पस्य निर्विकल्प
स्य वा लक्षणमिति ॥ यो विकल्पस्य लक्षणभूतः सो किं निर्विकल्पस्य उत सविकल्पस्य वा भवेत ॥ आद्यपक्ष
मपेक्ष्याह इति स्वरूपेणो व्याख्यातं एव ॥ अन्यत्र हि द्वितीये पक्षे नवस्थान्दृष्टः तथा हि ॥ सविकल्पस्य वि
कल्पः तत्र विकल्पेन सह वर्तते इत्यत्र तृतीयांतविकल्पपदेन प्रथमांतविकल्पपदेनैक एव विकल्प
अभिधीयते द्वौ वा एक एव चेत्तस्य प्रथमे क एव विकल्पाश्रयविशेषणतया अयमन्ताश्रितो विकल्पस्येन
द्वाभ्यामाश्रयता ॥ द्वौ चेत् तृतीयांतशब्देन निर्दिष्टस्यापि विकल्पस्य विकल्परूपत्वात् तदाश्रयस्यापि सविक
ल्पत्वात् न तद्विशेषणभूतो विकल्पः किं प्रथमांतशब्दनिर्दिष्ट एव विकल्पः उक्तताभ्यामन्यः आद्येऽप्यो मा

विकल्पो निर्विकल्पस्य सविकल्पस्य वा भवेत् ॥ आद्ये व्याहतिरन्यत्रानवस्थात्माश्रयापरः ॥
इदं गुणक्रियाजातिद्रव्यसंबंधवस्तु च ॥ समं तेन स्वरूपस्य सर्वमेतदितीष्यतां ॥ ५८ ॥

श्रयता ॥ द्वितीयेऽपि पूर्वोक्तविशेषणीभूतो विकल्पः किं प्रथमांतशब्दनिर्दिष्ट उत तृतीयांतः आद्ये चक्रि
कापत्तिः द्वितीयेऽपि तस्याप्यन्यः तस्याप्यन्य इत्यनवस्थापातादिति ॥ ५७ ॥ न केवलमस्यैव दूषणमपि त
सर्वे चैवं विधविकल्पस्य सर्वकेद्रूषणानुसरति इत्याह ॥ इदमिति ॥ इदं विकल्पद्रूषणं जातं गुणक्रि
याजातिद्रव्यसंबंधवस्तुष्वपि संबंधोनेष्टुपेत्तद्वस्तुसमं ॥ तथा हि गुणः किं निर्गुणो वर्तते उ
त सगुणो वर्तते ॥ क्रियापि किं पारं वर्तते क्रियावति वा ॥ आद्ये व्याघातः ॥ अन्यत्रात्माश्रयादयः इति
सर्वे चैवमूह्यं तेन निरसमस्तद्वा चैव किं स्वतंत्रासिद्धार्थो काह ॥ तेनेति तेनैव विकल्पस्य संगतत्वेन
गुणादिके सर्वे स्वरूपे स्थितो ह्यतां गुणादयः सर्वे वस्तुस्वरूपेण वर्तन्त इत्यभिप्रायः ॥ ५८ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

वेवेद्येपदार्थोवृभियाय्यवाक्यार्थमाह ॥ चितयोरिति ॥ चितयोरपिचिद्रूपकारणमपितमः प्रधानविशु
द्धसत्वप्रधानमलिनसत्वप्रधानतत्वमेदेनोक्तावप्यपरस्परंविरोधिनीतौमायोपाधिकाविद्योपाधिकम्प्रदे
हुमेदसहितेसच्चिदानंदलक्षणमहावाक्येनलक्ष्यते ॥ ननुकेवललक्षणाश्रयणेनवाक्यार्थबोधेनकहृ
ष्टमित्यादिशंक्याह ॥ सोयमिति ॥ सोयंदेवदत्तइत्यादिवाक्येषुतदिदंतयोः तदेतदेशकालविशिष्टल
क्षणयोर्थयोर्विरोधेसतिभागत्यागलक्षणाङ्गीकारेण विरुद्धांशत्यागेनाश्रयोदेवदत्तस्वरूपमेकमेव
लक्ष्यते ॥ ४० ॥ एवंदृष्टांतमभिधायदार्ष्टांतिकमाह ॥ मायाविद्ये इति ॥ एवंसोयंदेवदत्तइत्यादिवाक्यव

चितयोरपितौमत्कारणस्यविरोधिनी ॥ प्राज्ञेशसच्चिदानंदमहावाक्येनलक्ष्यते ॥ ४१ ॥ सो
यमित्यादिवाक्येषुविरोधात्तदिदंतयोः ॥ त्यागेनभागयोरेकआश्रयोलक्ष्यतेयथा ॥ ४२ ॥ माया
विद्येविहायैवमुपाधीपरजीवयोः ॥ अखंडंसच्चिदानंदंपरंब्रह्मैवलक्ष्यते ॥ ४३ ॥ सविकल्प
स्यलक्ष्यत्वेलक्ष्यस्यास्त्ववस्तुता ॥ निर्विकल्पकतावस्तुनेदृष्टंचसंभवि ॥ ४४ ॥ ॥

मायाविद्ये इत्यत्रमायाविद्येमेकमेवलक्ष्यतेतदृत ॥ परजीवयोः परमात्मजीवयोर्मायाः विद्ये इत्येवंवेकेविहायपरि
त्यज्यतदवशेषसहितसच्चिदानंदरूपमेकमेवमहावाक्येनलक्ष्यते ॥ ४३ ॥ ननुकिंमहावाक्येनलक्ष्यसवि
कल्पकमुतनिर्विकल्पकमितिविकल्प्याद्यंप्रत्याह ॥ सविकल्पेति ॥ सविकल्पकस्येतिसविक
ल्पकस्यविकल्पेनविपरीतेनवेकल्पितेनेन्यमेनागम्यादिरूपेणसहवर्ततइतिसविकल्पंतस्यलक्ष्यत्वे
वाक्येनबोध्यत्वेलक्ष्यस्यवाक्यार्थंतयालक्ष्यमाणस्यवस्तुनापारमार्थ्यंनस्यात ॥ द्वितीयेदोषमाह ॥ निर्वि
कल्पस्येति ॥ निर्विकल्पस्यनामजात्यादिविहितस्यलक्ष्यत्वंनदृष्टंलोकेनकापिदृष्टंनचसंभवि ॥ ४४ ॥

पंचदशीविवरणम् ॥ [illegible] ॥ ७७ ॥

एतावताग्रंथसंदर्भेणलक्षणप्रसंगेनलक्ष्यस्यलक्षणाविषयोप्रतिपादितंभागत्यागलक्षणायांप्रसंगेनसमागमंकारणतद
देसविरुद्धयोर्लक्षणाकौर्वतेनसर्वकमप्रत्यंशमुपलक्ष्यतात्पर्यमाह ॥ परमात्मेति ॥ एवमुक्तेनप्रकारेणपर
मात्मबोधलक्षणपदार्थयोः परमात्मजीवात्मनोरेकत्वाःभिन्नतापुनःसामान्यप्रदर्शनायपुनरायेनसंभावि
तोयोकाचितानापरकतातत्वमस्यादिवाक्यैः स्पष्टंभागत्यागेनविरुद्धांशपरित्यागेनलक्षणतेलक्ष्यं
तुम्नावोध्यते ॥ ४५ ॥ तत्त्वमसीतिवाक्यार्थंतत्त्वमस्यादिपदार्थंतानन्दतत्वकस्मात ॥ तत्त्वमस्यवाच्यमर्थं
तावदाह ॥ जगत इति ॥ यत्सच्चिदानंदलक्षणंब्रह्मतत्तत्त्वमसीतमोगुणप्रधानोमायामादायउपाधि

परमात्मनोरेकत्वंपुनर्याःसंभावितैकता ॥ तत्त्वमस्यादिवाक्यैःसाभागत्यागेनलक्ष्यते ॥ ४५ ॥ जगतोयदुपादानंमायामादायतामसीं ॥ निमित्तंशुद्धसत्त्वांतामुच्यते ॥
ब्रह्मतद्गिरा ॥ ४६ ॥ यदामलिनसत्त्वांतांकामकर्मादिदूषितां ॥ आदत्तेतत्परंब्रह्म
त्वंपदेनतदोच्यते ॥ ४७ ॥ ॥

तेनस्वीकृत्यजगतस्थावरजंगमात्मकस्यकार्यवर्गस्योपादानंप्रख्यातमाधिष्ठानंशुद्धसत्त्वांविशुद्ध
सत्त्वप्रधानांतामुपाधित्वेनस्वीकृत्यनिमित्तंउपादानादिषुः भिन्नेकर्तृभवति ॥ तच्छिमित्तोपा
दानोभयरूपंब्रह्मतद्गिरातत्त्वमसिवाक्यस्थेनतत्पदेनोच्यते ॥ ४६ ॥ त्वंपदवाच्यार्थमाह ॥ य
देति ॥ तदेवब्रह्मपदाभिधेयस्यमवस्थायांमलिनसत्त्वांमोघरजस्तमोमिश्रेणमलिनसत्त्वां
प्रधानामतएवकामकर्मादिदूषितांतामविद्यामपत्यक्त्वाकाञ्चमायांयाआदत्ते ॥ उपाधित्वेनस्वीक
रोति ॥ तदात्वंपदेनोच्यते ॥ ४७ ॥ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

नेहितं चेति॥ हिरण्यगर्भादिकारणानां गुणमयत्वस्य समत्वे तस्मिंल्लिंगशरीरे गुणानामवस्थाभेदमात्राद्गुणयोः सत्व
रजसोर्वस्थाभेदमात्राद्गुणप्रधानभावेनावस्थानविशेषाद्देवपृथक्कृता भेदेन निर्दिष्टा इत्यर्थः॥३४॥ इदा
नीमानंदमयकोशत्वेन विवक्षितस्य कारणशरीरस्य विवेचनोपायमाह॥ सुषुप्त्यभानेति समाधौ व
स्थायां लक्षणयोः समाधिश्च स्थायां सुषुप्त्यभाने सुषुप्तिशब्दोपलक्षितस्य कारणदेहस्य भानात्
प्रतीतौ आत्मनस्तत्साक्षिणः स्वप्रकाशे आनंदरूपेण भाने स्फुरणं यदस्ति स आत्मनोऽन्वयः॥ आत्मभाने
आत्मस्फुरणे सत्यपि सुषुप्त्यनवभासनं सुषुप्त्युपलक्षितस्याज्ञानस्याप्रतीतिरेव व्यतिरेकस्तस्य तिरस्कार्येषु
योगः॥ एवमन्वयव्यतिरेकाभ्यां विविच्य शरीरत्रयात्पृथक्कृतस्यात्मनो ब्रह्मत्वमाह॥ यथेत्यादिना॥

नेहितं च गुणावस्थाभेदमात्रात्पृथक्कृताः॥३४॥ सुषुप्त्यभाने भानं तु समाधावात्मनोऽन्वयः। व्यति
रेकस्त्वात्मभाने सुषुप्त्यनवभासनम्॥३५॥ यथा मुंजादिषीकैवमात्मा युक्त्या समुद्धृतः। शरीरत्रि
तयाद्धीरैः परं ब्रह्मैव जायते॥३६॥

मुंजेषीकान्यायवर्तिनेतनेभ्योपि घटेते॥ यथा मुंजमध्यगः सूत्रे यथा वा बाह्ये उदरादिषीका गोपयितीति॥३७॥
एवमन्वयव्यतिरेकाभ्यां कोशपंचकादिभ्यः स्वात्मनो ब्रह्मत्वमिति निर्णीतं भवेदिति॥ तत्र तिपादिकामेत्
समाहः उक्तोपाधिनामात्मनादिकोशविवेकः कथं स्यादिति विमर्शे विवेकः प्रशस्ततरः सर्वेति॥ यथा मुंजादिति
यथा येन प्रकारेण मुंजात् तन्नामकात् तृणविशेषात् इषीका गर्भस्था काष्ठसमुद्धरणे॥ उद्धृता बहिर्दृश्यते न
न स्थितानां स्थूलप्रयत्नाद्विभज्यते न लक्षणेनोद्धृतेन समुद्धियते॥ एवमात्मापि स्वाभाविकान्वयव्यतिरेक
लक्षणोपायेन शरीरत्रितयात्स्थूलसूक्ष्मकारणाख्याद्धीरैः सद्गुरुभिः साधनसंपन्नैरधिकारिभिः समुद्धृतः
पृथक्कृतः सन्परं ब्रह्मैव जायते विदानंदरूपत्वलक्षणस्याभयाद्विशिष्टस्वादित्यभिप्रायः॥३८॥

अन्वयव्यतिरेकाभ्यामिति॥ अन्वयव्यतिरेकाभ्यां युक्तिभ्यां पंचकोशविवेकतः पंचानां
कोशानां अन्नमयादीनां विवेकतः स्वात्मनो विवेचनेन पृथक्करणेन॥ यद्वा पंचकोशेभ्योऽन्नमया
दिभ्य आत्मनः पृथक्करणेन आत्मानं स्वात्मानं तत आलंब्य कोशेभ्य उद्धृत्य बुद्ध्या निष्कृष्य विवेचनेन
इत्येतदिति प्रिय ... पूर्णं सर्वात्मकं लक्षणं च प्रयत्नेनाभिमानि ब्रह्मैव भवतीत्यर्थः॥३७॥ इदानीं विविनक्त्यन्वय
व्यतिरेकौ दर्शयति॥ अभानेति॥ स्वप्नेऽवस्थायां स्थूलदेहस्याभाने अप्रतीतौ यदात्मनः प्रतीतौ आत्मनः
आत्मनः प्रतीतौ यज्ज्ञानमात्मनः स्फुरणमस्ति॥ स आत्मनोऽन्वयः तस्यामेवावस्थायां स्वप्ना
नज्ञानेन स्वात्मनः स्फुरणेऽसति स्वप्नमानवभासने अस्य स्थूलदेहस्यानवभासने अप्रतीतिर्व्यतिरेकः

अन्वयव्यतिरेकाभ्यां पंचकोशविवेकतः। स्वात्मानं तत उद्धृत्य परं ब्रह्म प्रपद्यते॥३७॥ अभाने स्थू
लदेहस्य स्वप्ने यज्ज्ञानमात्मनः। सोऽन्वयो व्यतिरेकस्तज्ज्ञानेऽस्यानवभासनम्॥३८॥ लिंगाभाने सुषुप्तौ
स्यादात्मनो भानमन्वयः। व्यतिरेकस्तु तद्भाने लिंगस्याभानमुच्यते॥३९॥ तद्विवेकाद्विविक्ताः स्युः
कोशाः प्राणमनोधियः।

स्थूलदेहस्य निरोधः॥ इति॥ एकत्वेनान्वयव्यतिरेकयोरवस्थाभ्यामनूदितयोर्दे
ही ३८॥ एवं स्थूलदेहस्यानात्मत्वावबोधकावन्वयव्यतिरेकौ दर्शयित्वा लिंगदेहस्यानात्मतावगम
कौ तौ दर्शयति॥ लिंगाभानेति॥ सुषुप्ताववस्थायां लिंगाभाने लिंगस्य सूक्ष्मदेहस्याभाने अप्रतीतौ आत्म
नो भानेन स्वप्रकाशत्वेनात्मनः स्फुरणं आत्मनोऽन्वयः स्यात्॥ तद्भाने आत्मभाने लिंगस्याभाने लिंग
देहस्यास्फुरणं व्यतिरेक उच्यते॥३९॥ ननु पंचकोशविवेचनमुपक्रम्य लिंगदेहविवेचने प्रकृतानुसं
धानमित्याशंक्य प्राणमयादिकोशत्रितयस्य लिंगदेहांतर्भावात्तत्प्रकृतानुसंधानमिति परिहारमाह॥ तद्विवेकादिति
लिंगस्य लिंगशरीरस्य विवेकाद्विवेचनात् प्राणमनोधियः प्राणमयमनोमयविज्ञानमयाः कोशा विविक्ताः आत्मनः पृथक्कृताः

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

342

त्त्विकैरिति ॥ विमर्शात्मा संशयात्मके ॥ पंचभूतसत्वकार्यत्वमन्तःकरणे तस्मात्सात्त्विकैः प्रत्येकभूतसत्वका-
र्यभूतैः धीन्द्रियैः श्रोत्रादिभिः पंचभिर्मिलितैरिन्द्रियैः साकं सहितं मनोमयः कोशः स्यादिति पूर्वेण संबंधः ।
निश्चयात्मिका धीः तेषामेव सत्वकार्यरूपा बुद्धिस्तैरेव पूर्वोक्तैर्ज्ञानेन्द्रियैरेव साकं सहिता सती विज्ञान-
मयो विज्ञानमयाख्यः कोशः स्यात् ॥ ३५ ॥ कारणे कारणशरीरभूतायामविद्यायां यन्मलिनं सत्वमस्ति
तन्मोदादिवृत्तिभिः प्रियमोदप्रमोदाख्याभिर्वृत्तिभिर्नानाभोगजनितैः स्वावविशेषैः सहितमानन्दमयः
आनन्दमयाख्यकोशः स्यादिति ॥ ननु स्थूलशरीरादीनामन्नमयादिरूपत्वाच्येन सर्वाणि पञ्चरूपोऽन्न-

सात्त्विकैर्धीन्द्रियैः साकं विमर्शात्मा मनोमयः ॥ तैरेव साकं विज्ञान
मयो धीर्निश्चयात्मिका ॥ ३५ ॥ कारणे सत्त्वमानन्दमयो मोदादिवृत्तिभिः
तत्तत्कोशैस्तु तादात्म्यादात्मा तत्तन्मयो भवेत् ॥ ३६ ॥

तत्तत्कोशैस्त्वन्नमयादिभिस्तादात्म्यादेकत्वाध्यासादात्मा प्राणमयो भवेत् ॥ अन्नमयो नर आत्मा म-
नोमयः स्यादित्येतेनात्मनोऽन्नमयादिरूपत्वं कथमुच्यते ॥ तत्तत्कोशैरित्याहुरनात्मत्वात् तदि-
कात्वेनात्मनोऽन्नमयादिरूपत्वं वाच्यते ॥ आत्मनस्तत्तत्कोशेन सह तादात्म्याध्यासादित्यर्थः ॥ तदित्थं
आत्मा तत्तत्कोशैः तेन तेन कोशेन सह तादात्म्यादात्माभिमानात्तत्तन्मयस्तत्तत्कोश-
मयः स्यात् व्यवहारकाले तन्मयादिकोशतादात्म्यादन्नमयादिरूपवाच्यत्वमित्यर्थः तेनाहमात्मनः ।
कोशमयो वेदलक्षणयोगेनार्थः ॥ ३६ ॥ कथं तर्हि विविच्यात्मानं प्रतिपद्यते इत्याकांक्षायां कोशेभ्यो वि-

343

इदानीं दृष्टान्तेन सिद्धमर्थं दार्ष्टान्तिके योजयति ॥ उपदेशमवाप्यैवेति ॥ एवमन्वयव्यतिरेकाभ्यां
सिद्धमात्मतत्त्वं मयि विज्ञानं तत्त्वदर्शिनः ब्रह्मनिष्ठगुरोः सकाशात् प्रवचनेन आचार्यात् गुरोः सका-
शात् उपदेशं तत्त्वमस्यादिवाक्यार्थं तात्पर्यतः श्रवणेन समाप्य अवाप्य पञ्चकोशविवेकेन
अन्नमयादीनां पञ्चानां कोशानां विवेकेन स्वस्मात् विवेचनेन परां निर्वृतिं मोक्षसुखं लभन्ते
मोक्षमिति ॥ ३२ ॥ के ते कोशा इत्यत्र पंचकोशान् स्मारयन्नाह ॥ अन्नमिति ॥ अन्नं प्राणो मनो बुद्धि-
रानन्दश्चेति पञ्च ते कोशास्तु बुद्धिर्विज्ञानं तेषामन्नादीनां कोशता खड्गादिकोशवदात्मनः कोशाः प-

उपदेशमवाप्यैवमाचार्यात्तत्त्वदर्शिनः ॥ पंचकोशविवेकेन लभन्ते निर्वृतिं पराम् ॥ ३२ ॥ अ-
न्नं प्राणो मनो बुद्धिरानन्दश्चेति पंच ते ॥ कोशास्तैरावृतः स्वात्मा विस्मृत्या संसृतिं व्रजेत् ॥ ३३ ॥
स्यात्पंचीकृतभूतोत्थो देहः स्थूलोऽन्नसंज्ञकः ॥ लिंगे तु राजसैः प्राणैः प्राणः कर्मेन्द्रियैः सह ॥
३४

हनन्ना आच्छादितः स्वात्मा स्वरूपभूत आत्मा विस्मृत्या स्वस्वरूपविस्मरणेन संसृतिं जन्ममरणादिरूपां संसृतिं
संसारं व्रजेत् प्राप्नुयात् कोशशब्दार्थः यथा कोशकारः कृमिः स्वाश्रयं कीटं तेन कोशेन वेष्टयति तथा अयमात्मा एतैः कोशैरा-
वृतः कृतैः आत्मनः स्वं स्वरूपं नैव जानाति इत्यर्थः ॥ ३३ ॥ तेषां कोशानां स्वरूपं क्रमेणाह स्यादिति
स्यात्पंचीकृतेत्यादि ॥ नामोदादिवृत्तिभिरिति तेन साईश्लोकद्वयेन पंचीकृतेभ्यो भूतेभ्य उत्पन्नः स्थू-
लो देहोऽन्नसंज्ञकोऽन्नमयाख्यः कोशः स्यात् ॥ प्राणस्तु प्राणमयस्तु कोशः लिंगे लिंगशरीरे च
स्थितैः राजसैः ॥ रजोगुणकार्यभूतैः प्राणैः प्राणापानादिभिः पंचभिर्वाचादिभिः कर्मेन्द्रियैः स-

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

...देववर्तमानास्तेन सा विश्वा भवेति ॥ तेषामवांतरभेदमाह ॥ देवतिर्यङ्नरादयश्चेति ॥ इदानीं तेषां वि-
श्वसंज्ञाप्राप्तानां जीवानां तत्तन्नामरहितेन समष्टिप्रकारमदृष्टांतेन श्लोकद्वयेनाह ॥ तेपराग्दर्शिनः प्रत्य-
क् स्वात्मरूपपरागदर्शिनः ॥ नात्मानं न शरीरादीन् पश्यंति ॥ तत्प्रमाणमात्मानं परोक्षविनिश्चयेन स्वयं भ्रमस-
मयाद्दृष्ट्वा पश्यंति ॥ नात्मतत्त्वं विनिश्चितः ॥ ननु तार्किकादयो दृष्ट्वा विकमात्मानं जानंतीत्याशंक्य ॥ घ-
टपटाद्यात्मानं जानंतीति ॥ तथापि कुर्वंति सर्वं ते न जानंतीत्याशयेनाह ॥ कर्मणीति ॥ २५ ॥ अत एव भोग-
प्रदानाय तत्र भवाय मनुष्यादिशरीरारंभकं कर्मैव तत्त्वतो विवेकाभिमानिनः कर्माणि कुर्वंते ॥ नानावेक-

तेन साविश्वलोपातादेवतिर्यङ्नरादयः ॥ तेपराग्दर्शिनः प्रत्यक्तत्त्वबोधविवर्जिताः ॥ २५ ॥ कुर्व-
ते कर्म भोगाय कर्म कर्तुं च भुंजते ॥ नद्यां कीटा इवावर्ता दावर्तांतरमाशुते ॥ व्रजंतो जन्मनो जन्म
लभंते नैव निर्वृतिं ॥ २६ ॥ सत्कर्मपरिपाकात्ते करुणानिधिनोद्धृताः ॥ प्राप्य तीव्रतरश्रद्धां विचा-
रयंति यथाक्रमं ॥ २७ ॥

तद्वनेपुनश्च कुर्वंति देहवारिदं... गीतं... तेनफलं भुंजते तेन च फलानुभवाय...
ते तत्कर्मनानाजीवात्मान इत्यादि ... जन्मनां तु ... ॥ एवं वर्तमाना जीवाः नदीप्रवाहपति-
ताः कीटाः ॥ आवर्तादावर्तांतरं माशुवंते यथा निर्वृतिं सुखलेशमपि न लभंते ॥ एवमात्मज्ञानतोऽपि जन्मजन्मा-
नंतरमाप्नुवंति न च सुखमेवं लभंत इति ॥ २६ ॥ एवं संसारपतितानभिधायाथ तत्त्विनिस्तारं दर्शयितुं ॥ सुकृतेनाह ॥ सत्कर्म-
परिपाकात्सर्वोपासनरूपकर्मपरिपाकात्पालनाकेनचिन्नरूपविशेषेण उद्धृतान् दीनवाहाद्व-
हिर्निः सारिताः सत्तत्त्वीरतरश्रद्धां प्राप्य यथा सत्संगेन यथा भवंति तथा विचारयंति ॥ २७ ॥

कथमेकैकस्य पंच पंचात्मकत्वमित्यत आह ॥ द्विधेति ॥ विपदादिकमेकैकं द्विधा द्विधा ॥ तेषु प्रा-
थमिकोऽदिविभागाद्धेः द्वितीयकृत्वा भागाद्वयोपेतेकृतेन सर्वः ॥ पुनश्च पुनरपि प्रथमं प्रथमभागं चतु-
र्धा भागचतुष्टयोपेते विधायसमकृत्य ते ॥ एवं तत्र द्वितीयार्धेषु स्वस्वान्यस्मादितरेषां चतुर्णां
भागचतुष्टयोपेतेनेस्वविधायसमकृत्य ... मन्यमभागेषु योजनात्पूर्वचतुर्णां च ।
चतुर्णां भूतानां योयो द्वितीयः स्थूलोभागस्तत्र तत्रेण समप्रथमभागेषु योजनानां चतुर्णां च ।
चतुर्णां मध्ये एकैकस्य योजनात्ते विपदादयः प्रत्येकं पंचपंचात्मका भवेति ॥ २२ ॥ एवं पंचीकरणे-
न भूतानां समष्टिभूतेरूपादानकारणभूते-
मभिधायतेभ्यः तेभ्यः कार्यवर्गं दर्शयति ॥ तेभ्य इति ॥ तेः पंचीकृतैर्भूतैरुपादानकारणभूतै-

द्विधा विधाय चैकैकं चतुर्धा प्रथमं पुनः ॥ स्वस्वेतरद्वितीयांशैर्योजनात्पंच पंच ते ॥ २२ ॥ तेभ्योऽण्डस्तत्र भुवनभोग्य-
भोगाश्रयोद्भवः ॥ हिरण्यगर्भः स्थूलेऽस्मिन्देहे वैश्वानरो भवेत् ॥ २३ ॥

तेभ्यो ब्रह्मांडमुत्पन्नं ॥ तत्र ब्रह्मांडेन भुवनानि चतुर्दशविभागेन वर्तमानानि भूम्यादयः सप्तलो-
काः भूम्यधस्थिता अतलादीनि सप्त पातालानि तेषु च भुवनेषु तेषां प्राणिनां भोगयोग्य-
शरीरादीनि ॥ तत्र .... कोवित शरीराणि च तेरेव पंचीकृतैर्भूतैः संस्थानादुत्पन्नानि ॥ एवं स्थूलशरीरो-
त्पत्तिमभिधाय तेषु स्थूलशरीरेष्वभिमानवतो हिरण्यगर्भस्य समष्टिरूपस्य वैश्वानरसंज्ञकत्वं ॥ प-
र्येकैकस्थूलशरीराभिमानवतो व्यष्टिरूपात्तेजसानां विश्वसंज्ञकत्वं च भवतीत्याह ॥ हिरण्य-
गर्भ इति ॥ अस्मिन्स्थूले देहे वर्तमानो हिरण्यगर्भो वैश्वानरो भवेत् ॥ २३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

एवं सत्त्वशरीरमभियायतदभिमानित्वप्रयुक्तं प्राज्ञेश्वरयोरवस्थानं दर्शयति ॥ प्राज्ञस्तत्रेति ॥ प्राज्ञो मलिनसत्त्वप्रधानोऽविद्योपाधिको जीवस्तत्र तेन सूक्ष्मवाच्यान्तःकरणोपलक्षितलिङ्गशरीरेऽभिमानेन तादात्म्याभिमानेन तेन तैजसनामकत्वेनोपयते ईशः विशुद्धसत्त्वप्रधानमायोपाधिकः परमेश्वरस्तत्र शरीरे तदभिमानेन हिरण्यगर्भसंज्ञकत्वेनोपयत इत्यनुषङ्गः ॥ तैजसहिरण्यगर्भयोर्लिङ्गशरीराभिमानित्वे समाने सति तयोः को भेदः किंनिबन्धनश्चेत्यत आह ॥ तयोरिति ॥ तयोस्तैजसहिरण्यगर्भयोर्व्यष्टिसमष्टिता यतः भवति तत एव भेदः स्पष्टः ॥ २४ ॥ ईशस्य समष्टित्वे इतरेषां व्यष्टित्वे च कारणमाह ॥ समष्टिरिति ॥ ईशोऽयं यो हिरण्यगर्भः सर्वेषां लिङ्गशरीरोपाधिकानां

प्राज्ञस्तत्राभिमानेन तैजसत्वं प्रपद्यते ॥ हिरण्यगर्भतामीशस्तयोर्व्यष्टिसमष्टिता ॥ २४ ॥ समष्टिरीशः सर्वेषां स्वात्मतादात्म्यवेदनात् ॥ तदभावात्ततोऽन्ये तु कथ्यन्ते व्यष्टिसंज्ञया ॥ तद्भोगाय पुनर्भोग्यभोगायतनजन्मने ॥ पञ्चीकरोति भगवान्प्रत्येकं वियदादिकम् ॥ २६ ॥

तेन जीवानां स्वात्मतादात्म्यवेदनात् ॥ स्वात्मना तादात्म्यस्यैकत्वस्य वेदनात् ज्ञानात् समष्टिर्भवति ॥ अन्ये तु ईश्वरादन्ये जीवास्तु तदभावात् स्वात्मतादात्म्यवेदनाभावात् व्यष्टिसंज्ञया कथ्यन्ते ॥ २५ ॥ एवं लिङ्गशरीरं तदुपाधिकौ तैजसहिरण्यगर्भौ च प्रदर्श्य इदानीं स्थूलशरीरोत्पत्तिसिद्धये पञ्चीकरणं निरूपयितुमाह ॥ तद्भोगायेति ॥ भगवान् ज्ञानैश्वर्यादिषड्गुणसम्पन्नः परमेश्वरः तद्भोगाय पुनः तेषां जीवानां भोगाय भोग्यस्यान्नपानादेर्भोगायतनस्य शरीरस्य जन्मने उत्पत्तये प्रत्येकं वियदादिकमाकाशादिभूतपञ्चकं प

क्रमप्राप्तानां रजोंशानां प्रत्येकं समस्तानां च कार्यमाह ॥ रजोंशैरिति ॥ तेषां वियदादीनामेव पञ्चभि रजोंशैः रजोभागैः क्रमात् वाक्पाणिपादपायूपस्थाभिधानानि पञ्चनामकानि कर्मेन्द्रियाणि क्रियात्मकानीन्द्रियाणि जज्ञिरे ॥ २१ ॥ रजोंशानामेव समस्तानां कार्यमाह ॥ तैरिति ॥ तैः सर्वैः सहितैः समस्तरूपैर्मिलितैः रजोंशैः प्राणो नाम वायुरुत्पद्यते इति शेषः तस्य वायोर्भेदमाह ॥ वृत्तिभेदादिति ॥ स प्राणो वृत्तिभेदात् प्राणापानादिव्यापारभेदात् पञ्चधा पञ्चप्रकारो भवति ॥ वृत्तिभेदानेव दर्शयति ॥ प्राणोऽपानः समा

रजोंशैः पञ्चभिस्तेषां क्रमात्कर्मेन्द्रियाणि तु ॥ वाक्पाणिपादपायूपस्थाभिधानानि जज्ञिरे ॥ २१ ॥ तैः सर्वैः सहितैः प्राणो वृत्तिभेदात्स पञ्चधा ॥ प्राणोऽपानः समानश्चोदानव्यानौ च ते पुनः ॥ २२ ॥ बुद्धिकर्मेन्द्रियप्राणपञ्चकैर्मनसा धिया ॥ शरीरं सप्तदशभिः सूक्ष्मं तल्लिङ्गमुच्यते ॥ २३ ॥

नश्चेति ॥ ते पुनस्तद्भेदाः प्राणापानादिशब्दवाच्या इत्यर्थः ॥ २२ ॥ यदर्थमाकाशादिप्राणान्तानां सृष्टिरुक्ता तदिदानीं दर्शयति ॥ बुद्धिकर्मेन्द्रियप्राणपञ्चकैरिति ॥ बुद्धयो ज्ञानानि कर्माणि व्यापारास्तज्जनकानीन्द्रियाणि बुद्धिकर्मेन्द्रियाणि बुद्धीन्द्रियाणि कर्मेन्द्रियाणि चेत्यर्थः ॥ बुद्धिकर्मेन्द्रियाणि च प्राणाश्चेति बुद्धिकर्मेन्द्रियप्राणास्तेषां पञ्चकानि तैर्मनसा विमर्शात्मकेनान्तःकरणेन धिया निश्चयरूपया बुद्ध्या च सप्तदशसंख्याभिः सप्तदशसंख्याकैः सूक्ष्मं शरीरं भवति ॥ तस्यैव संज्ञान्तरमाह ॥ तल्लिङ्गमिति ॥ तदुच्यते वेदान्ते

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

348

न समष्टिमेव स्वस्य शरीरेण तदुपाधिकं जीवं च सृष्टमादर्शितेनेत्कारणाकाशादिसृष्टिमाह ॥ तमःप्रधानप्रकृ
तेरिति तद्भोगायेत्येषां प्राज्ञादीनां भोगाय सुखदुःखसाक्षात्कारसिद्ध्यर्थं तमःप्रधानप्रकृतेस्तमोगुणप्र
धानायाः प्रकृतेस्त्रिगुणात्मिकायाः उपादानकारणभूतायाः सकाशात् ॥ ईश्वराज्ञयेश्वरानाद्यानि ... प्रकृति ...
...पूर्वकसर्गेनेत्यादिरूपया निमित्तयोपादानेन ... निश्चयित्वेन ... पंचभूतानि जज्ञिरे ...
...भूतानि जज्ञिरे ॥१८॥ भूतसृष्टिमभिधाय भौतिकसृष्टिमभिधास्यन् ॥ आदौ ज्ञानेन्द्रियसृष्टिमाह ॥ स
त्त्वांशैरिति ॥ तेषां वियदादीनां पंचभिः सत्त्वांशैः सत्त्वगुणभागैः क्रमादुपादानभूतैः श्रोत्रत्वगक्षिरसनघ्राणा

तमःप्रधानप्रकृतेस्तद्भोगायेश्वराज्ञया ॥ वियत्पवनतेजोम्बुभुवो भूतानि जज्ञिरे ॥१८॥ सत्त्वां
शैः पंचभिस्तेषां क्रमाद्धीन्द्रियपंचकम् ॥ श्रोत्रत्वगक्षिरसनघ्राणाख्यमुपजायते ॥१९॥ तैरन्तः
करणं सर्वैर्वृत्तिभेदेन तद्द्विधा ॥ मनो विमर्शरूपं स्याद्बुद्धिः स्यान्निश्चयात्मिका ॥२०॥

स्येयो (?) दिक्पंचकं श्रोत्रादीन्द्रियाणि ज्ञानेन्द्रियाणि तेषां पंचकं क्रमादुपजायते ॥ एकैकभूतसत्त्वांशादे
कैकमिन्द्रियं जायत इत्यर्थः ॥१९॥ सत्त्वांशानां पंचानां मेलने कार्यमपि ... सर्वेषां सत्त्वांशा
कार्यमाह ॥ तैरिति ॥ तैः सहितैः सत्त्वांशैः सर्वैः संभूय ... अन्तःकरणमुपादानभूतेभ्यः उप
जायते ... तस्य वृत्तिभेदेन द्वैविध्यमाह ॥ वृत्तिभेदेनेति ॥ तदन्तःकरणं वृत्तिभेदेन परिणाम
भेदेन द्विधा द्विप्रकारं भवति ॥ वृत्तिभेदमेव दर्शयति ॥ मन इति ॥ विमर्शरूपं विमर्शः संशयात्मिका वृत्ति
स्तत्स्वरूपं यस्य तत्तथाविधं मनः स्यात् ॥ निश्चयात्मिका निश्चयः ... वसायः स आत्मा स्वरूपं यस्याः सा नि

349

सत्त्वेन कं द्वैविध्यमेव दर्शयति ॥ सत्त्वशुद्ध्यविशुद्धिभ्यामिति ॥ सत्त्वस्य प्रकाशात्मकस्य गुणस्य शुद्धि
... लिनीकृतत्वात् ॥ अविशुद्धिः ... ते मायाविद्ये माया विद्य
... शुद्धिरित्यत्र सत्त्वप्रधाना माया मलिनसत्त्वप्रधाना ... विद्येत्यर्थः ॥ अथ ... मायावि
द्ययोर्भेदं ... दर्शयति ॥ मायेति ॥ मायाबिम्बो मायायां प्रतिफलितश्चिदात्मा तां मायां
वशीकृत्य वर्तमानः सर्वज्ञः सर्वं ... ईश्वरः स्यात् ॥१६॥ अविद्यावशगो विद्यायां प्रतिबिम्बि
तेन स्थितः तस्य तत्त्वविदात्मा ... जीवः स्यात् ... अविद्याया उपाधिभूताया वैचि
त्र्यात् ... अनेकधाऽनेकप्रकारो देवतिर्यगादिभेदेन विविधो भवतीत्यर्थः ॥ यथा ...
...

सत्त्वशुद्ध्यविशुद्धिभ्यां मायाविद्ये च ते मते ॥ मायाबिम्बो वशीकृत्य तां स्यात्सर्वज्ञ ईश्वरः ॥१६॥
अविद्यावशगस्त्वन्यस्तद्वैचित्र्यादनेकधा ॥ सा कारणशरीरं स्यात्प्राज्ञस्तत्राभिमानवान् ॥१७॥

द्विधीकैवमात्माप्युक्तः समष्टितः ॥ शरीरत्वेनत्या ... एवं जायत इत्यत्र तत्र शरीरत्वेन या ...
... जीवस्य ... वदति ॥ तत्रानिकानि ... शरीराणि ... उपाधिको वा जीवः
किंरूपो भवतीत्याकांक्षायां ... दर्शयति ॥ सा कारणशरीरमित्यादिना ॥ सेति
साऽविद्या कारणशरीरं ॥ स्थूलसूक्ष्मशरीरादिकारणभूतप्रकृतत्वस्य विशेषत्वात् ॥ कार
णमुपचारात् ॥ शरीरमिति ... शरीरं स्यात् ॥ तत्र कारणशरीरेऽभिमानवान् ता
दात्म्याध्यासेनाहमित्यभिमानवान् जीवः प्राज्ञः प्रज्ञः अविनाशस्वरूपानन्दभवरूपाय ...

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

कोसौ प्रतिबंधस्तत्राह ॥ प्रतिबंधस्ति ॥ यत्किंभातीति व्यवहाराहं वक्ति निश्चक्ति विषये भातिश्च
काशते सर्वे वं प्रकारे व्यवहारे प्रहेतो न्यक्ति भातीति व्यवहाराहं पतच्चेतदस्व चेतिनन यान्यस्मिन् प्र
वीक्ष्य व्यवहारे निरस्यनिराकृत्य निरुद्धस्य नास्ति न भातीसर्वे प्रपंचस्य व्यवहारस्योत्पादस्तं नन्वप्र
तिबंधमुच्यते ॥ ४ ॥ कलवणस्य प्रतिबंधस्य कारणं दृष्टांतं दार्ष्टांतिकयोः क्रमेणादर्शयति ॥ नस्य
ति ॥ प्रबंधनिकृतो प्रबंधनि श्चवणालत्ताणोरदृष्टांतेन स्यप्रतिबंधस्य हेतुः कारणं समानाभिहारो व

प्रतिबंधो स्ति भातीति व्यवहाराहं वक्ति ॥ नच्चिरस्य विरुद्धस्य नस्योत्पादं न मु
च्यते ॥ ४ ॥ तस्य हेतुः समानाभिहारः प्रबंध निश्चितो ॥ रहानादि विषये व्यामोह
कनिबंधने ॥ ५ ॥ विद्यानेरमर्येव प्रतिबिंबसमन्विता ॥ नमोरजः समवगुणा प्र
कृतिद्विविधवसा ॥ ५ ॥

कभिः समहनं रहस्यांतिके व्यामोहे कनिबंधनं व्यामोहानां विपरीतज्ञानानां पकनिबंधनं मु
ख्यकारणमनादिकमति रहिताविद्याव हूसमाणं प्रतिबंधकस्य हेतुविमर्शः ॥ ५ ॥ इदानीं प्रतिबं
धहेतुभूतानामविद्यामुपादयितेन स्वलक्षणापकतिमुपादयति ॥ विद्यानेरमर्येति ॥ अविद्यानेरकर्ष
प्रलनस्य प्रतिबिंबेन प्रतिबिंबायामसमन्विता युक्ताल मोरजः सत्वगुणानां स्वलक्षणलमोगुणानां सा
म्यावस्थाया साप्रकृतिविमुच्यते ॥ सा च द्विविधा द्विप्रकारका भवति ॥ चकारात् समाणं प्रकारान

यात्मनः परमानंदस्वरूपत्वा लिप्यति ॥ प्रमानमिति ॥ परमानंदस्वरूपेनन्मा भासते नभासते वा प्रमानेः प्रतीतो
नपरं श्रेमात्मनि निवर्तितस्य कः स्वेदानस्यात् ॥ विद्यसौ दृष्टी ज्ञानमनुमानात् ॥ स्वरूपस्य ॥ भानं प्रतीतौ न वि
षयस्वार्थसापेक्षणादेव ततन्मेत्तानमेवाकेवलज्ञानस्यात् ॥ फलज्ञानो मतां प्रसाधनेन ज्ञानेन पद्यते निस्पनि
रतिशयानंदस्वरूपस्यात्मनस्तत्तत्रिके साधनपारं तत्यादिदीपादृष्टिनेवे प्रत्यक्षे व्यवस्थिता यायचत्तस्मा
ज्ञानेदस्वरूपना ॥ आत्मन उपपद्यते ॥ एकाकारेण दृष्टात्मभवाभिव्यमिति पतिहरति ॥ अतह ति ॥ यतो
भानाभानयोलयोरुभयोर्वापि विरोधः ॥ स्फुटः कारणाद्रात्मनः सोपरमानंदताभानेपि प्रतीतो
मत्यः सपि ॥ प्रमाननतः प्रत्तोतिर्भवति ॥ १ ॥ नेनकस्यद्रागपद्मनाभानेन सुश्यते ॥ इत्याशंक्य किमिद

प्रभानेनपरं श्रेममानेन विद्वेषस्य हा ॥ प्रतीभाते प्यभातोसौ परमा
नंदतात्मनः ॥ १ ॥ अध्येतृवर्गमध्यस्थपुत्राध्ययनशब्दवत् ॥ भानेप्यभा
नः भानस्य प्रतिबंधेन युज्यते ॥ १३ ॥

मपुत्रत्वेषु भ्रमपूर्ववत् नुपपत्तिरहितत्वे वाना अशंक्याह ॥ अध्येतृवर्गेति ॥ अध्येतृणां वेदपाठकानां
वर्गः समूहस्तस्य मध्ये तिष्ठतीति ॥ अध्येतृवर्गमध्यस्थः सचासौ पुत्रश्चेति ॥ तथा ॥ तस्याध्ययने
नच्चेदकपठनेन स्यशब्दो ध्वनिर्यथा वहिस्य स्यपितुर्भासमानोपि समानस्यलोभासते न विशेषतः
प्रयस्तत्वबद्ध निरीति ॥ तथानंदस्यापि भानेप्यभानेभवतीत्यर्थः ॥ द्वितीयप्रत्याह ॥ भानस्येति ॥ भाने
प्यमानमितिसन्नदृशाप्यनुपपत्तीयं भानस्यस्फुरणस्य प्रतिबंधेन वस्तुमाणलक्षणेन भानेप्य
नेसामान्यतः प्रतीतावपि विशेषाकारेणाप्रतीतिर्युज्यत उपपद्यत इत्यर्थः ॥ १३ ॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

भूत्वस्वरूपासिद्धिः प्रेम्णः परत्वेन प्रमाणाभावात् द्विषयत्वासिद्धिरित्याशंक्याह ॥ तत्प्रेमेति प्रत्यग-
त्मनि विषये यदात्मार्थत्वेन भासमानं शेषत्वनिमित्तकमेव न स्वाभाविकमेव मात्मनि वि-
षये प्रेम्णः अन्यार्थत्वेनात्मनः शेषत्वनिमित्तकं न भवति किन्त्वात्मनिमित्तकमेव ॥ अतो निरुपाधिक-
त्वात् परमं निरतिशयं ॥ फलितमाह ॥ तेन निरतिशयप्रेमास्पदत्वेनात्मनः परमानन्दता निरतिश-
यसुखस्वरूपत्वं सिद्धं ॥ ९ ॥ एतैः सप्तभिः श्लोकैः प्रतिपादितमर्थं संक्षिप्य दर्शयति इत्थमिति ॥ याबु-
भ्यां दर्शिता तया ॥ तात्पर्यनिश्चयेन प्रमाणेन सिद्धं यमात्मानं त्वंपदार्थेन तात्मनः सच्चिदानन्द-

तत्प्रेमात्मार्थमन्यत्र नैवमन्यार्थमात्मनि ॥ अतस्तत्परमं तेन
परमानन्दतात्मनः ॥ ९ ॥ इत्थं सच्चित्परानन्द आत्मा युक्त्या तथा-
विधं ॥ परं ब्रह्म तयोश्चैक्यं श्रुत्यन्तेषूपदिश्यते ॥ १० ॥

साधिते ॥ यथोक्तैर्युक्तिभिः आत्मनः सच्चिदानन्दरूपत्वे समर्थिते ॥ अत आत्मा महावाक्ये त्वंपदार्थः स-
च्चिदानन्दरूपः सिद्धः ॥ ननु ब्रह्म तावत् प्रमाणान्तरागोचरत्वेन वाक्यात्तत्पदनिर्दिष्टं निर्विशेषं नाप्रमा-
णं प्रसंगात् स्याद्वेत्याह ॥ तथाविधमिति ॥ तथात्मा तद्रूपो विधा प्रकारो यस्य तत्तथाविधं सच्चिदानं-
दरूपं परं ब्रह्म तत्पदार्थस्तयोः त्वंपदार्थतत्पदार्थयोरैक्यमभेदः कस्मात्तेन श्रुत्यन्तेषु वेदान्तेषूपदिश्यते ॥ प्र-
तिपाद्यत इति ॥ अतो न वेदान्तानां निर्विषयत्वमित्यर्थः ॥ १० ॥

भवत्वेवमविरोधित्वात्मप्रकाशत्वेन ततः किमित्यत आह ॥ इयमिति ॥ अज्ञायते योगः ॥ इयमेव विद्या-
त्मा भवितुमर्हतीति ॥ नित्यत्वे सति स्वप्रकाशत्वात् ॥ यथैवं तत्रैव ॥ यथा तद्वदिति ॥ आत्मनो नित्यत्वे स वि-
रूपत्वे प्रमाणे ते न सत्यत्वमपि साधितं भवति ॥ नित्यत्वाविशेषे सत्यत्वाभावात् ॥ नित्यत्वे सत्यत्वं न य-
स्यास्ति तत्रित्वं सत्यमिति ॥ वाचस्पतिमिश्रैरुक्तत्वादिति भावः ॥ आत्मन आनन्दरूपत्वे साधयति परा-
नन्द इति ॥ आत्मेत्यनुषज्यते ॥ परस्यात्मा वानन्दस्य परानन्दः ॥ निरतिशयसुखस्वरूपस्तदर्थः ॥ तत्र हेतु-
माह ॥ परप्रेमास्पदमिति ॥ यतो यस्मात्कारणात् सर्वस्य निरुपाधिकत्वेन निरतिशयस्य प्रेम्णः स्वर-

अयमात्मा परानन्दः परप्रेमास्पदं
यतः ॥ मा न भूवं हि भूयासमिति
प्रेमात्मनीक्ष्यते ॥ ८ ॥

मा

स्यास्पदं विषयत्वस्मात् ॥ अत्रेदमनुमानं ॥ आत्मा परानन्दरूपः परप्रेमास्पदत्वात् यः परानन्दरूपो
न भवति नासौ परप्रेमास्पदं यथा घटः ॥ तथा न चायं परप्रेमास्पदं न भवति ॥ न तस्मात्परमानं-
दरूपो न भवतीति ॥ ननु आत्मनि यथोक्तमिति हेतुः स्योपलभ्यमानत्वात्प्रेमास्पदत्वमेवासिद्धमतः
परप्रेमास्पदत्वमित्याशंक्याह तत्र हेतुः स्वेनैव निमित्तकत्वेनान्यथासिद्धत्वात् ॥ प्रेमास्यात्मनि प्र-
त्यभवतात्मैवमितिनिपीहवति ॥ मा न भूवमिति ॥ हि यस्मात्कारणादात्मनि विषये मा न भूवमहं
मा भूवमिति न मम नाशः कदापि भूत ॥ किं तु भूयासमेव भूयादित्येवंविधं प्रेम सर्वेषां स्वभाव

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

352

353

॥ श्री ॥ पञ्चदशी टिप्पणी ॥ १८ ॥

तस्यानुभवस्य स्वविषयात्तमसो भेदे बोधत्वेन तदभेदे चाह द्वाभ्यां ॥ स बोध इति ॥ स बोधः सौषु
प्ततमोनुभवः विषयात्तमसो भिन्नः पृथग्भवितुमर्हति बोधत्वात् ॥ घटबोधवत् ॥ बोधत्वेन तदा
भिन्नत्वे बोधत्वात्स्वप्नबोधवत् ॥ फलितं कथयन्नुक्तस्यार्थस्यान्यत्रातिदिशति ॥ एवमित्यादिना ॥ स्थि
त्यानत्रयेपि ॥ एकद्वित्ववर्तिजाग्रदादिस्थानत्रयेपि संविदेकैव सर्वेषां कौमारयौवनमिति यथा
तत्तद्वद्दिनांतर इति ॥ यथैकस्मिन्दिवसे स्थानत्रयेपि ज्ञानस्याभेद एवमन्यस्मिन्नपि दिवसेऽनेक
धाऽनेकप्रकारेण गतागम्येषु अतीतानागतेषु ॥ मासेषु चैत्रादिषु अब्देषु प्रभवादिषु युगेषु कृता
दिषु कल्पेषु ब्राह्मादिषु ज्ञानस्याभेद एवेत्यर्थः ॥ संविद एकत्वे समर्थिते फलमाह ॥ नोदेतीति ॥ ए

स बोधो विषयाद्भिन्नो न बोधात्स्वप्नबोधवत् ॥ एवं स्थानत्रयेप्येका संवित्तद्वद्दिनांतरे ॥६॥
मासाब्दयुगकल्पेषु गतागम्येष्वनेकधा ॥ नोदेति नास्तमेत्येका संविदेषा स्वयंप्रभा ॥७॥

तः संविदेकाः नोदेति ॥ नोत्पद्यते ॥ नास्तमेति ॥ न विनश्यतीत्यर्थः ॥ त्रैकालिकयोरुत्पत्तिविनाश
योरभावे प्रागुत्पत्तिविनाशयोः संवित्प्रतीतेरभावात्संविदेतयाभासा इति भावः ॥ ननु सं
विदेतयाभावे ग्राहकाभावात्स्याद्यभावे जगदांध्यप्रसंगेन स्वप्रकाशत्वमाह ॥ स्वेति ॥ अत्रायं प्रयोगः संवि
त्स्वप्रकाशा भवितुमर्हति ॥ अवेद्यत्वे सत्यपरोक्षव्यवहारयोग्यत्वात् ॥ न चायं विशेषणासिद्धो हेतुः
संविदः स्वयं वेद्यत्वे कर्मकर्तृत्वविरोधात् ॥ परवेद्यत्वे चानवस्थानात् ॥ अतः स्वप्रकाशत्वेनाभासमाना
याः संविदः सर्वावभासकत्वसंभवाज्जगदांध्यप्रसंगो नेति भावः ॥७॥

द्युक्तस्यार्थस्य स्वप्नेप्यतिदिशति ॥ तथेत्यादिना ॥ यथा जागरे वेद्याद्विषयात्तद्भेदेप्येकरूपत्वात्संवि
दो भेदस्तथा तेनैव प्रकारेणात्र स्वप्ने दृष्टप्रसंगेन जागरितस्वप्नावस्थायां ज्ञानतः प्रत्ययः सविषयः स
मस्तरूपलक्षणायां स्वप्नावस्थायामपि विषयाणामेव भेदो न संविद इति ॥ ननु यदि स्वप्नजागरयोरेका
कारता विषयतत्संविदोर्भेदाभ्यां तर्हि स्वप्नजागरयोरभेदस्स्यादहा ॥ किं निमित्तकस्तयोर्भेद इत्याह ॥ अ
त्र वेद्यमिति ॥ अत्र स्वप्ने वेद्यं दृश्यमानं वस्तु जागरे स्थिरं न स्यादिति प्रतीतिमात्रशरीरत्वात् ॥ जागरे
तु परिदृश्यमानं वस्तु जागरे स्थिरं स्यादिकालांतरेपि दृश्यमानत्वात् ॥ स्थिरास्थिरविषयत्वलक्षणा
द्वैलक्षण्याद्भेदः स्वप्नजागरयोर्भेदः ॥ ननु स्वप्नजागरयोर्भेदश्चेत्तत्संविदोऽपि भेदः स्यादि
त्या ॥ तत्राह ॥ तयोरिति ॥ एकरूपत्वेनाविशेषात्स्थितत्वेनाभिन्नविधियाणां ॥४॥ एवमवस्थाद्वये ज्ञानस्यैकत्वं प्रसाध्य

तथा स्वप्नेऽत्र वेद्यं तु न स्थिरं जागरे स्थिरं ॥ तद्भेदोऽतस्तयोः संविदेकरूपा न भिद्यते ॥४॥ सुप्तो
त्थितस्य सौषुप्ततमोबोधो भवेत्स्मृतिः ॥ सा चावबुद्धविषयावबुद्धं तत्तदा तमः ॥५॥

सुषुप्तिकालीनस्यापि तमसस्तेनैकताप्रसाधनाय तत्र तावत्ज्ञानं साधयति ॥ सुप्तोत्थितस्येति ॥ सुप्तोत्थित
स्य सुषुप्तिकालात्पूर्वस्थितस्येति वा तस्य सौषुप्ततमोबोधः सुषुप्तिकालेन स्मृतमोऽज्ञानस्य बोधो ज्ञान
मस्तिन किंचिदवेदिषमिति ॥ सा स्मृतिरनुभवं ज्ञानानुभवं लिंगाधारणं स्मृतिक्षेपिकमस्मिन्लिंगादि
भावादिति भावः ॥ ननुः किं तथाह सा चेति ॥ सा च स्मृतिरवबुद्धविषया ॥ अवबुद्धोऽनुभूतो विषयो यस्याः
सा तथोक्ता यत्स्मृतिः सानुभवपूर्विकेति ॥ व्याप्तिर्लोके दृष्टेति भावः ॥ तदापि किं तत्राह ॥ अवबुद्धमि
ति ॥ तत् तस्मात्कारणात्सौषुप्तेन तमस्तदा सुषुप्ताववबुद्धमनुभूतमित्यवगंतव्यं ॥ अत्रायं प्रयोगः ॥ विमि
तं किंचिदवेदिषमिति ज्ञानमनुभवपूर्वकं भवितुमर्हति ॥ स्मृतित्वात्सा मे मातेति मातृस्मृतिवदिति ॥५॥

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

दानीमवान्तरप्रयोजनं कथयन्शास्त्रस्येष्यारंभमुपनिजानीते ॥ तमादोनुरुहहेति ॥ तस्य पादांबुजोरु-
त्कमलेन तयोर्हृत्तस्य श्रेयस्या पदार्थयायामस्तनितमस्कारादिलक्षणनिर्मलेन रागादिरहितेन तोतः क-
रणं येषां तैर्योजना सुधासु त्वं बोधया नायासेन नतत्त्वाऽनोसादनायायं च तन्मानपक्रमः स्पतत्स्या-
रोपितस्वरूपस्य ॥ एवं च सति यदनेन महावाक्येन लक्षितस्तस्मिन्नात्मनि विवेकशोधितान्तःकरणो
जाग्रदादिलक्षणावस्थात्रयेऽपि विवेकेन विधीयते विप्रतनस्यैः ॥ जीवब्रह्मणोरेकत्वलक्षणविषयसंभाव-
नादोषविचारस्तु नानादिशब्दाभ्यां स्थितिपादप्रतिपादितं मायास्वरूपनिमित्तं मायाप्रतीति ॥ तादृश-
योः स्वयं स्यादित्यादिना ॥ तयोर्वाहि महावाक्यवदर्थादेवनिजात्मनोभेदस्वप्रत्यनि ॥ तादृशस्यांशस्यरूपता ॥ नागोऽ

तेनमादोनुरुहहृदि सेवानिर्मलचेतसां ॥ सुखबोधायतत्त्वस्य विवेकोऽयं विधीयते ॥२॥
तादृश्यस्यात्मस्वरूपस्य विवाज्ञायोत्पत्त्येकं ॥ तत्त्वविवेकाणत्त्वं विवेकरूपात्प्रभिदते ॥३॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीमद्भारतीतीर्थविद्यारण्यमुनिवर्यकिंकरेण श्रीरामकृष्णाख्यविदुषा
कृतायां पदीपिकायां ... तत्त्वविवेकप्रकरणं समाप्तम् ॥ वेदितव्यात्मस्वरूपं गतवान् ऋषि विहितलक्ष-
णे पञ्चधा ... विवेचिताः संविदेकरूपाः ॥ ततः स्वरूपविवेकप्रकाशेन विवेचनेनैव विमृश्य संविदात्मन
एकरूपात्मविचारे विशिष्य ... वाक्यस्य मानानात्मत्वं विवेकेनाभिधीयते ॥ पञ्चानां प्रयोगः ॥ विवाद-
स्पदस्यात्मसंवित्स्वभाविकत्वेऽपि ... निमित्तविषयविभागेन भेदत्वाङ्कनवत् ॥ सा
स्वसंवित्स्वरूपस्य संविदेनाभिधीयते संवित्स्वरूपस्य संविद्दृष्टिरिति ॥ कस्मात्सर्वसंविदोऽनेनैव पारमार्थिकभेदेन
विभिन्नव्यवहारोपपत्तेश्चावान्तरभेदकल्पनायोगाद्भेदबाधकश्रुतेश्च ॥१॥ ॥

ॐ स्वस्ति श्रीगणेशाय नमः ॥ ॐ नत्वा श्रीभारतीतीर्थविद्यारण्यमुनीश्वरौ ॥ प्रत्यक्तत्त्वविवेकस्य क्रि-
यते पददीपिका ॥१॥ प्रारिप्सितस्य ग्रन्थस्याविघ्नेन परिसमाप्तिप्रचयगमनाभ्यां शिष्टाचारपरिप्राप्त-
मिष्टदेवतागुरुनमस्कारलक्षणं मङ्गलाचरणं स्वेनानुष्ठितं शिष्यशिक्षार्थं श्लोकेनोपनिबध्नाति ॥ प्र-
योजनविषयसंबन्धानप्यनेनैव सूचयति ॥ नम इति ॥ शं सुखं करोतीति शंकरः ॥ सकलजगदानन्दकरः ॥ प-
रमात्मा ॥ एवं चानन्दयतीति व्युत्पत्तेः ॥ आनन्दो निरतिशयसुखरूपः परमानन्दरूपः प्रत्यगात्मा ॥ शं-
करश्चासावानन्दश्चेति शंकरानन्दः ॥ प्रत्यगभिन्नः परमात्मासर्वगुरुः ॥ परिपक्वमलापेतानुग्रह-
हेतुशक्तिपातेन यो नयति परेण नेमदीनव्याचार्यमूर्तिस्थस्त्वागमान ॥ श्रीमांश्चासौ शंकरानन्दगुरु-

ॐ नमः श्रीशंकरानंदगुरुपादांबुजन्मने ॥
सविलासमहामोहग्राहग्रासैककर्मणे ॥१॥

श्चेति ॥ गन्धद्वीपवत्समासः ॥ अनेन गुरोरात्मनो ऐक्यं संपन्नत्वं सूचितं ॥ यद्वा श्रिया महत्या शंकरो भवति
शोकः ॥ एतेनानन्दः परिपूर्णता इति कृतं ॥ अनेन श्रीमद्गुरोरभेदे नैकरस्यं पादेन सामर्थ्यं सूचितं भवति ॥ तस्य गुरोः
पादांबोजं तत्त्वचरणकमलं तस्मै नमः ॥ प्रह्वीभावोऽस्त्विति विधा ॥ सविलासमहामोहग्राहग्रासैक-
कर्मणे ॥ विलासः कार्यवर्गः तेन सह वर्तत इति सविलासः ॥ महामोहो मूलाज्ञानं स एव ग्राहो म-
करादिवत्स्वग्रासगमस्यातीव दुःखहेतुत्वात्स ग्राहो निवर्तने ॥ स एवैकं मुख्यं कर्म व्यापारो यस्य त-
त्तथा तस्मै तस्मै ॥ अत्र च शंकरानन्दपदेन प्रत्यगानन्दस्वरूपेण जीवब्रह्मणोरेकत्वलक्षणं वि-
षयः सूचितः ॥ जीवस्य ब्रह्मस्वरूपतया परिच्छिन्नत्वाभावलक्षणं प्रयोजनं च सूचितं ॥ सविलासे

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

005586

358

359

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

361

...GENT

...SS MATTER

ON INDIA GOVERNMENT SERVICE

HMP

The Editor,
"Gurukul Patrika", (Monthly),
Gurukul Vishwa Vidyalaya,
~~[illegible]~~ (U.P).

G. Kangri

360

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA

005586

362

CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA


CC-0. Gurukul Kangri University Haridwar Collection. Digitized by S3 Foundation USA